अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते ॥ नन्वित्यादिना ॥ अनुमितिहेत्वित्यस्य अनुमाननिष्ठप्रामा
ण्यानुमितिहेत्वित्यर्थः ॥ व्याप्तिज्ञाने इ सत्त्रविषयत्वे सप्तम्यर्थः ॥ तथा चानुमाननिष्ठप्रामाण्यानुमितिहेतुज्ञानविषयीभू
ता व्याप्तिः केत्यर्थः ॥ अनुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकल्पनादनुमानप्रामा
ण्यनिरूपणानन्तरं व्याप्तिनिरूपणेऽनुपोद्घातसंगतिरिति सूचितं ॥ उपपादकत्वं चात्र ज्ञापकत्वं केचित्तु ॥ अनुमितिहेत्वित्यस्यानु
मितिहेतुत्वेनानुमितिलक्षणघटकेत्यर्थः ॥ तथा च लक्षणोपोद्घात एव संगतिरिति सूचितमित्याहुः ॥ अपरे तु अनुमितिप
दमनुमितिनिष्ठेतरभेदानुमितिपरं ॥ तथा चानुमितिनिष्ठेतरभेदानुमितौ यो हेतुः पाठक्रम व्याप्तिप्रकारकपक्षधर्मताज्ञानम
न्यज्ञानत्वरूपः तत्र घटकं यद्व्याप्तिज्ञानं तद्विशेषणीभूता व्याप्तिः केत्यर्थः ॥ घटकत्वार्थकसप्तम्यास्तत्पुरुषसमासात्त
था च प्रागुक्तोपोद्घात एव संगतिरत्रापि सूचितेत्याहुः ॥ तदिति हि यस्मात् तदव्यभिचरितत्वं नेति सर्वत्र मिलित्वैव लक्षणे संबध्यते ॥ साध्ये
ति ॥ वृत्तं वृत्तिः भावे निष्ठाप्रत्ययात् वृत्तस्याभावो अवृत्तं वृत्त्यभाव इति यावत् साध्याभाववतो अवृत्तं साध्याभाववद्वृत्तं साध्याभा
ववद्वृत्त्यभाव इति यावत् ॥ अत्रापि तत्तत्साध्याभाववद्वृत्तीमत्वर्थीयेनप्रत्ययात्तस्याभावः साध्याभाववद्वृत्तित्वे तथा
त च साध्याभाववद्वृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः ॥ तदसत् नञ्कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरइ स
४ न तावदित्यादि ॥ तावद्धूत्क्यालंकारे ॥ अव्यभिचरितत्वं ॥ अव्यभिचरितत्वपदप्रतिपाद्यं ॥ अत्र हेतुमाह तदित्यादि ॥ अव्य
४ भिचरितत्वपदप्रतिपाद्यं यस्मात् नेति सर्वत्र लक्षणे संबध्यते ॥ तथा च व्याप्तिर्यतः साध्याभाववद्वृत्तित्वादिरूपा अव्यभिचरितत्वशब्द

मूलमाथुरी। १३

नुशासनविरोधात्। तत्र कर्मधारयस्य बहुव्रीहिं समासपरत्वात्तत्र गुणवत्त्वमित्यत्र साधर्म्यव्याख्यानावसरे गुणप्रकाशर त
हस्ये तद्दीधितिरहस्ये च स्फुटं॥ अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासा। निविष्टपदार्थान्वयस्याव्युत्पन्नत्वाच्च भूतलो
पकुंभं भूतलाघटमित्यादौ भूतलवृत्तिघटसमीपनदत्संताभावयोरप्रतीतेः एतेन वृत्तेरभावोऽवृत्तिरित्यव्ययीभावानन्तरं
साध्याभाववतोऽवृत्तिर्यत्रेति बहुव्रीहिरित्यादि प्रत्युक्तं। वृत्तौ साध्याभाववतोऽनन्वयापत्तेः अव्ययीभावसमासस्याव्ययतया
तेन समं समासांत राभवाच्च नञ्तत्पुरुषादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात्। वस्तुतस्तु साध्या
न भाववतोऽवृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीह्युत्तरत्वप्रत्ययः। साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः॥ अन्वयश्चास्य वृ
त्तौ तथा च साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमिति फलितं साध्याभावाधिकरणवृत्त्यभावश्च तादृशवृत्तिसामान्याभावो
बोध्यः तेन धूमवान्वह्नेरित्यादौ साध्याभाववज्जलह्रदादिवृत्त्यभावस्य धूमाभाववद्वृत्तित्वजलत्वाद्यभावस्य च वह्नौ सत्त्वेपि नातिव्या
प्तिः साध्याभाववद्वृत्तिश्च हेतुतावच्छेदकसंबंधेन विवक्षणीया तेन वह्न्यभाववति धूमावयवे जलह्रदादौ समवायकालि
कविशेषणतादिना धूमस्य वृत्तावपि नाव्याप्तिः॥ साध्याभावश्च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रति
योगिताको बोध्यः तेन वह्निमान्धूमादित्यादौ समवायादिसंबंधेन वह्निसामान्याभाववति संयोगसंबंधेन तत्तद्वह्नित्वावच्छि राम॰

न्नव्यधिकरणबहुव्रीहिर्न सर्वत्र साधुरिति वाच्यं अयं तु साध्याभाववद्वृत्तिरित्यादौ व्यधिकरणबहुव्रीहिं विना गत्यंतराभा

३ त्रवन्हिजलोभयत्वावच्छिन्नतांशाभाववति धूमस्य हेतुतापि न व्याप्तिः॥ नवा विशिष्टसत्तान्तर्जाते रिपत्रातिव्याप्तिः॥ ननु सत्तावान्
जातेरित्यत्र विषयित्वाव्याप्यत्वादिसंबंधेन तादृशसाध्याभाववति ज्ञानादौ जातेर्वृत्तिमत्वादव्याप्तिः॥ नच साध्याभाववत्वम
भावीयदैशिकविशेषणताविशेषेणेति वाच्यं तथासति घटत्वासंतताभाववान् घटान्योन्याभाववान् पटत्वादित्यादौ घटत्वादेः विशे
षणताविशेषेणाधिकरणाप्रसिद्ध्या अव्याप्तिरिति चेन्न साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसा
ध्याभाववृत्ति साध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेन साध्याभावाधिकरणत्वविवक्षणात्॥ हंत प्रतियोगिताविशेषणतादृश
संबंधश्च वह्निमान् धूमादित्यादिभावसाध्यकस्थलेऽभावीयविशेषणताविशेषः घटान्योन्याभाववान् पटत्वादित्यादिअभावसाध्यकस्थ
ले तु समवायादिसमवायादिसंबंधावच्छिन्नप्रमेयाद्यभावस्य कालिकादिसंबंधेन योऽभावस्सोपि प्रमेयतया साध्यान्तर्गतः तदीयप्रति
योगि[illegible]तावच्छेदक[illegible]समवायविषयित्वादिसंबंधेन प्रमेयादिसाध्यके ज्ञानत्वादिहेतौ साध्यतावच्छेदककालिकादिसंबंधेन साध्या
भावाधिकरणे ज्ञानत्वादेर्हेतोरव्यभिचारणाय सामान्यपदोपादानं॥ साध्यसामान्यीयत्वं च यावत्साध्यनिरूपितत्वं स्वनिरूपकसा
ध्यकभिन्नत्वमिति यावत्॥ अस्यैकोक्तिमात्रत्वयागौरवस्यादोषत्वात्॥ कारणतावच्छेदके च भावसाध्यकस्थलेऽभावीयविशेषण
ताविशेषेण साध्याभावाधिकरणत्वं अभावसाध्यकस्थले यथायथं समवायादिसंबंधेन साध्याभावाधिकरणत्वमुपादेयं साध्य

भाव १

मा० थुरी० १४ भेदेन कार्यकारणाभेदात्। न च तथापि घटान्योन्याभाववान् घटत्वत्वादित्यादौ घटान्योन्याभावसाध्यके घटत्वां रूपे साध्याभा
वे। न साध्यप्रतियोगित्वं न वा समवायादिसंबंधस्तदवच्छेदकः तादात्म्यस्यैव तदवच्छेदकत्वात् व्याप्तिस्तदवस्थैवेति वाच्यं॥ असत्ताभा
वाभावस्य प्रतियोगिरूपतया घटभेदस्य घटभेदासत्ताभावत्वावच्छिन्नाभावरूपत्वेन प्रतियोगितावच्छेदकीभूतघटत्वस्यापि सम
वायसंबंधेन घटभेदप्रतियोगित्वात्। न वा यत्रासत्ताभावाभावस्य प्रतियोगित्वेपि घटभेदासत्ताभावाभावो न घटभेदस्वरूपः किंतु
प्रतियोगितावच्छेदकीभूतघटत्वासत्ताभावरूप एवेति सिद्धान्त इति वाच्यं॥ यथा हि घटत्वावच्छिन्नघटवत्त्वग्रहे घटासत्ताभावाग्र
हात् घटासत्ताभावाभावस्य व्यवहाराच्च घटासत्ताभावाभावो घटस्वरूपस्तथा घटभेदवत्त्वग्रहे घटभेदासत्ताभावाग्रहात् घटभे
दासत्ताभावाभावस्य व्यवहाराच्च घटभेद एव तदसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभाव इति तन्त्रसिद्धान्तो न युक्तिसहः विनिगमका
भावेनापि घटत्वावच्छिन्नप्रतियोगिकाभाववद् घटभेदस्यापि घटभेदासत्ताभावाभावत्वसिद्धेः प्रसक्तत्वाच्च अगत्या तादृशोपि सिद्धान्तो
नोपाध्यायसम्मतः अत एवाभावविरहात्मकत्वं वस्तुनः प्रतियोगित्वे साचार्याः अन्यथा घटभेदासत्ताभावप्रतियोगिनि घटभेदेन लक्ष
णाव्याप्त्यापत्तेः नचैवमन्योन्याभावप्रतियोगितावच्छेदकेन लक्षणस्यातिव्याप्तिः इष्टापत्तेः नचैवं घटत्वत्वावच्छिन्नप्रतियोगि
ताकघटत्वासत्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यं तदसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्युपग

मा

व्या मात्रत्ते हेत्वग्रहेता दशभेदासंताभावाभावस्य वक्ष्य वहारात्तदुपौ यैः घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्संताभावस्यापि घट
भेदस्वरूपत्वाभ्युपगमाच्च नचैवं साध्यसामानाधीयप्रतियोगितावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं साध्यताव
च्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वस्य प्रतियोगिताविशेषणेनेति वाच्यं ॥ कालिकसंबंधावच्छिन्नात्मत्वप्रकारकप्रविशेष्यत्वाभावस्य
विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतौ अव्याप्त्यापत्तेः कालिकसंबंधावच्छिन्नसाध्याभावस्य विशेषणताविशेषसंबंधेन यो
भावस्तस्यापि साध्य रूपतया कालिकसंबंधवद्विशेषणताविशेषोपि साधीयप्रतियोगितावच्छेदकसंबंधः तेन संबंधेनात्मत्व
मा प्रकारकप्रविशेष्यत्वरूपसाध्याभाववदात्मनि हेतोरात्मत्वस्य हेतेः ॥ प्रतियोगितावच्छेदकवत्प्रतियोग्यव्यन्योन्याभावाभावः ॥ तेन तता
दात्म्यसंबंधेन साध्यतायां साध्यतावच्छेदकसंबंधेन साध्याभाववद्वृत्तिसाध्यीयप्रतियोगित्वस्यापि नाप्रसिद्धिः ॥ इत्थं चात्यन्ताभावत्वनिरूपि
तत्वेनापि साध्यसामानाधीयप्रतियोगिताविशेषणीया अन्यथा घटान्योन्याभाववान् घटत्वत्वात् इत्यादावव्याप्त्यापत्तेः तादात्म्यसंबं
साध्याभाववद्वृत्ति धस्यापि साध्याभाववद्वृत्तिसाध्यसामानाधीयप्रतियोगितावच्छेदकत्वात् । यद्वा साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यसामानाधीयनिरूपकप्रति
योगित्वतदवच्छेदकत्वान्यतरावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्षणीयं ॥ इत्थं चान्यतरविशेषणमेव च घटान्योन्या
भाववान् घटत्वत्वादित्यादौ साध्याभावस्य घटत्वादेः साध्यप्रतियोगित्वविरहेपि न क्षतिः तादृशान्यतरस्य प्रतियोगितावच्छेदकत्वे

३ न च तथापि गुणाभिन्नं द्रव्यत्वादित्यादावव्याप्तिः गुणाभेदात्यन्ताभावस्य गुणगतात्मकस्यात्यन्ताभावत्वनिरूपितप्रति

गुणत्वनि ७

भा॰टी॰
१५

स्यैव तत्र सत्त्वात्॥ न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्यादौ साध्यव्याप्यसाधकसद्धेतावव्याप्तिरिति वाच्यं॥ निरुक्तसाध्याभाववद्वृत्ति वृत्ति
शिष्टनिरूपिताधानिरूपकसंबन्धसंसर्गकनिरवच्छिन्नाधिकरणताताश्रयावृत्तित्वस्य विवक्षितत्वात्॥ तेन गुणकर्मान्यत्वविशिष्टसत्ताभा
ववान् गुणत्वादित्यादौ सत्तात्मकसाध्याभावाधिकरणत्वस्य गुणादौ वृत्तित्वेपि साध्याभाववद्विशिष्टनिरूपिताधिकरणत्वस्य गुणादि
वृत्तित्वेन नाव्याप्तिः॥ न चैवं कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वस्याऽप्रसिद्ध्याऽव्याप्तिरिति वा
च्यं॥ केवलान्वयिन्यभाववदित्यनेन ग्रन्थकृतैवाग्रे तस्य वक्ष्यमाणत्वात्॥ न च तथापि कपिसंयोगी भिन्नगुणत्वादित्यादौ निरवच्छि
न्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः॥ अन्योन्याभावस्याव्याप्यवृत्तित्वनियमवादिनये तस्य केवलान्वयिन्यन्तर्गतत्वादिति वा
च्यं॥ तस्याव्याप्यवृत्तित्वनये अन्योन्याभावासंसर्गाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेऽप्यव्याप्यवृत्तेः तदन्योन्याभावाभावस्य व्या
प्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात्॥ तच्चाग्रे स्फुटीभविष्यति॥ ननु तथापि समवायादिना गगनहेतुके इदं वह्निमत्त्वं गगनादित्या दिस्या
ति व्याप्तिः॥ वह्न्यभाववति हेतुतावच्छेदकसमवायसंबन्धेन गगनादेरवृत्तेः॥ न च तत्र स्वमेव हेतुतावच्छेदकसंबन्धेन यत्र धर्मस्या रामं॰
सा भावात्तद्धेतुत्वव्यवहार इति वाच्यं॥ तत्रापि व्याप्तिभ्रमेणैवानुमितेरनुभवसिद्धत्वात्॥ अन्यथा द्रव्यत्ववान् सत्त्वादित्यादेरपि लक्ष्यत्वे
स्य स्वव च त्वात्॥ एवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः॥ विशिष्टस्य केवलसत्तानतिरेकितया द्रव्यत्वाभाववत्स

पि गुणादौ तस्य हेतोः गुणो गुणकर्मान्यत्वविशिष्टसत्तेति प्रतीतेः सर्वानुभवसिद्धत्वात् सत्तावान् द्रव्यत्वादित्यादौ व्याप्तिश्च स
त्ताभाववद्वृत्तिसामान्यादौ हेतुतावच्छेदकसमवायसंबंधेन वृत्तेरप्रसि   द्धेरिति चेन्न हेतुतावच्छेदकावच्छिन्नहेतुत्वाधिकरणताप्रतियोगिक
हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसंबंधेन निरुक्तसाध्याभाववत्त्वविशिष्टनिरूपितनिरुक्तसंबंधसं
सर्गकनिरवच्छिन्नाधिकरणताश्रयवृत्तित्वसामान्याभावस्य विवक्षितत्वात्। इति चेन्न हेतुतावच्छेदकसंबंधेन विवक्षणीया। जाति
यसवान् द्रव्यत्वादित्यादौ सत्ताभावाधिकरणतावद्वृत्तित्वस्य हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतानिरूपितविशेषसंबंधेन सामान्या

ता विशेष

भावो द्रव्यत्वा   दौ हेतुतावच्छेदकसमवायसंबंधावच्छिन्नाधेयतानिरूपितविशेषसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावाधिक

यता विशेष

रणतावद्वृत्त्यभावस्याधिकरणसंबंधावच्छिन्नाभावत्वात् संयोगसंबंधावच्छिन्नगुणाभावादेरिव केवलान्वयित्वात् द्रव्यं सत्त्वादित्यादौ
च द्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्य समवायावच्छिन्नाधेयतानिरूपितविशेषणतासंबंधेन सत्तायां सत्त्वात् नातिव्याप्तिः। द्रव्यं वि
शिष्टसत्त्वादित्यादौ अव्याप्तिवारणाय प्रतियोगि   कान्तमाधेयतविशेषणावस्तातस्ता एतल्लक्षणाकतरनये विशिष्टसत्त्वविशिष्टनिरूपि
तो संबंधेन द्रव्यत्वव्याप्यं न तु समवायसंबंधेन तथा च प्रतियोगिकान्तमाधेयताविशेषणं नोपादेयं तदुपादाने कार्यकारणभावभेदाप

धारता।

त्तिः हेतुतावच्छेदकसंबंधेन संबंधि   त्वे सति इत्यस्यानेनापि विशेषणीयत्वात् वह्निमान् गगनादित्यादौ नातिव्याप्तिः। न तु तथा

हेतुतावच्छेदकभेदेन २

माथुरी
१८

प्युभयत्वमुभयत्रैव पर्याप्तं न त्वेकत्रेति सिद्धान्तादरे घटत्ववान् घटपटोभयत्वादित्यादौ पर्याप्त्याख्यसंबंधेनोभयत्वहेतुके अति
व्याप्तेः घटत्वाभाववति पटे पर्याप्त्याख्यसंबंधेन हेतोरवृत्तेः घटेन घटपटोभयमिति प्रतीतिवत् पटेन घटपटोभयमिति प्रतीते
रिति चेन्न तादृशसिद्धान्तादरे हेतुतावच्छेदकसंबंधेन साध्यसमानाधिकरणत्वस्य तु इत्यनेनैव विशेषणीयत्वादत एवोक्तं निवेश
नीयो हेतुरिति मत्वा साध्यसामानाधिकरण्यं चेति केवलान्वयिग्रन्थे दीधितिकृता ॥ केचित्तु ॥ निरुक्तसाध्याभाववत्त्वविशिष्टनिरूपितताया विशे
षणताविशेष्यसंबंधेन यथोक्तसंबंधेन वा निरवच्छिन्नाधिकरणता तदाश्रया हेति हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाधिकरण
वे ना त्वं तद्धर्मत्वं विवक्षितं तेन धूमवान् वह्नेरित्यादौ पर्वतादिनिष्ठवह्न्यधिकरणत्वस्य धूमाभावाधिकरणावृत्तित्वेऽपि अयोगोलकनिष्ठवह्न्य
धिकरणताया अक्षतत्वान्नातिव्याप्तिरित्याहुः ॥ अन्ये तु हेतुतावच्छेदकसंबंधावच्छिन्नसा धिकरणताश्रय हेतिपदे निरवच्छिन्नाधि
करणत्वं तद्वृत्तिनिरुक्तसाध्याभाववत्त्वविशिष्टयथोक्तसंबंधावच्छिन्नाधिकरणतात्वकत्वमिति विशेषणविशेष्यभावव्यत्यासेनार्थे स्व
दे हेतुपरं ॥ इत्थं च कपिसंयोगाभाववान् सत्त्वात् कपिसंयोगिभिन्नगुणत्वादित्यादौ नाव्याप्तिरित्याहुरिति संक्षेपः ॥ लक्षणान्तर
माह ॥ साध्यवद्भिन्नेति ॥ साध्यवद्भिन्नो यः साध्याभाववान् तदवृत्तित्वमित्यर्थः ॥ कपिसंयोगी एतद्वृक्षत्वादित्या द्यव्याप्यवृत्तिसा एम॰
ध्यकाव्याप्तिवारणाय साध्यवद्भिन्नेति साध्याभाववतो विशेषणमिति प्राञ्चः तदसत् ॥ साध्याभाववदित्यस्य अर्थतापत्तेः साध्यव

वद्भिन्नावृत्तित्वमित्यस्यैवसम्यक्त्वात् नव्यास्तु साध्यवद्भिन्नेयः साध्याभावः साध्यवद्भिन्नसाध्याभावः तद्वद्वृत्तित्वमितिस
प्तमीतत्पुरुषोत्तरमतुप्प्रत्ययः तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावः तद्वद्वृत्तित्वमर्थः एवं च साध्यवद्भिन्नवृत्तीत्युक्तौ नु
संयोगीद्रव्यत्वादित्यादावव्याप्तिः संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः तद्यावद्दाने च संयोगवद्भिन्नवृत्तिसंयोगाभावो गुणादि
वृत्तिसंयोगाभाव एव ॥ अधिकरणभेदेनाभावभेदात् तद्वद्वृत्तित्वाभावाव्याप्तिः ॥ [redacted] ॥ न च तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु किं साध्याभाववद्वृत्य
नेनेति वाच्यं ॥ यथोक्तलक्षणे तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात् न च तथापि साध्यवद्भिन्नवृत्तिर्यः त
द्वद्वृत्तित्वमित्येवास्तु किं साध्याभाववद्वेनेति वाच्यं तादृशद्रव्यत्वादिमद्वृत्तित्वादसंभवापत्तेः साध्याभावे यत्र साध्यवदन्यवि
ए तदर्थमेव द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वात् भावरूपाभावस्य चाधिकरणभेदेन च भेदाभावात् ननु तथापि घटाकाशसं
योगघटत्वान्यतराभाववान् गगनत्वादित्यत्र घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्त्वात्तद्वृत्तुत
स्य याऽव्याप्तिः साध्यवद्भिन्ने घटे वर्तमानस्य साध्याभावस्य घटाकाशसंयोगस्य गगनेऽपि सत्त्वात्तत्र च हेतोर्वृत्तेः न च साध्यव
द्भिन्नवृत्तित्वविशिष्टसाध्याभाववद्वृत्तित्वं विवक्षितमिति वाच्यं साध्याभावपदवैयर्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्वविशिष्ट, वद्वृत्ति

माथुरी
९७

त्वस्यैवसम्यक्त्वादिति चेन्न अभावस्यातिरिक्तत्वमते नैतल्लक्षणाकरणात् तथाचाधिकरणाभेदेनाभावभेदात् साध्यवद्वृत्तेर्घटे वर्त्तमा
वाभा नस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्रतियोगिमति गगनेऽसत्त्वाद् व्याप्तेरभावात् नचैवं साध्याभावे तत्र साध्यवद्वैयर्थ्यं
अभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावत्वाभावात् साध्यवद्वृत्तिघटाभावादेस्तु हेतुमत्यसत्त्वात् अधिकरणाभेदेनाभावभेदादि
ति वाच्यं यत्र हि प्रतियोगिसमानाधिकरणत्वं प्रतियोगिव्यधिकरणत्वलक्षणाविरुद्धधर्माध्यासः तत्रैवाधिकरणाभेदेनाभाव
भेदाभ्युपगमो न तु सर्वत्र तथाच साध्यवद्वृत्तिघटाभावादेर्हेतुमत्यपि सत्त्वादसंभववारणाय साध्यवदोपादानात् यद्वा घटाका
भावा शसंयोगघटत्वान्यतराभावोऽतिरिक्तः आकाशसंयोगघटत्वादीनामननुगततया तथात्वस्यैव वक्तुमशक्यत्वात् घटत्वद्रव्यत्वाभावाभा
वस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामप्यनुगतत्वात् तथा च द्रव्यत्वादिकमादायासंभववारणायैव साध्यवदिति प्राहुरित्यास्तां विस्त
रः॥ ॥साध्यवत्प्रतियोगिकान्योन्याभावेति॥ हेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणावृत्तित्वाभाव इत्यर्थः अन्योन्या
भावश्च प्रतियोग्यवृत्तित्वेन विशेषणीयः तेन साध्यवतो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तावपि नासं
भवः नन्वेवमपि नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभा
ववति हेतोर्वृत्तेरव्याप्तिर्दुर्वारा प्रतियोग्यवृत्तित्वमपहाय साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पंचमेन सह यौनर

त्वमिति चेन्न वक्ष्यमाणकेवलान्वयिन्यव्याप्तिवदस्याप्यत्र दोषत्वात् न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैव तल्लक्षणा
घटकत्वे वक्ष्यमाणकेवलान्वयिन्यव्याप्तिरसंगता केवलान्वयिसाध्यकेपि साध्याधिकरणीभूतैतद्व्यक्तित्वावच्छिन्नान्योन्याभावस्य प्र त
सिद्धत्वादिति वाच्यं तथापि तादृशान्योन्याभावस्य प्रसिद्धत्वेपि तद्वृत्तिहेतोर्वृत्तेरव्याप्तेर्दुर्वारत्वात् यद्वा साध्यवत्प्रतियोगिकान्योन्याभा
वपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाव एव विवक्षितः न चैवं पंचमाभेदः तत्र साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्यो
न्याभावत्वेन प्रवेशोऽत्र तु तादृशान्योन्याभावाधिकरणत्वेनेत्यधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात् अखंडाभावघटकतया च
नाधिकरणत्वांशस्यात्र वैयर्थ्यमिति न कोपि दोष इति दिक् ॥ सकलेति ॥ साकल्यं साध्याभाववतो विशेषणं तथा च यावंति साध्याभा
वाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतौ व्याप्तिरित्यर्थः धूमाद्यभाववत् घटादिनिष्ठाभावप्रतियोगित्वात् वह्न्यादेरतिव्याप्तिरतो या
वदिति साध्याभाववतो विशेषणं साध्याभावविशेषणत्वे तु द्रव्यवृत्तित्वादिरूपेण यावत्त्वाद्यभावः तस्यापि सकलेष्वनिवेशात्ताव
दधिकरणाप्रसिध्याऽसंभवापत्तेः न च द्रव्यं सत्वादित्यादौ द्रव्यत्वाभाववति सत्वादेर्विशिष्टाभावादिसत्वादतिव्याप्तिरिति वाच्यं ता
वत् तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकस्यैव विवक्षितत्वात् ॥ प्रतियोगिता च हेतुतावच्छेदकसंबंधावच्छिन्ना ग्राह्या तेन
द्रव्यत्वाद्यभाववति गुणादौ सत्वादेः संयोगादिसंबंधावच्छिन्नाभावसत्वेपि नातिव्याप्तिः साध्याभाववत्त्व साध्यतावच्छेदकावच्छि

साध्याभाव ४

न्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताको बोध्यः अन्यथा पर्वतादेरपि वृत्त्यादेर्विशिष्टाभावादिमत्त्वेन समवायसंबंधावच्छिन्नव
ह्न्यादिसामान्याभाववत्त्वेन च यावदन्तर्गततया तन्निष्ठाभावप्रतित्वाभावात् धूमस्यासंभवस्यात् न च कपिसंयोगी एतद्वृक्षत्वादित्यादौ वृ
क्षस्यापि तादृशसाध्याभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृक्षत्वस्याव्याप्तिरिति वाच्यं किंचिदनवच्छि
न्नायाः साध्याभावाधिकरणताया इह विवक्षितत्वात् अथ च किंचिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणतायाः गुणादावेव स
त्त्वात्तत्र च हेतोरप्यभावसत्त्वान्नाव्याप्तिः न च कपिसंयोगाभाववान् सत्त्वादित्यादौ साध्याभावस्य कपिसंयोगा देः निरवच्छिन्ना
त्ता [redacted] धिकरणाप्रसिद्ध्याऽव्याप्तिरिति वाच्यं केवलान्वयिन्यभावादित्यनेन ग्रंथकृतैव तन्न दोषस्यैव स्पष्टमाणत्वात् न च पृथिवी
कपिसंयोगादित्यादौ पृथिवीत्वाभाववति जलादावेव कपिसंयोगाभावसत्त्वादव्याप्तिरिति वाच्यं तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्ति
मत्त्वस्य विवक्षितत्वात् अथ च पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गत निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किं
तु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वान्नातिव्याप्तिः नन्वेवमन्योन्याभावस्याव्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान्
संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतया तत्राव्याप्तिः कपिसंयोगवद्भिन्नत्वाभावस्य संयोगस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरिति वा
च्यं अन्योन्याभावस्याव्याप्यवृत्तितानियमनयेऽन्योन्याभावस्याभावो न प्रतियोगितावच्छेदकस्वरूपः किंत्वतिरिक्तो व्याप्यवृत्तिः

अन्यथा मूलावच्छेदेन कपिसंयोगिभेदाभाववमानानुपपत्तेरिति संयोगवद्भिन्नत्वाभावस्यापि निरवच्छिन्नवृत्तिमत्त्वात् वस्तुतस्तु सक
लपदमत्राशेषपरं नत्वनेकपरं एतत्तु घटत्वाभाववान् पटत्वादित्येकव्यक्तिविपक्षके साध्याभावाधिकरण[illegible]स्य यावत्त्वाप्रसिध्या
अव्या[illegible]प्त्यापत्तेः तथा च किंचिदनवच्छिन्ना या निरुक्तसाध्याभावाधिकरणतया व्यापकीभूतो योऽभावः हेतुतावच्छेदकसंबंधा
वच्छिन्नतत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं लक्षणार्थः न च सत्तादिसामान्याभावस्यापि प्रमेयत्वादिना निरुक्तसाध्याभावाधि
करणताव्यापकत्वात् द्रव्यं सत्त्वादित्यादावव्याप्तिः तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ तु निर्धूमत्ववा
न् निर्वह्नित्वादित्यादावव्याप्तिः निर्वह्नित्वाभाववतो वह्निव्यक्तीनां सर्वासामेव चालिनीन्यायेन निर्धूमत्वाभावाधिकरणतावन्निष्ठा
न्योन्याभावप्रतियोगितानवच्छेदकत्वाभावादिति वाच्यं तादृशाधिकरणताव्यापकतावच्छेदकहेतुतावच्छेदकसंबंधावच्छिन्नय
द्धर्मावच्छिन्नाभा वत्त्वं तद्धर्मवत्त्वस्य विवक्षितत्वात् व्यापकतावच्छेदकत्वं तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं न तु तद्वन्निष्ठ
प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वं तद्वृत्तिनिरवच्छिन्नवृत्तिमान् यो अभावः तत्प्रतियोगितानवच्छेदकत्वं वा प्रकृतव्यापकता
यां प्रतियोगिवैयधिकरण्यस्य निरवच्छिन्नत्वस्य वा प्रवेशे प्रयोजनविरहात् तेन [illegible] पृथिवीसंयोगादित्यादौ नातिव्याप्तिः कपिसंयोगाभावत्वस्य
निरुक्तव्यापकतावच्छेदकत्वविरहादित्येव परमार्थः ॥ साध्यवदन्येति ॥ अत्रापि प्रथमलक्षणोक्तरीत्या हेतौ साध्यवदन्यवृत्तिकत्वा
भाव इत्यर्थः तादृशावृत्तित्वाभावश्च तादृशावृत्तित्वसामान्याभावो बोध्यः तेन धूमवान् वह्नेरित्यादौ धूमवदन्यजलह्रदादिवृत्तिकत्वा

२९ भावस्य धूमवदन्यवृत्तिकत्वजलत्वोभयाभावस्य वह्नौ सत्वेपि नातिव्याप्तिः साध्यवदन्यत्वं चान्योन्याभावत्वनिरूपितसाध्यवत्वा
वच्छिन्नप्रतियोगिताकाभाववत्वं तेन वह्निमान् धूमादित्यादौ मत्तद्वह्निमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिः न वा वह्निमत्वाव
च्छिन्नप्रतियोगिताकात्यंताभावस्य स्वावच्छिन्नभिन्नभेदरूपस्याधिकरणे पर्वतादौ धूमस्य वृत्तावपि चाव्याप्तिः तस्य साध्यव
त्वावच्छिन्नप्रतियोगितायाः अत्यंताभावत्वनिरूपितत्वेनान्योन्याभावत्वनिरूपितत्वविरहात् अन्योन्याभावत्वनिरूपितत्वं च
तेन तादात्म्यसंबंधावच्छिन्नत्वमेव साध्यवत्वं च साध्यतावच्छेदकसंबंधेन बोध्यं वह्निमान् धूमदित्यादौ वह्नित्वावच्छिन्नप्रतियोगि म
ताकस्य समवायेन वह्निमतो भेदस्याधिकरणे पर्वतादौ धूमादेर्वृत्तावपि नाव्याप्तिः सर्वमन्यत् प्रथमोक्तरीत्याऽवसेयं यथा
चतुर्थलक्षणाभेदः तथोक्तं तत्रैवेति समासः सर्वाण्येव लक्षणानि केवलान्वयिन्यव्याप्त्या दूषयति केवलान्वयिन्यभा
वादिति पंचानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादि व्याप्यवृत्तिकेवलान्वयिसाध्यके कपिसंयोगाभाववान् सत्वादि
त्याद्यव्याप्यवृत्तिकेवलान्वयिसाध्यकेपि चाभावादित्यर्थः साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताकसाध्याभावस्य साध्यतावच्छेदकसंबंधेन साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य चाप्रसिद्धत्वात् कपि
संयोगाभाववान् सत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वस्याप्रसिद्धत्वात् चेति भावः तृतीयलक्षणस्य केवला १९
न्वयिसाध्यकासत्वं च तद्व्याख्यानावसर एव प्रपंचितं एतच्चोपलक्षणं द्वितीये कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः

अधिकरणभेदेनाभावभेदे मानाभावेन कपिसंयोगवद्भिन्नवृत्तिकपिसंयोगाभावो द्रव्यवृत्तिकपिसंयोगाभावो यितद्वृत्तित्वादे
तद्वृक्षत्वस्य न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववद्वृत्तित्वं वक्तव्यं एवं च वृक्षस्य विशिष्टाधिकरणत्वाभावान्नाव्याप्तिरिति वाच्यं
साध्याभाववपदवैयर्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्वविशिष्टवद्वृत्तित्वस्यैव सम्यक्त्वात् सद्धेतौ हेत्वधिकरणे विशिष्टाधिकरणत्वा
भावादेवासंभवाभावात् तृतीये साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैव घटकत्वेनालिनीत्या येनान्योन्याभावमादाय नानाधि
करणकसाध्यके वह्निमान् धूमादित्यादावव्याप्तिश्चेत्यपि बोध्यं ॥ नापीति ॥ अत्र साध्यस्य सामानाधिकरण्येन साध्याधिकर
ति णावृत्तित्वाभावः द्रव्यं सत्त्वादित्यादावव्याप्त्यापत्तेः द्रव्यत्वाधिकरणवृत्तित्वाभावानधिकरणत्वात् सत्तायाः नापि साध्यवद्भिन्नवृत्तित्वं
[illegible]स्यापत्तेः किं तु साध्याधिकरणत्वाभाववद्वृत्तित्वं तदनधिकरणत्वं च तद्वद्भिन्नत्वं अधिकरणत्वप्रवेशप्रयोजन
माधिकरणत्वाभाववद्वृत्तिभिन्नत्वे हेतोरव्यभिचरितत्वमिति फलितं अव्याप्यवृत्तिसाध्यकसद्धेतौ अव्या
प्त्वप्रवेशः अव्याप्यवृत्तेरधिकरणतानुमाव्याप्यवृत्तिः साध्याधिकरणत्वं च साध्यतावच्छेदकावच्छिन्ननिरूपितं
यं वेधावच्छिन्नं च ग्राह्यं अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ सत्तायाः एव साध्यत्वेन साध्याधिक
रण्याद्येव तद्वृत्तित्वा जातेरतिव्याप्तिः स्यात् स्यात्वसमवायेन वृत्त्यादौ साध्ये संयोगेन धूमादिहेतावतिव्या
प्त्याभाववत् जलहृदाद्येव तद्वृत्तित्वात् धूमादेः इष्टं च साध्यतावच्छेदकसमवायसंबंधावच्छिन्नवृत्त्यधिकर

णत्वाभाववत्पर्वताद्यपि धूमस्य तद्वृत्तित्वान्नातिव्याप्तिः। वृत्तिश्च हेतुतावच्छेदकसंबंधेन बोध्या तेन तादृशावृत्त्यधिकरण
त्वाभाववति धूमावयवे समवायेन धूमस्य वृत्तावपि न क्षतिः। नचैवं सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सत्ताधिकरणत्वाभावव
ति सामान्यादौ हेतुतावच्छेदकसमवायसंबंधेन वृत्तेरप्रसिद्धेरिति वाच्यं तादृशसाध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रति
योगितावच्छेदकत्वमिति विवक्षितत्वात्। साध्याधिकरणत्वाभावसमानाधिकरणोऽप्यसौ धूमवान् वह्नेरित्यादौ धूमाधिकरण
२ त्वाभाववति जलह्रदादौ वह्निमदन्योन्याभावसत्त्वादिति व्याप्तिरिति व्यापकत्वानुधावनं। अन्योन्याभावप्रतियोगितावच्छेदकत्वं हेतु
तावच्छेदकसंबंधावच्छिन्नं हेतुतावच्छेदकावच्छिन्नं च ग्राह्यं अन्यथा वह्निमान् धूमादित्यादौ वह्न्यधिकरणत्वाभाववति धूमावय
वा वे धूमवदन्योन्याभावसत्त्वादव्याप्तिः स्यात्। स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वोदितत्तज्जातिमतोऽन्योन्याभावस्य द्रव्यत्वाधिकर
णत्वाभावव्यापकत्वेनातिव्याप्तिः। अव्याप्यवृत्तिमतोऽन्योन्याभावस्य तु नाव्याप्यवृत्तिरिति पृथिवीसंयोगादित्यादावव्याप्यवृत्तिहे
तुके व्यभिचारिणि नातिव्याप्तिरिति संक्षेपः॥ साध्यवैयधिकरण्येति॥ साध्यवैयधिकरण्यं साध्यवद्भिन्नवृत्तित्वं साध्यवद् न साध्यवद ४ वृत्तित्वं
वृत्तित्वपरत्वे द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। अव्याप्यवृत्तिमतोऽन्योन्याभावस्य तु नाव्याप्यवृत्तिरिति अव्याप्यवृत्तिसा
ध्यकसद्धेतौ नाव्याप्तिः। अनधिकरणत्वमित्यत्राधिकरणत्वांशस्याधिकस्य प्रवेशान्न साध्यवदन्यावृत्तित्वमित्यनेन यथा
श्रुतस्य पौनरुक्त्यं। अखण्डाभाववारकतया चाधिकरणत्वांशस्य न वैयर्थ्यं। साध्यवद्भिन्नत्वं च साध्यतावच्छेदकसंबंधावच्छिन्न

भिन्ने

साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकं बोध्यं तेन वह्निमान् धूमादित्यादौ धूमस्य समवायेन वह्निमतोऽपि किंचि
व त्साध्यव्यक्तिभिन्ने पर्वतादौ वृत्तित्वेपि न क्षतिः । तादृशसाध्यवद्भिन्नत्वं व्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमिति तु समु
दायार्थनिष्कर्षः अन्यथा पूर्ववत् साध्यवद्भिन्नवृत्तिकत्वमित्यत्र वृत्तेर्हेतुतावच्छेदकसंबंधेनैव वाच्यतया जातिमान् द्रव्यत्वा
दित्यादाववप्रसिध्यापत्तेः शेषं पूर्ववत् लक्षणद्वयमेकदेवदूषयति तदुभयमपीति साध्यानधिकरणानधिकरणत्वं सा
ध्यानधिकरणानधिकरणत्वनियतं साध्यानधिकरणावृत्तित्वं व्याप्यमिति यावत् तद्व्यापकीभूतं साध्यानधिकरणावृत्ति
त्वं च तच्च केवलान्वयिसाध्यके अप्रसिद्धमित्यन्वयः । साध्यानधिकरणत्वस्य साध्याधिकरणत्वावच्छिन्नप्रतियोगिताक
भेदवत्त्वस्य तत्राप्रसिद्धेः यदि च साध्यानधिकरणत्वं न तत्सामान्यभेदः । किंतु साध्याधिकरणप्रतियोगिकभेदवत्त्वमा
त्रं तदा वह्निमान् धूमादित्यत्र यत्किंचिद्वह्न्यनधिकरणे पर्वतादौ वर्तमाने धूमेप्यप्रसिद्धमित्यर्थः । अप्यर्थकचकारात् केवला
न्वयिसाध्यसमुच्चयः तथा च व्यापकाभावात् व्याप्यीभूत तदुभयलक्षणमपि तदुभयत्राप्रसिद्धमिति भावः साध्यानधिकर
णानधिकरणत्वमिति यथाश्रुतं तु न संगच्छते यथोक्तलक्षणद्वयस्य तत्स्वरूपत्वाभावादिति ध्येयं भट्टाचार्यैस्तु यायिनस्त
तदुभयमपि तदुभयलक्षणवाक्यमपि साध्यानधिकरणानधिकरणत्वं साध्यानधिकरणानधिकरणत्वबोधजनकं साध्या
धिकरणत्वसामान्याभाव [illegible] वद्वृत्तित्वाभाव साध्यवद्भिन्नवृत्तित्वाभावान्यतरबोधजनकमिति यावत् तच्च तादृशान्य

तरामाववत्वं च तत्र केवलान्वयिसाध्यके अप्रसिद्धमित्यन्वयः॥ साध्याधिकरणत्वसामान्याभावादेरप्रसिद्धत्वादिति भावः
ननु तदुपवाक्यमयि न प्रागुक्ताभावान्यतरबोधकं अपि तु साध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावसाध्यव
त्प्रतियोगिकभेदवद्वृत्तित्वसामान्याभावान्यतरबोधजनकमेव साध्याधिकरणत्वप्रतियोगिकाभावसाध्यवत्प्रतियोगिकभेदौ च
केवलान्वयिनि प्रसिद्धावित्यत आह यत्किंचिदिति शेषं पूर्ववदित्याहुः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववादिनः
अन्यथा स्वात्मस्वीकारिणः सोऽदलसमलमादाय साध्यायंताभाववद्वृत्तित्वमिति प्रथमलक्षणे केवलान्वयिनि अव्याप्तिमु वृ
भ द्धरति अथेति॥ समवायिन येति॥ समवायित्वेन रूपेण वाच्यत्वादिवृत्तिधर्मेणेत्यर्थः॥ आदिना समवेतत्वघटत्वपरत्वादेर्वाच्य
त्वावृत्तिधर्मस्यावस्यपरिग्रहः॥ घट एवाप्रसिद्ध इति॥ एवकारोऽप्यर्थः घटेऽप्यप्रसिद्ध इत्यर्थः॥ अन्यथा तादृशाभावस्य यद्दा
र्थमात्रेऽप्रसिद्धत्वात् नद्देवधारणासंगतेः ननु प्रतियोगिनास्समभावस्य विरोधाद्वाच्यत्ववति घटे कथं तदभाव इत्यत आह व्यधि
करणधर्मावच्छिन्नाभावस्येति॥ स्वाधिकरणावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः॥ स्वपदं प्रतियोगितापरं॥ केव
लान्वयित्वात्॥ सर्वत्र सत्वात्॥ प्रतियोगिमत्यप्रतियोगिमति च सत्वादित्यर्थात्॥ अभावस्य हि प्रतियोगितावच्छेदकावच्छिन्न
प्रतियोगिनैव समं विरोधो न तु प्रतियोगिमात्रेण॥ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकश्चिदप्यस्ति अप्रसिद्धत्वात् तः सर्वत्रै
वतद्वच्छिन्नाभावः नववाच्यत्वमीश्वरेच्छात्र चगुणत्वेच्छात्वादिसमवायित्वभगवदात्मसमवेतत्वयोः सत्वेन समवायित्वेन स

मवेतत्वं च कुतो वाऽव्यत्वनिष्ठप्रतियोगिताव्यधिकरणमिति वाच्यं । वाच्यत्वं नेश्वरेच्छामात्रं किंतु तद्विषयत्वमित्यभ्युपगमादिति भावः । समवा
यितयेत्यस्य घटादिसमवायितयेत्यर्थ इत्यन्ये । यद्यपि समवायित्वादिना व्यधिकरणधर्मेण वाच्यत्वाभावस्याप्रसिद्धत्वं पि तत्तत्साध्या
न्यभावविशिष्टाभावोभयाभावादिकमादायासंभववारणाय साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्यैव लक्षणघटक
त्वात्तादृशाभावस्य च वाच्यत्वादिसाध्यकेऽप्रसिद्धत्वादव्याप्तिर्दुर्वारैव । न च साध्यप्रतियोगिकाभावमात्रस्य लक्षणघटकत्वमिति भ्रमेणेय
माशंकेति वाच्यं । तथा सति विशिष्टाभावोभयाभावादिरूपसमानाधिकरणधर्मावच्छिन्नाभावमादायैव प्रसिद्धिसंभवेन व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकाभावपर्यंतानु[illegible]धावनवैफल्यात् । न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकसाध्याभाव
मात्रं लक्षणघटकमिति भ्रमेणेयमाशंकेति वाच्यं । दंडावच्छिन्नपुरुषाभावस्येव समवायित्वावच्छिन्नवाच्यत्वा[illegible]भावस्यापि विशि
दे ष्टाभावत्वात् समवायसमवायित्वोः वैशिष्ट्यस्यावच्छेदकीभूतधर्मघटकत्वात् तथापि साध्याभावपदेन साध्यतावच्छेदकसंबंधा
वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावो न विवक्षणीयः किंतु साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकाव
च्छिन्नसाध्यसमानाधिकरणत्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववदभावमात्रं विवक्षणीयं तथा तैव तत्तत्साध्य
व्यत्वभावविशिष्टाभावादेर्वारणासंभवात् तादृशोभयाभाववत्त्वस्य तत्र विरहात् संयोगी द्रव्यत्वादित्यादौ द्रव्यत्व गुणास
साध्याभाव मवेतत्वावच्छिन्नप्रतियोगिताको भावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकैश्च तादृशाभावः सुलभः । कपिसंयोगाभाव
समवेत

वान् सत्वात् इदं वाच्यं ज्ञेयत्वादित्यादि केवलान्वयिसाध्यके तु व्यधिकरणधर्मावच्छिन्नाभावस्यैव तथा · नच केवलान्वयिनि व्यधिक
रणधर्मावच्छिन्नाभावमादायैव प्रसिध्यु यथा तेन साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकाभावस्य विवक्षितत्वात् किं तादृशोभयाभाववद्भावविवक्षणेन · केवलान्वयिनि च स्वरूपसंबंधेन वाच्यत्वेन घटाद्यभा
वस्यैव तादृशस्य प्रसिद्धत्वादिति वाच्यं · प्रमेयसाध्यके व्यधिकरणधर्मावच्छिन्नाभावमादायापि साध्यतावच्छेदकसंबंधावच्छि
न्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावप्रसिध्यसंभवात् · नहि प्रमेयत्वं कस्यचित् व्यधिकरणधर्मः "प्रमेयत्वेन घटाभावा
दिरूपसमानाधिकरणधर्मावच्छिन्नाभावे च मानाभावादिति पूर्वपक्षिणां निगूढाभिप्रायः शेषमनुपदं वक्ष्यामः ॥ नचैवमिति ॥ एवं
स्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे · व्यभिचार इति · ज्ञेयत्वस्य वाच्यत्वव्यभिचारित्वमित्यर्थः वाच्यत्वत्वेन व्य
धिकरणधर्मेण स्वरूपसंबंधावच्छिन्नज्ञेयत्वाद्यभावस्य साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता
कस्याधिकरणे घटे ज्ञेयत्वस्य वृत्तेरिति भावः नच प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणतादृशाभाववद्वृत्तित्वमेव व्यभिचारः अन्य
थासंयोगसाध्यकसद्धेतावतिव्याप्तेरिति कथमियमाशंकेति वाच्यं · व्याप्यवृत्तिर्यः साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छि
करण न्नप्रतियोगिताकाभावाधिकरणता तदाश्रयवृत्तित्वं व्यभिचार इत्यभिप्रायेणाशंकां न "व्याप्यवृत्तित्वं निरवच्छिन्नत्वं" साध्यतेति ॥

साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदका[illegible]वच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वमित्यर्थः॥ वाच्यत्वेन व्यधि
करणधर्मेणास्वरूपसंबंधावच्छिन्नज्ञेयत्वाद्यभावस्तु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोपि न साध्याभाव इति भावः॥ तादृशः
साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकः नहीति साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेद
कावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वस्य व्यभिचारत्वे इत्यर्थः तादृशसाध्याभावेति साध्यतावच्छेदकसंबंधावच्छिन्नसाध्य
भा तावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वावच्छिन्नप्रतियोगिताकतादृशसाध्याभाववद्वृत्तित्वाभावरूपव्याप्तिर्न तु
निरुक्तोभयाभाववद्भाववद्वृत्तित्वरूपेत्यर्थः अव्यभिचरितत्वपदार्थस्यैव व्याप्तित्वात् अव्यभिचरितत्वपदार्थस्य च व्यभिचरि
तत्वस्याभावोऽव्यभिचरितत्वमिति व्युत्पत्त्या व्यभिचारसामान्याभावरूपत्वादिति भावः अप्रसिद्धिरिति वाच्यत्वत्वावच्छिन्नप्रतियो
गिताकवाच्यत्वाभावस्याप्रसिद्धत्वादिति भावः नन्वव्यभिचरितत्वं न यौगिकं किंतु निरुक्तोभयाभाववान् योऽभावः तद्वद्वृत्ति
त्वरूपे प्राथमिकलक्षणवाक्यार्थे पारिभाषिकमखंडमेव अथैतस्याव्यभिचरितत्वपदार्थत्वेऽसंभव एव वह्निमान् धूमादित्यादे
वाच्यज्ञेयत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवह्निवाच्यत्वाद्यभाववति पर्वतघटादौ धूमज्ञेयत्वादेर्वृत्तेः न चैत
द्वृत्तित्वस्यापि व्यधिकरणधर्मावच्छिन्नाभावविशिष्टाभावोभयाभावमादायैव सर्वत्र लक्षणसमन्वय इति वाच्यं तथा सति
धूमवान् वह्नेरित्यादावपि तादृशोभयाभाववद्भाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावेन तद्व्यक्तित्वावच्छिन्नाभावविशि

ष्ठाभावो भयाभाववमादायैवलक्षणस्य वृक्षादौ सत्त्वात् व्यभिचारिमात्रेऽतिव्याप्तेरिति चेन्न· तद्वद्वृत्तित्वपदेन तद्वन्निष्ठतत्सजा
तीयव्याप्यवृत्त्यभावप्रतियोगित्वस्य विवक्षितत्वात्. इत्थं च वह्निमान् धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नव्याप्याभाववति पर्वतादौ
तत्सजातीयस्य धूमादेः अधिकरणधर्मावच्छिन्नाभावस्यासत्त्वान्नासम्भवः। धूमवान् वह्नेरित्यादौ च नात्रोभयाभाववदभावो व्य
भिचारनिरूपकतत्तदधिकरणव्यक्तित्ववृत्तित्वावच्छिन्नप्रतियोगिताकतत्तदधिकरणव्यक्तित्ववृ[illegible]त्यभावः तत्तदधिकरणव्यक्तौ
तत्सजातीयस्य वृक्षादेरभावस्यासत्त्वान्नातिव्याप्तिः। साजात्यं च न यथाकथंचिद्रूपेण अव्यावर्तकत्वात्· नापि स्वसमानाधिकर
णधर्मावच्छिन्नप्रतियोगिताकत्वस्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण· अभावभेदेन प्रतियोगिताया विभिन्न
त्वात् साध्याभावनिष्ठसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वादेर्हेत्वभावादावृत्तित्वादसम्भवापत्तेः· किंतु स्वव्यधिकरणध
र्मावच्छिन्नप्रतियोगिताकान्यतमत्वस्वव्यधिकरणधर्मावच्छिन्नप्रतियोगि[illegible]भेदकूटवत्त्वान्यतररूपेण· स्वपदं च प्रतियोगितापरं· ताकाभाव
धूमवान् वह्नेरित्यादौ व्यभिचारनिरूपकतत्तदधिकरणव्यक्तित्ववृत्तिसामान्याभावोऽधिकरणे तत्तदधिकरणव्यक्तौ वर्तत सजातीय
स्य वृक्षादेर्वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावस्य समवायादिसंबंधावच्छिन्ना[illegible]भावस्य सत्त्वादतिव्याप्तितादवस्थ्यमतो व्या
प्यवृत्तित्वमभावे विशेषणं· व्याप्यवृत्तित्वं च हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नसमानाधिकरणत्व व्यधिकरणधर्मा हेतु
वच्छिन्नाभावव्यक्तिभिन्नत्वोभयाभाववत्त्वं तेन नोक्तदोषतादवस्थ्यं· द्रव्यं संयोगादित्यादौ अव्याप्यवृत्तिहेतुके द्रव्यमात्रसमवेताभा

२ इदं वाच्यं ज्ञेयत्वादित्यादौ च घटत्वेन पटाभाव पटत्वेन घटाभावादिकमादाय प्रमेयमात्रस्यैव तादृशाभावप्रतियोगित्वान्नाव्याप्तिः + २

वगुणकर्माद्यवृत्त्यभावादेरनन्तः सर्वत्र विशेषणतानाविशेषेणसाध्यप्रकारकप्रमाविशेष्यत्वसाधनान्यतराभावादेश्च तादृशस्यसकलम
त्वान्नाव्याप्तिः नच विशिष्टाभावादिवारणाय तद्भिन्नत्व सजातीयाभावनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदक
हेतुतावच्छेदकवत्वमेव विवक्ष्यतां किं यथोक्तव्याप्यवृत्तित्वेनाभावविशेषणेन इदं वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिहेतुके वज्ञेयत्वत्वादि
नाघटाद्यभावमादायैव लक्षणसंभवादिति वाच्यं पृथिवी संयोगादित्यादि अव्याप्यवृत्तिहेतुके व्यभिचारिण्यतिव्याप्तेः इदं वाच्यं प्र
मेया दित्या दौ तादृशाभावाप्रसिद्धेश्च द्रव्यं सत्वादित्यादौ व्यभिचारनिरूपकतदधिकरणावृत्तिसामान्याभावस्यापि सजातीयो
अभावः सत्तात्वादिनासत्ताद्यभाव एव तत्प्रतियोगित्वस्य सत्तादौ सत्वात् अतिव्याप्तिस्तादवस्थ्यमतस्तद्भिन्न एवेति नच तथापि धूमवा
न् वह्नेरित्यादौ तादृशोभयाभाववद्भावो धूमत्वादिना धूमाद्यभावः तद्वति जलह्रदादौ तत्र सजातीयस्य वह्न्यभावस्य सत्वात् एवं तादृ
शाभावो द्रव्यत्वत्वादिना धूमाद्यभावः तद्वति यावत्स्वेव तत्सजातीयस्य वह्न्यादेर्व्यधिकरणधर्मावच्छिन्नाभावस्य सत्वाच्चातिव्याप्तिरि
त ति वाच्यं यावत्वेन प्रथमाभावविशेषणात् तथाचतैद्योगोलकादिरूपव्यभिचारस्थलावृत्त्यभावोपि तादृशोभयाभाववत्तया यावदन्त
र्गतः तदधिकरणे तत्र तद्योगोलकादौ तत्सजातीयस्य समानाधिकरणस्य व्याप्यवृत्तेरभावस्य प्रतियोगित्वमव्यभिचरितत्वमिति समु
दितार्थ निष्कर्ष इति न कोपि दोषः इत्यस्वरसादाह प्रतियोग्यवृत्तिश्चेति तदवृत्तिधर्मेण तन्निष्ठप्रतियोगिताया अवच्छेदक इत्यर्थः तथा
च व्यधिकरणधर्मावच्छिन्नाभावस्यैवाप्रसिद्धत्वात् यथोक्तमव्यभिचरितत्वमप्यप्रसिद्धमिति भावः॥ अन्ये वस्तुतः केवलान्वयिनि साध्या
वृत्त्यादेरभावस्यासत्वात् नातिव्याप्तिः इत्थं च यावन्नादृशोभयाभाववन्तो भावाः प्रत्येकं तत्तद्व्यक्तीनां सजातीयस्य ३
न्तः

माथुरी ५ व्यधिकरणधर्मावच्छिन्नस्य वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नस्य च साध्याभावस्याधिकरणे हेतोर्वृत्तेरिति भावः किंच वैशिष्ट्यव्यासज्यवृत्ति धर्मावच्छिन्नसाध्याभावमादाय केवलान्वयिनि साध्याभा [illegible]

२४

२५ भावस्याप्रसिद्ध्या व्याप्तिरसिद्धिर्नेति भ्रमेण यथा कथंचिद्रूपेण साध्याभावस्य प्रसिद्धिं दर्शयति अथेति · समवायितयेति · समवायि
त्वादिरूपेणावाच्यत्वावृत्तिधर्मेणेत्यर्थः · आदिपदात् समवेतत्वघटत्वपटत्वादेर्वाच्यत्वावृत्तिधर्ममात्रस्य परिग्रहः · इदमुपलक्षणं वै
शिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नवाच्यत्वाभावोपि द्रष्टव्यः · भ्रमं निराकुर्वन् दूषयति तर्हीति · साध्यतावच्छेदकावच्छिन्नप्रतियोगिता
कसाध्याभाववद्वृत्तित्वं यदि व्यभिचारः तदेत्यर्थः · तादृशसाध्याभावेति · साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावव
द्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकतादृशावृत्तित्वाभाव एव व्याप्तिः [redacted] ननु साध्याभाववद्वृत्तित्वप्रतियोगि
ताकाभावमात्रमित्यर्थः · साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारत्वे सद्धेतावतिव्याप्तिः · व साध्याभाववद्वृत्तित्वप्रतियोगिताका
भावमात्रस्य व्याप्तित्वेपि व्यभि[illegible]त्यतिव्याप्त्यापत्तेस्तौल्यात् · साध्याभाववद्वृत्तित्वसामान्याभावस्य व्याप्तित्वे चासंभवात् · व्य
धिकरणधर्मावच्छिन्नसाध्याभावमादाय केवलान्वयिनि साध्याभावप्रसिद्धि[redacted]
ध्यभिधानमत्यन्तमसंगतमेव तस्यैवासिद्धत्वादि[illegible]त्यभिप्रायेण दूषणान्तरमाह प्रतियोग्यवृत्तिश्चेति · सैमन्यतन् यूर्वववदित्याहः तद वं
वृत्तिधर्मस्य तन्निष्ठप्रतियोगितावच्छेदकत्वे मानाभावे हेतुमाह तद्वैशिष्ट्येति · अप्रसिद्धेरित्यंतमेको ग्रंथः तद्वैशिष्ट्यज्ञानस्य · प्रतियो २५
गिनि प्रतियोगितावच्छेदकप्रकारकज्ञानस्य · अभावधीहेतुत्वात् · अभावलौकिकप्रत्यक्षहेतुत्वात् · गविशृंगं नास्तीति प्रतीते

स श्रीयत्वं बाधा द्वेवशाशाश्रृंगं नास्तीति प्रत्यक्षस्य शृंगे शाशीयत्वप्रकारकस्यासंभवइति वाच्यं बाधात्तात् [illegible] नैनिशशीयत्वेन ५

रसिद्धेरिति योजना · ननु न येपि शाशीयत्वे गोवृत्तिशृंगाभावप्रतियोगितावच्छेदकत्वप्रकारकप्रत्यक्षासिद्धेरित्यर्थः शृंगे शाशीयत्वस्य बा
धितत्वेन शाशीयत्वप्रकारकशृंगज्ञानासंभवात् अन्यथाख्यात्यापत्तेरिति भावः नन्वभावलौकिकप्रत्यक्षे प्रतिप्रतियोगितावच्छेदकप्रका
रकप्रतियो [illegible] गिज्ञानत्वेन न हेतुता किं तु प्रतियोगितावच्छेदकप्रतियोगि [illegible] नो सौ नविरहः शशयोनेत्याकारकाभावप्र
त्यक्षवारणाय प्रतियोगितावच्छेदकप्रतियो [illegible] पुभयविषयकज्ञानत्वेनैव हेतुत्वं लाघवात् · तच्च प्रकृतेप्यस्ति शाशीयत्वशृंगयोः
स्वंतन्त्रः समूहालंबनसंभवात् · न च तथापि शशं गेशांशप्रत्यक्षस्यासंभवेपि शाशीयत्वेन शृंगं नास्तीत्याकारकप्रत्यक्षस्वावच्छिन्न
प्रकार [illegible] दृशप्रत्यया भ्युपगमे अभावप्रत्ययो हि विशिष्टवैशिष्ट्यमर्यादां नातिशेत इति सिद्धांत
व्याघातः अभावप्रत्ययः अभावलौकिकसाक्षात्कारः विशिष्टवैशिष्ट्यमर्यादां · अभावे प्रतियोगितावच्छेदकविशिष्टप्रतियोगि
नः प्रतियोगितारव्यवैशिष्ट्यविषयतां नातिशेते · न जहातीति तदर्थात् इति वाच्य · तत्र विशिष्टवैशिष्ट्यमर्यादामित्यस्य प्रतियोगि
[illegible] यत्किंचिद्धर्मविशिष्टस्य वैशिष्ट्यावि [illegible] षयमामित्यर्थाद्दित्यत आह अन्यथेति · यदि प्रतियोगितावच्छेदकप्रतियोगिनोर्ज्ञानमे
वाभावप्रत्यक्षे हेतुर्न तु तत्प्रकारकप्रतियोगिज्ञानं तदेत्यर्थः निर्विकल्पकादपीति · घटघटत्वनिर्विकल्पकेनैतरमित्यर्थः मा
त्रपदाद्धर्मांतरप्रकारकज्ञानव्यवच्छेदः घटो नास्तीति · विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य विशिष्टवैशिष्ट्यधीहेतु
तया विशिष्टवैशिष्ट्यावगाहकस्य घटो नास्तीति प्रत्यक्षस्य तदानीमसंभवेपि केवले विशेषणमितिन्यायेन घटो नास्तीति प्रत्य

६ + तियोगिताकत्वसंबंधेनाभावस्यात्रैव शाशीयत्वप्रकारकेबाधकाभावात्तत्र शृंगे शाशीयत्वस्याप्रकारत्वात् · ननु तता

तान्हा

माना

ष्यविशे०

क्षस्यापत्तेरित्यर्थः । न स्वभावप्रत्ययोर्हीति सिद्धान्तस्त्विति मिथ्यासामग्रीकार्यं नाशंयेत् प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य
हेतुत्वे तु तदभावादेव तदानीं न तादृशप्रत्ययः । न सत्त्वे तु विशिष्टधीसामग्रीसत्त्वात् अर्थसमाजसिद्धमेव विशिष्टवैशिष्ट्यबोधात्मकत्वं
न वैतदतिप्रसंगवारणाय प्रतियोगितावच्छेदकप्रकारक[illegible]ज्ञानत्वेनैव हेतुत्वमस्तु लाघवात् किं प्रतियोगिविशेष्यकत्वप्र
वेशेन तादृशं च ज्ञानं प्रकृतेऽपि संभव[illegible]ति शशीयत्वप्रकारेण लोमादावेव ज्ञानसत्त्वात् पूर्वपक्षिणोऽन्यथाख्यात्यस्वीकारेण
रजतत्वप्रकारेण शुक्तिज्ञानाद्रजताभावप्रत्यक्षापातात् तस्यासंभवादिति वाच्यं । तथापि शशीयत्वेन शृङ्गं नास्तीति प्रत्यक्षासंभवा
त् । अभावस्य साक्षात्कारो हि प्रतियोगिनि तद्धर्मवैशिष्ट्यमवगाहमान एव तद्धर्मस्यावच्छेदकत्वमवगाहते । नान्यथेति नियमात् । अ
न्यथाख्यात्यनभ्युपगमेन शृङ्गे शशीयत्ववैशिष्ट्यावगाहनस्य चासंभवादिति भावः । इदमापाततः न्यायनये शृङ्गे शशीयत्वस्य बाधि
तत्वेऽपि बाधप्रतिसंधानदशायां शृङ्गे शशीयत्वप्रकारकज्ञानस्य भ्रमरूपस्यैव संभवेन शशशृङ्गं नास्तीत्याकारक[illegible]प्रत्यक्षे बा
धकाभावात् । बाधप्रतिसंधानदशायां शशीयत्वांशे निर्धर्मितावच्छेदकादेकं न द्वयमिति न्यायेन शशीयत्वशृङ्गत्व[illegible]उभयप्रकारकज्ञा क
क नात् शशीयत्वांशे निर्धर्मितावच्छेदकस्य एकं न द्वयमिति न्यायेन शशीयत्वशृङ्गत्वोभयविशिष्टवैशिष्ट्यबोधात्मकस्य शशशृङ्गं नास्ती
ति प्रत्यक्षस्य संभवाच्च । न हि प्रतियोगितावच्छेदकप्रकारकप्रतियोगिप्रमात्वेन हेतुत्वं । गौरवात् । किं तु तादृशनिश्चयत्वेन । एतेन

शृंगेनशशीयत्वमितिबाधनिश्चयेपिशशशृंगंनास्तीतिप्रतीतेरनुभवसिद्धतयाशशीयत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियो
गिताकाभावेशशीयत्वावच्छिन्नप्रतियोगिताक[illegible]विषयत्वमानाभावः प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानाभावे
४ शृंगाभावत्व नतत्ज्ञानस्यासंभवात्· किंतुगोवृत्तिशृंगेशशीयत्वाभावएवतद्विषयः नचबाधप्रतिसंधानदशायांतथाविषयत्वेपितदप्र
तिसंधानदशायांशशीयत्वावच्छिन्नप्रतियोगियोगिताक[illegible]यथोक्तरूपेणाविषयइतिवाच्यं· प्रतीतेःसमानाका
रत्वेपिपुरुषावस्थावैचित्र्येणविषयवैचित्र्यस्यकाप्यदर्शनात्· नचतथापिप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य
स्वातंत्र्येणाभावधीहेतुत्वानंगीकर्तॄणांनव्यानांनयेशृंगेनशशीयत्वमितिबाधप्रतिसंधानदशायामपिशशीयत्वेनशृं
गंनास्तीतिप्रत्यक्षसंभवात्तदेवव्यधिकरणधर्मावच्छिन्नाभावेमाने· तत्रस्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनशशीय
त्वस्यप्रतियोगितासंसर्गेणशृंगत्वविशिष्टस्यचाभावेप्रकारतयाबाधबुद्धेरप्रतिबंधकत्वादितिवाच्यं· अभावलौकिक
साक्षात्का[illegible]रेहियद्धर्मविशिष्टस्यप्रतियोगिनोऽभावेप्रतियोगितास्यवैशिष्ट्यमवगाहमानएवतद्धर्मस्यप्रतियोगि
ह तावच्छेदकत्वमवगाहतेनतुतदनवगाह्यइतिनियमेनतादृशप्रती[illegible]ते[illegible]रसंभवात्· अन्यथाघटत्वेनकंबुग्रीवादिमा
न्नास्तिघटत्वेननास्तीत्याद्यपिप्रत्यक्षंस्यात्· नचेष्टापत्तिः घटोनास्तिघटत्वेनघटोनास्तीत्यादिप्रत्यक्षस्यैवसर्वसिद्धत्वा

द्रितिकस्यचिन्मलयितमपास्तं· श्रृंगेनशशीयत्वमितिबाधप्रतिसंधानदशायामपिशशश्रृंगंनास्तीतिप्रतीतेरेकत्वबुद्धय
मितिन्यायेनशशीयत्वावच्छिन्नप्रतियोगिताकश्रृंगाभावविषयकत्वसंभवात्· घटत्वेनकंबुग्रीवादिमान्नास्तीतिप्रत्ययस्या
भावस्यविवादग्रस्ततयायथोक्तनियमस्यापिविवादग्रस्तत्वाच्च· वस्तुतस्तुगविशशश्रृंगंनास्तिशशीयत्वेनश्रृंगंना
न स्तीत्यादिप्रतीतौमानाभावएव· प्रमाणसत्वेपिशशीयत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावेश्रृंगस्यत्वावच्छिन्नप्रति
योगिताकत्वसंबंधेनश्रृंगाभावेशशीयत्वस्यच भ्रमएव अतिरिक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाना
मुपगमेतत्प्रत्यक्षंप्रत्यनंततत्तत्प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्यप्राचीननयेहेतुत्वकल्पनेतिरिक्ताभा
वतत्प्रतियोगित्वतदवच्छेदकत्वादिकल्पनेगौरवात्· नचतादृशप्रतीतौतत्तदंशेप्रमात्वमपिसर्वानुभवसिद्धमि
तिवाच्यं· असिद्धेः अन्यथाशुक्तौरजतज्ञानेपिप्रमात्वानुभवस्यसुवचतयाशुक्तेपिरजतत्वापत्तेरित्येवतत्वं·॥छ॥ र
प्राचस्तु प्रतियोगितावच्छेदकसंबंधेनप्रतियोग्याहार्यारोपः संसर्गाभावबुद्धौकारणं· अन्यथाहृदादौसंयोगादिय
त्किंचित्संबंधावच्छिन्नवह्न्यादिसामान्याभावग्रहदशायांसमवायस्वरूपसंबंधांतरावच्छिन्नतदभावानांसर्वेषामेवनिय वें
तग्रहापत्तेः आरोपस्यहेतुत्वेतत्तत्संबंधेनप्रतियोग्यारो पविलंबादेवविलंबसंभवात्· एवंचगविश्रृंगस्याबाधितत्वे २७

वादिमत्त्वस्यावच्छिन्नत्वस्य कंबुग्रीवादिमद्व्यक्तिनिष्ठप्रतियोगित्वस्य च खंडशः प्रसिद्धत्वात्. परस्परं विशेषणविशेष्यभावेनैतन्निरूपितसं
सर्गकस्य संसर्गांशे भ्रमात्मकस्यैव कंबुग्रीवादिमद्व्यक्तिप्रकारकाभावविशेष्यकान्वयबोधस्य संभवात् शशशृंगवत्पीतशंखवदित्या
दिविशिष्टबुद्धिप्रतिप्रतिबंधकमपि परस्परविशेषणविशेष्यभावेन तादृशचतुष्टयसंसर्गकाभावे शशीयत्वपीतत्वाद्यवच्छिन्नशृंगशंखा
दिप्रकारको निश्चय एवेति तत्त्वं. केचित्तु अन्वयितावच्छेदकमवच्छिन्नत्वं स्वनिष्ठप्रतियोगित्वं चेति त्रयं खंडशः संसर्गः संबंधता च व्यास
ज्यवृत्तिरित्येव व्युत्पत्तिरिति न काप्यनुपपत्तिरित्याहुः केषांचिल्लक्षणमाशंकते अथेति. ननु किमिहासामानाधिकरण्यं तदधिकर
णावृत्तित्वाभावः तदनधिकरणावृत्तित्वं वा. आद्ये व्यभिचारिण्यतिव्याप्तिः साध्यसमानाधिकरणत्वे सतीत्यस्यैव सम्यक्त्वेनाभा
वद्वयघटनायोगोरेवं साधिकरणत्वे सतीत्यस्य वैयर्थ्यं च. द्वितीये समवायेनाकाशादिहेतुके वह्निमानाकाशादित्यादौ अतिव्याप्ति
स वारणाय हेतुतावच्छेदकसंबंधेन संबंधित्वार्थकस्य साधिकरणपदस्यार्थकत्वेपि केवलान्वयिन्यव्याप्तिः केवलान्वयिनि साध्या
भेवं सामानाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति मूलविरोधश्च. साध्यासामानाधिकरण्येत्यत्र साध्यस्यासामानाधिकर
ण्यं येषु तानि साध्यासामानाधिकरणानीति बहुव्रीहिः तेषामनधिकरणत्वं तदभाववत्त्वं तस्मिन्सति साधिकरणत्वं तदवच्छिन्नाधि
करणतात्मकत्वं. सतिसप्तम्या अवच्छेदकत्वबोधनात्. अवच्छेदकत्वं चान्यूनवृत्तित्वं. तथा च साध्यवदवृत्तिपदार्थाभाववत्त्वं यदधिक

रणतायाः अन्यूनवृत्तित्वमित्यर्थः यत्वदं हेतुपरं · अन्यूनवृत्तित्वं व्यापकत्वं · तच्च तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छे-
भावं दकत्वं · अभावश्च साध्यवदवृत्तित्वावच्छिन्नप्रतियोगिताको बोध्यः तेन वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावेन लौहित्यलक्षणता दृशा ला
वा तत्तत्पदार्थविशेषणत्वादायनातिव्याप्तिः हेत्वधिकरणता हेतुतावच्छेदकसंबंधेन बोध्या · तेन धूमावयवे ह्रिमादायं नाव्याप्तिः नच क
यस्यान्यूनवृत्तित्वमित्येवास्तु किमधिकरणताप्रवेशेनेति वाच्यं · यथासंख्ये विशेषे यच्छ्याभावात् · नचैवं द्रव्यं सत्त्वादित्यादावतिव्याप्तिः वृत्ति नि
मन्मात्रस्यैव कालिकदैशिकविशेषणताभ्यां साध्यवन्महाकाले च वृत्तित्वेन वृत्तिगगनादिरेव तदवृत्तिः तदभावस्य सत्ताधिकर- महादि
णता व्यापकत्वात् · यद्विचावृत्तेरपि कालिकादिनावृत्तित्वं भेदात् द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः द्रव्यत्ववदवृत्तेरप्रसिद्धेरिति वाच्यं · विशे-
षणताविशेषेण साध्यवदवृत्तीनो विशेषणताविशेषेणाभावस्य विवक्षितत्वात् · एवंचानुगतमपीति दिक् · ननु केवलान्वयिनि
साध्यवदवृत्तित्वं कुत्र प्रसिद्धमित्यत आह केवलान्वयिनीति · यथाश्रुतं यथासंभवं विकल्प्य दूषयति साध्यासामानाधिकरण्यं
हीति · साध्यानधिकरणाधिकरणत्वं साध्यानधिकरणावृत्तित्वं · साध्याधिकरणानधिकरणत्वं साध्याधिकरणावृत्तित्वाभावः
केवलान्वयिनीति · आद्ये द्वित्यर्थः साध्यानधिकरणस्याप्रसिद्धेरित्यर्थः द्वितीये त्वाह यत्किंचिदिति · साध्याधिकरणविशेषणा वृत्तेस्त्व
मतत् · अनधिकरणे · वृत्तित्वाभाववतीति · साध्याधिकरणावृत्तित्वसामान्याभाववत्त्वे च द्रव्यं सत्त्वादित्यादावतिव्याप्तिरिति भावः ॥
प्रकारांतरेणाव्यभिचरितत्वमाशंक्य निषेधति नापीति · स्वसाधने · एवंच केवलान्वयिनि नाव्याप्तिः ज्ञेयत्वादिसमानाधिकरणघटाभावादि-

नारोपाभावाच्छशीयत्वेन शृंगाभावप्रत्ययस्तु कथं स्यात् येन तत्प्रमाणं भवेदित्याहुः तदसत् आरोपस्य हेतुत्वे मानाभावा
तिप्रती त्. नहि ह्रदे वह्निमा [illegible] रो वह्निर्नास्तीति भवः ह्रदादौ संयोगादियत्किंचित्संबंधेन वह्न्यादिसामान्याभावग्रहदशा
यां नियतं समवायस्वरूपसंबंधावच्छिन्नाभावग्रहस्य सत्यसंसर्गाग्रहेतुत्वात् सर्वत्रैव वह्निर्नास्तीत्येवा [illegible] त्.
समवायेन वह्निर्नास्तीत्याकारकस्य च समवायत्वादिना [illegible] समवायाद्युपस्थितिविलंबेनैव विलंबसंभवात्. अन्यथा प्रतियोग्यारोपा
भावधीमात्रे हेतुरभावभ्रमे व्यभिचारात्. नापि तत्प्रमायां. पाकरक्ते घटे श्यामाभावप्रत्ययात्. तत्र च श्यामारोपासंभवात्. प्रमाप्र
मासाधारण आहार्यज्ञानमात्रस्यैव हेतुत्वे च प्रकृतेपि संभवात्. गौरवाच्च. किंच प्रतियोग्यारोपस्य कारणत्वे हि गुणादौ गुणत्वान्य
त्वविशिष्टसत्ताद्यभावप्रत्ययो न स्यात्. तत्प्रतियोगिनः सत्त्वादेरारोपाभावात्. किंतु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकप्र
तियोग्यभाववति प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानं [illegible] प्रतियोग्यारोपः स एव कारणं तच्च प्रकृतेप्यस्त्येत
मेव. शशीयत्वावच्छिन्नशृंगाभाववति गवि शशीयत्वप्रकारकशृंगप्रतीतेः संभवात्. अपि चैवमपि गवि शशशृंगं नास्तीति प्रत्ययो
पि मास्तु अश्वे शशशृंगं नास्तीति प्रतीतौ तु न कोपि विरोधः तत्र शृंगारोपस्यापि संभवात्. तस्यैव व्यधिकरणधर्मावच्छिन्नाभावे प्रमा
णत्वस्य सुवचत्वादिति कृतं पल्लवितेन. ननु व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकतायाऽनुपगमे शशशृंगं नास्तीत्यादौ कीदृ

शाबोधः शशीयत्वशृंगत्वोभयावच्छिन्नप्रतियोगिताकत्वस्याप्रसिध्या तेन संबंधेनाभावे शशीयत्वावच्छिन्नशृंगप्रकारकान्वयबोधस्य
शशीयत्वांशे भ्रमात्मकस्याप्रसिद्धत्वात्. न च प्रतियोगिमात्रसंबंधेन अभावे शशीयत्वावच्छिन्नशृंगस्यान्वयः तादृशव्यवहारस्य सा
र्वत्रिकत्वेनातिप्रसंगविरहादिति वाच्यं. नञर्थे अभावेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनैव प्रतियोगिनोऽन्वयस्य
व्युत्पन्नत्वा दित्यत आह। शशेति. इति चेति. इत्यस्य चेत्यर्थः गवि शशशृंगे नास्तीत्यादौ च गोवृत्तिशृंगे शशीयत्वाभाववत् शशीय
त्वे गोवृत्तिशृंगवृत्तित्वाभाववदित्याद्यर्थ इति भावः इदमापाततः शशशृंगं नास्तीत्यादि वाक्यस्य श्रवणानंतरं शशः शृंगवान् शृं
गाभावो न शशावृत्तिरित्यादिभ्रमानुपपत्तेः एतेन शृंगे शशीयत्वाभाववदित्यपि नार्थः तादृशवाक्यश्रवणानंतरं शृंगे शशीयमि
भ्रमानुपपत्तेः वस्तुतस्तु नञर्थे अभावे प्रतियोगिनो अन्वये अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं विशिष्टधर्मः संसर्ग इ
ति न व्युत्पत्तिः किंतु परस्परविशेषणविशेष्यभावेनान्वयितावच्छेदकमवच्छिन्नत्वं स्वनिष्ठप्रतियोगिता चेति त्रयं संसर्ग इत्येव व्यु
त्पत्तिः तथा च प्रकृते शशीयत्वस्य शृंगत्वस्यावच्छिन्नत्वस्य च शृंगनिष्ठप्रतियोगित्वस्य च खंडशः प्रसिद्धिसत्वात्. परस्परविशेषण
विशेष्यभावेनैतच्चतुष्टयसंसर्गकः संसर्गांशे भ्रमात्मकोऽभावे शशीयत्वावच्छिन्नशृंगप्रकारकोऽन्वयबोधः एवं पीतः शंखो
नास्तीत्यादावपि. अत एव गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वनयेऽपि कंबुग्रीवादिमान्नास्तीत्यादौ नान्वयबोधानुपपत्तिः कंबुग्री

प्रतियोगित्वाभावस्य वाच्यत्वाद्दोसत्वादिति भावः पर्वतीयवह्निरिति· एवमपर्वतीयवह्नेः पर्वतीयधूमसमानाधिकरणाभावप्रतियो
गित्वात् सर्वत्रापि वह्नेर्नतादृशाभावाप्रतियोगित्वमित्यर्थः नन्वप्रतियोगिपदेन प्रतियोगितानवच्छेदकं साध्यतावच्छेदकावच्छिन्नत्वं व
क्तव्यमित्यस्य रसादाहृद्व्यत्वादेरिति· अव्याप्यवृत्तीति· संयोगादीत्यर्थः प्रतियोगिविरोधित्वमिति· प्रतियोग्यधिकरणावृत्तित्वमित्य
र्थः प्रतियोग्यनधिकरणावृत्तीत्युक्तौ उक्ताव्याप्तितादवस्थ्यात्· अग्रे संयोगीसत्त्वादित्यत्राति व्याप्यभिधानासंगतिश्च· व्याप्येति· स्व
यः समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको एकव्यक्तिमात्रवृत्तिधर्मः तद्वत्त्वं व्याप्यवृत्तित्वं· प्रमेयत्वादिकमादाय संयोगाभावा
वा देरपि व्याप्यवृत्तित्ववारणाय एकव्यक्तिमात्रवृत्तितीति· कालिकविशेषणत्वदैशिकविशेषणताविशेषातिरिक्तसंबंधेनावच्छिन्नवृ
त्तिको यस्तदन्यत्वं व्याप्यवृत्तित्वं· व्यतिरेकिधर्ममात्रस्यैव कालेदिगुपाधौवाव्याप्यवृत्तितयाऽवच्छिन्नवृत्तिकत्वान्नतीयांतं वृत्तिविशेषणं·
न त्व व्याप्यवृत्तेर्वृत्तिश्च न किंचिदवच्छिन्ना नावच्छिन्नवृत्तिमत्त्वं व्याप्यवृत्तित्वं· उक्ताव्याप्तितादवस्थ्यात्· अग्रे संयोगीसत्त्वादित्यत्र अतिव्याप्य
भिधानासंगतेश्च· संयोगाभावस्यापि गुणादौ निरवच्छिन्नवृत्तिमत्त्वात्· केचित्तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्याप्यवृत्ति
त्वं· प्रतियोगिता च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन विशेषणीया· तेन नाप्रसिद्धिरित्याहुः अनेकान्तिकत्वेति· व्यभिचरितत्वे
त्यर्थः सत्तासमानाधिकरणासंयोगादेरभावः प्रतियोग्यसमानाधिकरणो व्याप्यवृत्तिश्च न भवत्येव द्रव्ये तस्य संयोगसमानाधिकरणा
त्वात्· किंतु घटत्वादेरभाव एव तादृशः तत्प्रतियोगित्वात्संयोगस्येति भावः ननु सत्ताधिकरणगुणादिनिष्ठसंयोगाभावोऽपि द्रव्यवृत्तिसं

माथुरी

२०

किं च तत्रैत्साध्यत्वादिप्रत्ययेन सम्बन्धविशिष्टसाध्यसमानाधिकरणान्योन्याभावाप्रतियोगिसाध्यवत्कत्वमित्यत्र बहुव्रीह्यन्तरक-
कारेण मतुप्प्रत्ययादिसमर्थितेन च व्याप्यत्वरूपसंबंधाप्रयुक्तः साध्यव्याप्यत्वरूपसंबंधाश्रयो वा समर्पितः किंतु तद्वाक्यस्य षष्ठ्या बहुव्री-
ह्यन्तरककारस्मारितमतुब्वा च्यर्थत्वनियमात् अत्र प्रथमतदेकदेशव्याप्यत्वे निरूपितत्वसंबंधेन साध्यवत्तान्वयः द्वितीयतदेकदे-
योगाभावातिरिक्तः स च प्रतियोग्यसमानाधिकरणो व्याप्यवृत्तिश्च तत्प्रतियोगित्वात्संयोगस्य नातिव्याप्तिरित्यत आह नाहीति अधि-
करणेति गौरवात् मानाभावाच्चेति भावः स्वाधिकरणे निरवच्छिन्नवृत्तिमत्त्वं यदि स्वसमानाधिकरणत्वमुच्यते तदा तु न कोपि दो-
षस्तद्वयवधेयं तदन्योन्याभावस्य कपिसंयोगवदन्योन्याभावस्य तत्र वृक्षे तथा च कपिसंयोगी एतद्वृक्षत्वादित्यादाव‍तिः व्याप्तिरिति
भावः भेदाभेदाविति भेदसहितो अभेद इत्यर्थः मध्यमपदलोपिसमासः साहित्यं सामानाधिकरण्यं यद्वा न चैव मित्यनन्तरं वृक्ष-
इति शेषः भेदाभेदाविति अभेदौ वत्रस्त इत्यर्थः अरकौमलत्वर्थ इत्यनेन प्रत्ययः यथा वैजयंती अस्मिन्निति वैजयंती विष्णुः वैजयंती
वनमाला तथा च वृक्षो भेदाभेदवानित्यर्थः न सत्वेति तयोरेकत्र सत्त्वेत्यर्थः ननु षष्ठ्यर्थो न व्याप्यव्यापकभावः साध्यवत्त्सहम-
त्वदर्थे साधने व्याप्यव्यापकभावसंबंधस्य बाधितत्वात् किंतु अधिकरणत्वमेव न च षष्ठ्यर्थस्य साध्येन वान्वय इति न बाध इति वा
निराकांक्षत्वात् अस्तु वा आकांक्षा भवतु च साध्येन वान्वयः तथापि प्रकृते सामानाधिकरण्यमेव षष्ठ्यर्थो विवक्षितो न तु व्याप्य-
व्यापकभावः इत्यस्वरसादाह साध्यसाधनयोरिति भावप्रधानो निर्देशः साध्यत्वसाधनत्वयोरित्यर्थः व्याप्तिनिरूप्यत्वादिति
व्याप्तिज्ञानाधीनज्ञानविषयत्वादित्यर्थः साध्यत्वं हि व्याप्तिप्रतियोगित्वं साधनत्वं व्याप्त्यनुयोगित्वं तथा चात्माश्रय इति भावः॥
ननु साध्यत्वं साधनत्वं न प्रवेशनीयं धूमत्वं वह्नित्वादिनैव विशिष्य व्याप्तिर्निर्वक्तव्या अत आह दूषणान्तरमाह वह्निमत्पर्वतस्येति
ननु यत्समानाधिकरणान्योन्याभावप्रतियोगितासामान्यं यद्धर्मावच्छिन्ने पर्याप्तं वह्नित्वेनैकेन भवति न द्विधर्मावच्छिन्नेन स-

तथा चैतादृशाभावाप्रतियोगिसाध्यवन्निरूपितव्याप्यत्वाश्रयत्वं तादृशसाध्यवन्निष्ठसाध्यव्याप्यत्वं वा लक्षणवाक्यार्थः स च ... प्रकृ-
व्याप्यत्वस्य ज्ञानादित्याह साधनेति षष्ठ्यर्थस्य च विग्रहवाक्यीयाया षष्ठीतदर्थस्य व्याप्यत्वस्य ज्ञानादित्यर्थः तथा च तदज्ञाने तद्... प्रत्येव
प्रकृतलक्षणघटकस्य ककारस्मारितमतुब्वा च्यर्थत्वनियमेन प्रकृतलक्षणवाक्यार्थस्यापि ... मित्यमिति भावः

... संबंधे न साध्यसाधनत्वान्वयः

हेतस्य सामानाधिकरण्यमित्येवमस्यार्थः एवं च धूमसमानाधिकरणान्योन्याभावप्रतियोगितानवह्नित्वावच्छिन्नावच्छेद्या· अतो ना
व्याप्तिरित्यत आह वह्नि[illegible]विशेषाभावेति· अभावव्यवहारेति· ह्रदो वह्निसामान्याभाववानित्यादि वह्नित्वावच्छिन्न[illegible]
प्रतियोगिताकाभावप्रकारकप्रतीत्युपपत्तेरित्यर्थः सामान्याभावइति· विशेषाभावातिरिक्तस्य सामान्यधर्मावच्छिन्नप्रतियो
गिताकत्वमानाभावादित्यर्थः किंतु विशेषाभावस्यैव वह्नित्वादिसामान्यधर्मः प्रतियोगितावच्छेदकः तथा च धूमसमानाधिकरणानां प्र
त्येकं तत्तद्वह्निमदन्योन्याभावानामेव प्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निरित्यव्याप्तिस्तदवस्थैव· न चैवं धूमवान्वह्निसामान्याभाव
वानित्यादिप्रत्ययस्यापि प्रमात्वापत्तिः वह्नित्वावच्छिन्नप्रतियोगिताकस्य तत्तद्वह्न्यभावस्य धूमवति सत्वादिति वाच्यं· वह्नित्वादिसामान्यध
र्मावच्छिन्नप्रतियोगिताकत्वं तादृशप्रतियोगिताकत्वसंबंधेन वह्नित्वावच्छिन्नत्वं वा व्यासज्यवृत्ति तच्च विशेषाभावकूट एव पर्याप्
[illegible] न तु प्रत्येकाभाव इति· द्रव्यं द्रव्यत्वगुणत्वोभयवदिति प्रत्ययवत्प्रतीतेरप्रमात्वादिति हृदयं· साधनेति· साधनसमानाधि
करणा यावन्तो धर्माः तेषां वैयधिकरण्यस्यानधिकरणं यत्साध्यं तत्सामानाधिकरण्यमित्यर्थः। अत्र साधनवैयधिकर
णानधिकरणेत्युक्तौ द्रव्यं सत्वादित्यादावतिव्याप्तिरित्यतः साधनसमानाधिकरणा यावन्तो धर्माः तेषामित्यादिः धूमवा
न्वह्नेरित्यादावपि धूमादेर्वह्न्यादिसमानाधिकरणद्रव्यत्वादिवैयधिकरण्यानधिकरणत्वादतिव्याप्तिरतो यावदिति· वै
यधिकरण्यं च तदनधिकरणवृत्तित्वं· न तु तदधिकरणावृत्तित्वं· मेयत्वादेर्वैयधिकरण्याप्रसिद्धेरित्युत्तरग्रंथासंगतेः॥

द्विरूपसामा
न्यधर्म

नचसाधनसमानाधिकरणयावद्धर्माधिकरणाप्रसिध्या तदनधिकरणमप्यप्रसिद्धमिति वाच्यं· प्रत्येकनिरूपितवैयधिकरण्य
स्योक्तत्वात्· नन्वेवं वह्निमान् धूमादित्यादौ वह्नेर्धूमसमानाधिकरणमहानसत्वाद्यनधिकरणायःपिंडादिवृत्तित्वाधिकरणत
या [illegible] व्याप्तिः नचवैयधिकरण्यपदेन तदनधिकरणमात्रवृत्तित्वमुक्तमिति वाच्यं· रूपवान् पृथिवीत्वादित्यादावव्याप्तिः [redacted]· घटीयरूपस्य पृथिवीत्वसमानाधिकरण
यावदन्तर्गतपटत्वानधिकरणमात्रवृत्तित्वादिति क्रमेणाकस्याधिरूपस्य साधनसमानाधिकरणयावद्धर्माणां प्रत्येकनिरूपि
तवैयधिकरण्यानधिकरणत्वाभावात्· गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेश्च· विशिष्टस्यानतिरिक्तत्वादि
ति चेन्न· साधनसमानाधिकरणयावन्तो धर्माः तत्प्रत्येकानधिकरणमात्रवृत्ति यद्धर्मावच्छिन्नाधिकरणत्वं तादृशधर्मभि
न्नं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वादिति दिक्· ननु व्यतिरेकित्वेन धर्मो विशेषणीयः यद्वा
यावत्पदं तादृशस्य कस्यापि धर्मस्य [illegible]नधिकरणमात्रवृत्तीति स्फोरणाय· तथाच साधनसमानाधिकरणयत्किंचिद्धर्मानधि
करणमात्रवृत्तियद्धर्मावच्छिन्नाधिकरणत्वं तद्धर्मभिन्नं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति पर्यवसितमिति
नायं दोषः पीत्यत आह· महानसादाविति· धूमादावपीति· अत्र तदनधिकरणपदेन तदभावाधिकरणं त[illegible]द्विन्नं वा वक्तव्यं· द्

ऽम्रयथापि धूमसमानाधिकरणाय किंचिद्धूर्मो वह्निरेव समवायेन तदभावाधिकरणांतर्द्वित्वे च महानसादिरेव तद्वृत्तित्वे द्र
वह्नित्वावच्छिन्नाधिकरणताया इत्यव्याप्तिरिति भावः मिश्रास्तु अस्तु वैयधिकरण्ये तदनधिकरणवृत्तित्वं तदधिकर
दे णावृत्तित्वं वा आद्ये आह प्रमेयत्वादिरिति द्वितीयमपि तद्वन्निष्ठात्यंताभावप्रतियोगित्वं तद्वन्निष्ठान्योन्याभावप्रतियोगिता
वच्छेदकत्वं वा द्वयमपि न युक्तमित्याह महानसादावितीत्याहुः आचार्यलक्षणमात्रांकते अथेति अनौपाधिकः संबंध
इति उपाध्यभावविशिष्टं साध्यसामानाधिकरण्यमित्यर्थः वैशिष्ट्यं चैकाधिकरणवृत्तित्वं उपाध्यभावः संबंधसान्येन ग्राह्यः
अन्यथा ध्वंसत्वादित्यादौ गुणत्वाद्युपाधेरभावस्य सत्तादौ सत्वादतिव्याप्त्यापत्तेः नतु व्यभिचारितासंबंधेन साधनाव्या
पकत्वदलवैयर्थ्यापत्तेः केचित्तु उपाध्यभावः उपाधितावच्छेदकसंबंधेनोपाधिसामान्याभाव एव ग्राह्यः ध्वंसत्वादित्यादौ च
सत्तादावुपाधितावच्छेदकसंबंधेन द्रव्यत्वसत्तान्यतरत्वाद्युपाधेरभावस्यासत्वान्नातिव्याप्तिः न चैतादृशेनैतद्वह्निहेतुके सं
योगेन धूमसाध्यके व्यभिचारिण्यतिव्याप्तिः तत्र साधनवृत्तिधर्मस्य साधनव्यापकत्वनियमेनोपाधित्वासंभवादिति वाच्यं तत वा
स्य विरुद्धत्वेन साध्यसामानाधिकरण्यदलेनैव वारणादित्याहुः तदसत् प्रमेयत्वान्यः प्रमेयत्वात् घटाभावान्यो घटाभावा
दित्यादौ व्यभिचारिण्यतिव्याप्तेः तत्र साधनावृत्तिधर्मस्यैवोपाधित्वसंभवादित्यादिक् ननूपाधित्वं साध्यसमव्याप्तित्वे सति

रूपं नियतत्सहानवस्थानं च तदभावव्याप्यत्वं तदपि व्याप्यत्वमनौपाधिकत्वं तदितररूपमित्यनवस्थेत्यत आह प्रतियोगित्वं चेति। प्रतियोगित्वं स[illegible]

साधनाव्यापकत्वं समव्याप्तत्वं च व्याप्तिघटितं तच्चानौपाधिकत्वेतरत्स्वमित्यनवस्थेत्यत आह उपाधिश्चेति। ननु तथापि व्यापकत्वं
व्याप्तिनिरूपकत्वं व्याप्यत्वमनौपाधिकत्वेतररूपमित्यत आह व्यापकत्वं त्विति। नन्वेवं यत्र व्यभिचारित्वानौपाधित्वसंभवस्तत्राति
व्याप्तिरित्यत आह व्यभिचारेति। ननु प्रतियोगित्वं विरोधित्वं विरोधित्वं च नियतत्सहानवस्थाननियमत्वं स्वरूपविरोधित्वं न्ते
त्वन्न्यः अन्योन्येति। इदमापाततः येन संबंधेनाभावस्तेन संबंधेन व्याप्यत्वं सहानवस्थाननियमपदेनावश्यं वक्तव्यमन्य
था समवायादिसंबंधावच्छिन्नघटाद्यभाववति महानसादौ संयोगेन वह्न्यादर्शने व्याप्त्यापत्तेः तथा चान्योन्याभा २
वप्रतियोगिनि न व्याप्तिः अन्योन्याभावस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वात् तेन संबंधेन प्रतियोगिनस्तदभा
दि वव्याप्यत्वात्। किंतु संयोगसंबंधावच्छिन्नस्तत्राद्यभावस्य प्रतियोगिन्यव्याप्तिः तेन संबंधेन सत्त्वाद्यभावाव्याप्य
त्वात्। घटत्वादेरत्यन्ताभावप्रतियोगित्वापत्तिः स्वस्वाभावविरोधित्वमित्यर्थो घटत्वाभावस्यात्र पक्षधर्मस्य दुर्वचत्व वि
मित्येव दूषणं सारं तथा प्रतियोगित्वमपीति प्रतियोग्यभावयोः स्वरूपसंबंधविशेष इति शेषः अभावविरहेति। घ
टाभावस्याभावो यो भवति स तस्याभावस्य प्रतियोगी भवतीत्यर्थः भवति च घटाभावस्य प्रतियोगी घटो घटाभाव
स्याभावः। तदभावत्वं तत्प्रतियोगित्वमिति तु निष्कर्षः घटाभावस्यापि घटप्रतियोगित्वात् प्रतियोगितावच्छेदकस्यैव राम

३२

तादात्म्यसंबंधेन प्रतियोगिनोप्यन्योन्याभावाभावत्वात् तथा च नान्योन्याभावप्रतियोगिन्यव्याप्तिः न चात्रान्योन्याभाव

योगि प्रतियोगितावच्छेदकेऽव्याप्तिः अत्यन्ताभावाभावस्य प्रतियोगित्वेन घटादिभेदस्य घटादिभेदात्यन्ताभावाभावरूपतया

घटादिभेदात्यन्ताभावरूपस्य घटत्वादेः प्रतियोगितावच्छेदकधर्मस्यापि घटान्योन्याभावप्रतियोगित्वात् विशिष्टं वृ

साध्याभाववद्वृत्तित्वमिति प्रथमलक्षणव्याख्यानावसरे [redacted] न च तथा विशेषणादिसंबंधावच्छिन्नप्रतियोगिता

कगुणाद्यभावप्रतियोगिन्यव्याप्तिः तादृशस्य धिकरणसंबंधावच्छिन्नाभावस्य केवलान्वयित्वात्तदभावत्वस्य व

तत्प्रतियोगिन्यभावादिति वाच्यम् आकाशाद्यभावस्य केवलान्वयित्वेऽपि प्रतियोगित्वव्यवहारान्यथानुपपत्त्या आका

शादेस्तदभावत्वस्य व्यधिकरणसंबंधावच्छिन्नाभावस्य केवलान्वयित्वेऽपि तदभावत्वस्य तत्प्रतियोगिन्यभ्युपगमात्

केवलान्वयित्वस्य प्रतियोग्यधिकरणानिरूपित वृत्तिमत्त्वस्यात्यन्ताभावविशेषणतया च न केवलान्वयित्वानुप

पत्तेः नैवं समवायसंबंधेन गुणादिमति घटादौ तादृशगुणाद्यभावाभावप्रत्ययापत्तिरिति वाच्यं प्रतियोगितावच्छेदक

संबंधेन प्रतियोगिमत्त्वस्याभावा भावप्रत्ययनियामकत्वात् अन्यथा समवायेन घटादिमति कपालसंयोगसंबंधा

वच्छिन्नघटात्यन्ताभावाभावप्रत्ययापत्तेः एवं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिमत्त्वावच्छेदककालादौ वास्त

न

ताभावाभावप्रसंगयोर्मयोरसन्निकालेपि संयोगसंबंधावच्छिन्ने तद्धटसत्ताभावेनात्वीति प्रसंगेऽपि नैरन्तेगुणादि या
३३ मत्त्वपि कालादेन्नताद्दशगुणाद्यभावाभावप्रसंगस्य परिनिवारणे हतामाशय: केचित्तु नन्वं प्रतियोगितासामान्यनिर्व-
चनेन तस्य स्वरूपसंबंधविशेषरूपत्वात् किंतु प्रकृतलक्षणघटकप्रतियोगितामात्रनिर्वचनमेव तेनान्योन्याभा-
वव्यधिकरणसंबंधावच्छिन्नाभावप्रतियोगितोरव्याप्तिरन्योन्याभावप्रतियोगितावच्छेदकेऽतिव्याप्तिश्च न दोषा-
य न चैवं प्रकृतलक्षणेऽसत्ताभावपरत्वे पूर्वमिति वाच्यं। तत्स्वरूपकीर्तनमात्रत्वादित्याहुः तदसत् तत्राचार्यै-
रभावविरहात्मत्वरूपेण प्रतियोगितेत्यनेन प्रतियोगितासामान्यस्यैव निर्वचनात्॥ तस्योक्तप्रभिप्रायेणैवोपपाद-
अत्र नेप्रकृतेपि प्रतियोगित्वसामान्यस्य लक्ष्यत्वेपि क्षतिविरहात्। अभावविरहत्वञ्च षष्ठीतत्पुरुषसमास: ष-
यत् ष्ठ्यर्थश्च प्रतियोगित्वं घटं कं तत्र रूपसंबंधविशेषरूपमेव वाच्यं तथा च लाघवादेव शुक्लत्वात् तदेव प्रतियो-
गित्वेन [redacted] स्वभावविरहात्मत्वेनोरवादिसत्त्वरूपोवाच्येन तत् विनाश्यं किंचिदिति। यत्किंचित्सा-
ध्यव्यापकयत्किंचित्साधनाव्यापकधर्माभावस्य धे: गुणवत्त्वादित्यत्र व्यापकं प्रमेयत्वादि साधनाव्यापकस्पन्दत्व-
त्वादेर्ध्वंसाभावादेरसत्त्वादिति भाव: प्रकृतेति प्रकृतसाध्यव्यापकप्रकृतसाधनाव्यापकधर्मस्यैव संधे: निषेद्धुमिति प्रकृ- राम

न्तसाधननिष्ठनिषेधप्रतियोगित्वे नत्वानुममस्याकाय इत्यर्थः।२ शंकते यावदिति। निषिध्यत इति॥ नोपाधिकत्व फ्टेन निषे
धप्रतियोगित्वयविवक्ष्यत इत्यर्थः यावत्साध्यव्यापके साधनाव्यापकत्वाभावो यावत् साधनाव्यापके साध्यव्यापकत्वाभावो वा॥
नोपाधिकत्वपदार्थ इति भावः अधिकरणत्वादिनिनि कृत्वानिषेध्यस्य हेतुनिष्ठसाध्यसामानाधिकरण्यव्याधिकरणत्वादिरर्थः त
था च तादृशानोपाधिकत्वविशिष्टं साध्यसामानाधिकरण्यं सर्वत्र हेतौ नास्तीत्यव्याप्तिरिति भावः वैयधिकरण्यमनुसरति
ध यावदिति। यत्साध्यस्य यत्सा[redacted]नसमानाधिकरणं साध्यस्य यत्साधनस्य यस्य साधनस्य तत्त्वं नोपाधिकत्वं तथा
ध ना च यावत्त्वाव्यापकत्वाव्यापकसाध्यकत्वं यावत्साध्यव्यापकव्यापकत्वं वा नोपाधिकत्वमित्यर्थः तथा हि सा रिंद्रह्व यथा
स्क्रतामिप्रायेण यत्साधनतावच्छेदकावच्छिन्नाव्यापकतावच्छेदकं यावत्साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं तत्त्वं।
ध्व साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं यावत्धर्मावच्छिन्नव्यापकतावच्छेदकं धर्मावच्छिन्नत्वमनोपाधिकत्वमि न
त्यर्थे तु नकोपि दोष इत्यवधेयं। नायाम्नि। साध्यं यावन्नामव्यभिचारि यावद्भाववद्वृत्ति तावन्नामव्यभिचारित्वं तावद
भाववद्वृत्तित्वं साधनस्यानौपाधिकत्वमित्यर्थः सोपाधौ तु साध्यमुपाधेरेवाव्यभिचारि न तु साधनं तदव्यभिचारीति
तदवच्छेद इति भावः तर्हि लाघवात् साध्याव्यभिचारित्वमेव नतदस्त्वित्याह साध्येति त्रेत्र शापत्तेर्व्हतत्त्वेति। केवलाव

प्यव्याप्तेरिति भावः । ननु तर्हि केवलान्वयिसंग्रहार्थमेव गुरुशरीरस्याप्युक्तलक्षणस्यास्त्विति चेन्न । अत्रापि
केवलान्वयिसंग्र हणतादवस्थ्यात् । तत्र हि साध्यस्य प्रमेयत्वादेर्यद्दर्संताभाववद्वृत्तित्वलाद्दशधर्माप्रसिद्धेरिति स्पष्टं ॥
लीलावतीकारमतमाशंक्य निराकरोति नापीति । कात्स्न्येनेति । विशेषणेन तन्नीयात्तथा च कात्स्न्येन कात्स्न्यविशि
ष्टेन सर्वेणेति यावत् । अत्र कात्स्न्यं साधनस्य साध्यस्य साधनाश्रयस्य साधनसमानाधिकरणधर्मस्य वा विशेषणं ।
आद्ये हेतुत्वेन साधनेन साध्यस्य सामानाधिकरण्यमित्यर्थः तच्चैकव्यक्तिकहेतुस्थले नास्तीत्याह एकव्यक्तिक
इति । अनेकाशेषत्वरूपस्य कात्स्न्यस्याभावादित्यर्थः । अत्रैव पक्षे दोषान्तरमाह नानेति । न च कृत्स्नेषु साधनेषु साध्य
संबन्धस्य पर्याप्तिर्वाच्यं । तथाप्येकव्यक्तिकहेतुकस्थले ऽव्याप्तेः पृथिवी पृथिवीत्वव्यापकजातिरित्यादावतिव्याप्तेः
श्च । अर्थाभिधानपुरस्सरं द्वितीयं निरस्यति अत एवेति । एकव्यक्तिकसाध्यकाव्याप्तेरेवेत्यर्थः विषमव्याप्तेरिति वह्नि
मान् धूमादित्यादावित्यर्थः अयोगोलकीयवह्निसामानाधिकरण्यस्य धूमे ऽभावादिति भावः । इदमुपलक्षणं संख्या
वान् परिमाणादित्यादि[illegible]समव्याप्तेरव्याप्तेः सकलसंख्यासंबन्धस्य कुत्रापि परिमाणे ऽभावादित्यपि बोध्यं । अर्थ
परिष्कारपूर्वकं तृतीयं निरस्यति न चेति । प्रत्येकवह्नेरिति । इदमुपलक्षणं । एकमात्रवृत्तिसाधने ऽव्याप्तिश्चेत्यपि बो

ध्यं अर्थपरिष्कारएवंविकं चतुर्थं निरस्यति नाप्नोति पावद्धर्माधिकरणेति पावत्ता धनसमानाधिकरणधर्माधि
सिद्धे करणावृत्तिरमित्यर्थः अप्रै...ति नचसाधनसमानाधिकरणपावतोधर्मास्तेषांप्रसेककनिरूपितसामानाधिकर
णं विवक्षणीयमिति वाच्यं धूमसमानाधिकरणानां पावद्धर्माणां महानसत्वादीनांप्रसेककनिरूपितसामानाधिक
रणस्यकुत्राप्यवृत्तेरभावादिति भावः इदंचपयाश्रुतामिप्राये एवंपादितुपत्यमावच्छिन्नसामानाधिकरणत्वेनसाधन
सा मानाधिकरणव्यापकत्वंतद्धर्मावच्छिन्नसामानाधिकरणमिति विवक्षते नदानापरोषस्स्यवर्येयंटीकाकारलक्ष
णंशंकते। नाप्नोति स्वाभाविकंसाध्यसामानाधिकरणमित्यर्थः व्यभिचारिणोतुसाध्यसामानाधिकरणमौपा
धिकमिभावः स्वाभाविकत्वंहिहेतुस्वरूपजन्यत्वंहेतुस्वरूपाश्रितत्वंवा आद्ये द्रव्यं पृथिवीत्वादित्यादौ पृथिवीत्वादिनिष्ठद्रव्य
स्प त्वादिसामानाधिकरणेनिसत्वपाः व्याप्तिः द्वितीयेद्रव्यसत्वादिसाद्येव्यभिचारिण्यतिव्याप्तिरित्याह [redacted] स्वभाव
जन्यत्वेहेतुस्वरूपजन्य [redacted] त्वेनदाश्रितत्वादौवास्वाभाविकपदार्थइति शेषः अव्या
प्तेरिति। अव्याप्तिसहिताअतिव्याप्तिरित्यर्थः मध्यमपदलोपसमासात् अन्यथाहहेति धेनद्विवचननपुंसकलिंग
योरन्यतरापत्तेः तदाश्रितत्वादित्यादिपदार्थेपितत्वपरिग्रहः तत्रापिद्रव्यसत्वादिसाद्यावतिव्याप्तिर्वोध्या सत्तायांद्रव्य

अन्वयेनेति सम्बन्धं विनाप्यभावः सम्भवा १ अत्र साध्येन विना साध्याभाववति · विनाशब्दार्थो ऽभाववत्त्वं · विनाभावः स्वत्रसमाससमासमीन्तन्त्रय:
अवच्छेदकत्वं च न्यूनवृत्तित्वं प्रसाध्यतेति तथा च विनाभावः
साध्याभावव्यापकीभूताभावः अविनाभावस्तु पुनः तद् [illegible]   भावः अस्याधृत्तस्य एवं प्रतियोगित्वादिति भाव प्रधान निर्देशात् फलितं) २

त्वसामानाधिकरण्यस्यानारोपितत्वात् अविनेति साध्येन वि[illegible]नां साध्याभाववति नावो वृत्तिर्यस्य तद्भिन्नः साध्याभाववद् वृ
त्तिभिन्न इति यावत् व्याप्य इति शेषः अस्य तावान्योन्याभाववभेदेन स्वभेदात्मप्राथमिकाव्यभिचारित्वेन पौनरुक्त्यं। केचित्तु अवि
नाभावः हेतु भावे साध्यं विना ऽभावस्य साध्याभाववन्निष्ठाभावस्य प्रतियोगित्वं तेन भावः साध्याभावव्यापकत्वमिति
यावत् तथा च हेतोः साध्याभावव्यापकाभावप्रतियोगित्वं व्याप्तिरिति फलितं नचैवं स[illegible]कलसाध्याभाववन्निष्ठाभावप्रतियो
गित्वेन पौनरुक्त्यं तत्त्वापि सकलत्वस्य व्यापकत्वरूपत्वादिति वाच्यं तत्र [illegible]पकत्वं सा[illegible]ध्याभाववन्निष्ठाभावप्रतियोगित्वं अत्र तु व्या
पकत्वं साध्याभाववन्निष्ठाभावस्य प्रतियोगिता संबंधेनाभाववत्त्वमित्येवं भेदादित्याहुः अथेति संबंधमात्रं साध्यसामानाधि
करण्यमात्रं यत्र यत्सामानाधिकरण्यं तत्र तस्य व्याप्तिरिति यावत् नत्वेवं द्रव्यं सत्त्वादित्यादौ सत्तानिष्ठद्रव्यत्वसामा
नाधिकरण्यस्यापि सत्तानिष्ठद्रव्यत्वव्याप्तित्वापत्तिरिसत्रेशपत्तिमाह व्यभिचारीति व्यभिचारिहेतुनिष्ठसाध्यसामानाधिक
रण्यस्यापीत्यर्थः केन वित्संहेतिं किंचिद्रूपावच्छिन्नेन साध्येन सहेत्यर्थः धूमत्वादिरूपेणातित्वादिना सत्तादिव्यापकत्वादि
[illegible]तिभावः पथाक्रुतिद्रव्यत्वसत्तासमानाधिकरण्यसाम्येन सह व्याप्तित्वासंभवादसंगतेः धूमादिव्याप्तिस्त्विति। धू
मत्वाद्यवच्छिन्ननिष्ठवन्हित्वाद्यवच्छिन्नव्याप्तिस्त्वित्यर्थः सामानाधिकरण्यधूमत्वावच्छिन्नेन वह्नित्वावच्छिन्नव्याप्तिः इत्यत्र त्वावच्छि

२ निरूपित   १ विशिष्येवेति। धूमत्वावच्छिन्ने वह्नित्वावच्छिन्न[illegible]

रास
३५

२ ननु यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नव्याप्तिरिति सामान्यतो यत्र तत्र व्याप्तेरेकोन्तरा

[redacted] न्ने तत्तत्त्वावच्छिन्नसामानाधिकरण्यं द्रव्यत्वत्वावच्छिन्नसत्तात्वाव
च्छिन्नव्याप्तिरित्यादिक्रमेण विशिष्यैव निर्वक्तव्य इत्यर्थः [redacted] कारणीभूतपरामर्श
विषयतावच्छेदकव्याप्यस्य वक्तिनिमित्तत्वात् आद्यमाह लिङ्गेति। द्वितीयमाह नचेति। सम्बन्धमात्रे। साध्यसामानाधिक
रण्यत्वावच्छिन्नमात्रेण व्याप्त्यनुमितिहेतुपरामर्शविषयः तद्व्याप्तिरिति। अव्यभिचारंज्ञानदशायां वह्न्यव्यभिचारिधूमवा
वान् पर्वतः वह्न्यव्यभिचारिधूमवान् पर्वत इत्यादिज्ञानदशायां वा वह्निसामानाधिकरण्येन धूमवान् पर्वत इति सा
मित्यनु मानाधिकरण्यविशिष्टपरामर्शादनुमित्युत्पादादित्यर्थः नवाव्यभिचारांशोपादानमनुमित्यनुसारेणासिद्धः तथा वह्न्यव्यभिचा
र्यभाववान् पर्वत इत्यादिज्ञानदशायामपि। अस्तु वा पक्षे साध्याव्यभिचार्यभावादिज्ञानाभावेऽप्यनुमितिहेतुरिति वाच्यं
सर्वजनानुभवबाधितत्वात्। साध्याव्यभिचार्यभाववत्त्वाद्यादिज्ञानानामनुमितिप्रतिबन्धकत्वकल्पनेन महद्गौरवाच्च
[redacted] इति भावः। तृतीयं दोषान्तरं सत्त्वे इह नापीति केषाञ्चिन्मतमाह केवलान्वयिनीति। केवलान्वयित्वघटकदशायामित्य
र्थः केवलान्वयिसाध्यसम्भवे केवलान्वयिसाध्यसामानाधिकरण्यमित्यर्थः साध्यस्य केवलान्वयित्वज्ञाने साध्यसामाना

ज्ञानदत्ता ६

[illegible]

[illegible]

चिंता॰टी॰ धि करणप्रत्येस्यनुमितिस्तु स्यात् केवलान्वयित्वे साध्यविशेषणं तत्रान्योन्याभावप्रतियोगि तावच्छेदकत्वेन घटान्योन्या ता
भावप्रतियोगितानवच्छेदक[redacted]साध्यसामानाधिकरण्यमित्यर्थः ननु तथापीदं गगनं वाच्यं ज्ञेयत्वादित्यादावसंभवः घटत्वादि
३६ विशिष्टवाच्यत्वादिमतोऽन्योन्याभावस्य प्रतियोगितावच्छेदकत्वात् घटत्वविशिष्टस्यावच्छेदकत्वे विशेष्यस्याप्यवच्छे
न दकत्वात् । न चावच्छेदकत्वपर्याप्त्याख्यसंबंधेनावच्छेदकताशरीरस्य त्वमिति वाच्यं घटत्वविशिष्टवाच्यत्ववान् ज्ञेयत्वादित्या
दावतिव्याप्तेः वाच्यत्वस्य पर्याप्त्याख्यसंबंधेनावच्छेदकताशरीरप्रवेशे तथा घटत्वविशिष्टवाच्यत्वस्यापि तथात्वात् न विशिष्टवाच्य
त्वस्य वाच्यत्वानतिरिक्तत्वादिति वाच्यं । अन्योन्याभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नपर्याप्तावच्छेदकताकत्वाभावस्तद्ध
र्मावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात् यत्र रूपपर्याप्तावच्छेदकत्वाभावसामानाधिकरण्यमित्युक्तावपि इदं वाच्यं
ज्ञेयत्वादित्यादौ वाच्यत्वादेः स्वरूपतोऽभावप्रतियोगितानवच्छेदकत्वेन वाच्यत्वादिनिष्ठपर्याप्तावच्छेदकत्वाप्रसिद्ध्याऽव्याप्त्या
पत्तिरतोऽवच्छिन्नत्वानुधावनं न च तथापि वाच्यत्वादेः कालिकसंबंधेनान्योन्याभावप्रतियोगितावच्छेदकत्वासंभव इति वाच्यं
साध्यतावच्छेदकसंबंधावच्छिन्न त्वेनावच्छेदकतायां विशेषणत्वं वाच्यत्वादिनिष्ठस्वरूपसंबंधावच्छिन्नावच्छेदकताकत्व
नुसंयोगादिसं[redacted]बंधेन वाच्य[redacted]दे ऽस्तताभावप्रतियोगितायामेव प्रसिद्धं साध्यतावच्छेदकसंबंधभेद एम

तावच्छेदक

३ साध्यतावच्छेदकसंबंधावच्छिन्न

योगि नव्यास्तेर्मे दृष्टान्तात्तादात्म्यसंबंधेन प्रमेयादिसाध्यके पुनरन्योन्याभावप्रतियोगितासामान्ये यद्धर्मविशिष्टपर्याप्तावच्छेदकताकत्वाभा
वत्तद्धर्मावच्छिन्नसामानाधिकरण्यमित्येव वक्तव्ये शब्दे कम्पस्यानुपादेयत्वात् धूमपदं साध्यतावच्छेदकपरं अवच्छेदक
ताव [redacted] त्वेन विशेषणीयमिति प्रमेयत्वादिकं केवलकसंबंधेनान्योन्याभावप्रतियोगितावच्छेदकत्वेपि त्म्यसंबंधे तादा
न प्रमेयादिसाध्यकेऽसंभवः तद्धर्मावच्छिन्नसामानाधिकरण्यं च साध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नस्य संबंधिनि यो हे
तुतावच्छेदकसंबंधावच्छिन्नसंबंधितानिरूपकतावच्छेदके हेतुतावच्छेदकवत्त्वं तेन संबंधेन रूपसाध्यसामानाधिकर
ण्यत्वेनापि नानुमितिः यथाऽऽकाशं वाच्यं गगनादित्यादौ समवायादिसंबंधेन गगनादिहेतुकेऽसंभवः यथा घटत्वपटत्वोभयस्मादि
त्यादौ समवायादिसंबंधेन विरुद्धोभयहेतुके व्याप्तिव्याप्तिरिति भावः व्यतिरेकिणीति। व्यतिरेकित्वमुक्तरूपव्याप्तिसंबंधः।
व्याप्तिः। परामर्शविषयतयाऽनुमितिप्रयोजिका व्याप्तिः नन्वेवं परस्परं व्यभिचारस्तत्राह एतयोरिति जनकत्वं परा
मर्शविषयतया जनकतावच्छेदकं केवलान्वयिसाध्यकानुमितौ निरुक्तकेवलान्वयिसाध्यसामानाधिकरण्यविशिष्टवत्तापराम
र्शो व्यतिरेकिसाध्यकानुमितौ साध्यवदन्यावृत्तिमत्तापरामर्शो हेतुरित्यर्थः केवलान्वयिसाध्यकत्वं च निरुक्तकेवलान्व
यिसाध्यसामानाधिकरण्यविशिष्टवत्तापरामर्शव्यवहितोत्तरोत्पन्नत्वमनेनेदं वाच्यं ज्ञेयत्वादित्यादावपि व्यतिरेकित्वमे

दकत्वा के ३ त्व

मरणायोसाध्यवद्न्याव. वित्वमात्रपरामर्शादनुमितेरसाद्दियेऽप्यभिचारस्तदवस्थः नन्वत्र कारणबाधान्नभव न
सेव [redacted] तदानीमनुमितिरितिवाच्यं। अनुभवविरोधात्। तथापि हेतुतावच्छेदकसंबंधादिभेदेनानिरुक्तसामानाधि
करण्यस्य विभिन्नतया परस्परव्यभिचारस्य दुर्वारत्वात्। एवं साध्यवदन्यावृत्तित्वमन्नापरामर्शव्यवहितोत्तरेऽसत्त्वमे
रे वव्यतिरेकिसाध्यकत्वेन व्यतिरेकिसाध्यके केवलान्वयित्वमपरामर्शायां निरुक्तकेवलान्वयिसामानाधिकरण्यपरा
त्रपरामर्शादनुमित्युत्पादेऽपि व्यभिचारस्तदवस्थः। नापि हेतुतावच्छेदकसंबंधादिभेदेन साध्यवदन्यावृत्तित्वस्य विभि
न्नतया परस्परं व्यभिचारस्थानिभावः। ननु तर्ह्यनुमितिसामान्ये किं प्रयोजकमित्यत आह अनुमितिमात्र इति। प
क्षधर्मतैव पर्वतादिनिरूपितसांसर्गिकविषयतैव निरूपितत्वेन स्वरूपकथनं तन्निवेशे ऽननुगमापत्तेः प्रयोजिका ह्या
नतिरिक्तप्रकारतावच्छेदिका। तथा चानुमितित्वावच्छिन्नं प्रति समान्यतो विशिष्टज्ञानत्वेनैव हेतुत्वमिति भा॰ ज्ञान वः
त्वेनैव हेतुत्वमिति च सद्गतिः। विशिष्टत्वमेव शेषप्रयोजनविरहेन्तर्भावे विशेषणत्वमात्रस्य निगमनाविरहेण कार्य
कारणभावत्रयप्रसंगाच्च। न चैवं निरुक्तव्याप्तिरूपज्ञानविरहदशायामपि पक्षधर्मतानुपपत्तेस्तादृशपक्षधर्मताज्ञानादनु
मितिसामग्रीच प्रकृतविशेषसामग्रीति भावः। सकलेति। यावन्ति साध्यवदन्यावृत्तित्वमित्यर्थः। साध्यसाकल्यविशे

१ मान्योत्पादापत्तिः सामान्यसामग्रीसत्त्वादत आह न चेति। विशेषसामग्रीति। केवलान्वयिसाध्यकानुमितिसामग्रीव्यतिरेकि साध्यकानुमितिसा

यत्रे यावत्साध्याधिकरणासत्विद्वेः न व्याप्त्वादिति । यावत्साध्यवतोन्यत्वादि सर्थः यावत्त्वावच्छिन्नप्रतियोगिताकान्यो
न्याभावस्यैव केवलान्वयित्वादिति भावः इत्यमापातनः साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववद्वृत्तित्वं वक्तव्यं सा
मान्याभावानभ्युपगमेपि साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावकूटाधिकरणावृत्तित्वमेव वक्तव्यमित्युक्तदोषा
यां भावात् वस्तुतस्तु सर्वत्रैव साध्ये केवलान्वयित्वव्यतिरेकित्वग्रहदशायां भेदकार्यकारणभावद्वयकल्पनेपि ष्यलाघ भ
मोन्या वात् धेतु समानाधिकरणाभावे साहित्यसमाराव्याप्तित्वात्तेन मेव सर्वत्र हेतुदूषितं तेस्याभप्रदशायामेव संभवात् । न च हेतुसा
मानाधिकरणप्रवेशे एकस्मिन्नेव साध्ये हेतुतावच्छेदकभेदेनानंत कारणाभावभेदप्रसंगात् तदपेक्षया कार्यकारणभावद्व र्यका
यमेव लघ्विति वाच्यं उक्तक्रमेण निरुक्तव्याप्तिद्वयस्यापि हेतुं [redacted] तावच्छेदकभेदेन कार्यकारणभावेन च भेदस्य विशि
चिद तथापि विषयविशेषे व्यतिरेकित्वग्रहदशायां कदापि अनुमितिर्नोत्पन्नानत्वलाघवात् केवलान्वयिसाध्यसामान्याधि ष्टत्वात्
करणप्रज्ञानस्यैव हेतुत्वमुक्तमिति वाच्यं तथाप्यभावे हेतुसामानाधिकरण्यानुपस्थितिदशायामनुमित्यनुत्पादेन तत्
सामानाधिकरण्यांशज्ञानस्यावश्यं हेतुत्वात् । अनुभवोपलब्धेपि लाघवात् सर्वत्रैव साध्याभाववद्वृत्तित्वज्ञानमेवानुमिति
हेतुः साध्यस्य केवलान्वयित्वग्रहदशायां चानुमितिरेवासिद्धेस्तस्यैव वक्तुमुचितत्वादित्येव दूषणं सारं सर्वत्रलक्षणानि ।

तावच्छेदकघटिततया हेतु ५

२८ सर्वत्र साध्यसाधनघटितलक्षणस्यार्थः व्याप्तिनिरूप्यत्वेनेति व्याप्तिघटितत्वेनेत्यर्थः। तदनुमितिजनकीभूतपराम
र्शविषयतावच्छेदकव्याप्तिप्रतियोगित्वं हि तदनुमितौ साध्यत्वं तादृशव्याप्त्याश्रयत्वं तदनुमितौ साधनत्वमिति भावः।
ननु साध्यत्वं साधनत्वं चान्यथैव निर्वाच्यमित्यत आह साध्यत्वं हीति सिद्धिकर्मत्वमिति॥ तदनुमितिविधेयत्वं तद
नुमितौ साध्यत्वमित्यर्थः। सिद्धिविषयितेति तदनुमितिजनकीभूता या सिसाधयिषा या विधेयतया विषयत्वं तदनुमितौ साध्य
त्वमित्यर्थः। यद्यपि द्वितीये सिसाधयिषां विनाप्यनुमितिलक्षणे साध्ये व्याप्तिः तथापि स्फुटत्वात्तद्दूषणं नोक्तमाह
महानसीयवह्नाविति। वह्निव्याप्यधूमवान् पर्वत इति सामान्यतः परामर्शजनितायां पर्वतीयवह्निमात्रविषयानुमि
तौ तदनुमितिव्यक्तिविधेयत्वस्य महानसीयवह्नौ अभावात्तत्र न स्यात् साध्यत्वप्रसंगः एवं च हि व्याप्यधूमवान् पर्वत इति
सामान्यतः परामर्शेनैव पर्वतीयस्यानुमितिर्जायतामिति सिसाधयिषासहकाराज्जनितायां पर्वतीयवह्निमात्रानुमि
स्त तौ जनकीभूतसिसाधयिषाविषयत्वस्य महानसीयवह्नौ अभावात्तत्र तस्य साध्यत्वप्रसंगादित्यर्थः। इत्यनुपलक्षणम्। सा
धनत्वमपि न सिद्धिकरणत्वं लिंगकरणत्वस्य निरस्तत्वादित्यपि बोध्यं। यद्यपि वह्निव्याप्यधूमवान् पर्वत इति सामान्यप
रामर्शात् पर्वतीयवह्निमात्रविषयकानुमितेरेवासिद्धत्वात् साम्यात् विशेषणं वह्नित्वरूपेण महानसीयवह्निभानेऽपि बाध

काभावात् नचपन्नमहानसीयवह्न्यादेर्बाधज्ञानेऽनेनैव सामान्यपरामर्शान्पर्वतीयवह्निमात्रभानसम्भवः इति वाच्यं बाधज्ञा
ने हि किंवह्नित्वरूपेणावच्छिन्नत्वरूपेण पर्वतीयवह्न्यतिरिक्तवह्नित्वरूपेण वा नाद्यः तत्सत्त्वे पर्वतीयवह्नेरपि भानासंभवात् नान्
त्यो समानप्रकारकबाधज्ञानस्यैव प्रतिबन्धकतया तत्सत्त्वेऽपि वह्नित्वरूपेण महानसीयादिवह्निभानसंभवात् अत एव पर्वतव
ह्निव्याप्यधूमवान्पर्वत इति सामान्यपरामर्शादेव पर्वतीयवह्न्यतिरिक्तवह्न्यभाववान्पर्वत इति बाधज्ञानसहकारबलात् व्या
पकतानवच्छेदकपर्वतीयवह्नित्वरूपसामान्यघटितविशेषधर्मप्रकारेण पर्वतीयवह्नेरनुमितिस्तत्रापि वह्नित्वरूपेण मह म
नसीयादिवह्नेरवश्यभानं सामग्रीसत्त्वात् अनुमितेर्द्विविधविषयत्वस्येष्टत्वात् [illegible] अत एव वह्निव्याप्यधूमवान्प
व र्वतो वह्निमानिति सिध्यात्मकपरामर्शात् पर्वतीयवह्न्यतिरिक्तवह्न्यभाववान् पर्वत इति बाधज्ञानसहकारेण पर्वतः पर्व
तीयवह्निमानिति नानुमितिस्तादृशबाधज्ञानजन्यानुमितेर्वह्नित्वादिव्यापकतावच्छेदकधर्मावच्छिन्नविधेयतानियमेन
२ व्यापकसामग्रीविरहात् न व्याप्यपक्षो बाधकमहिम्ना वह्नित्वरूपेण पर्वतीयवह्निमात्रविषयकः स्मरणात्मकः परामर्शस्तत्त्वे च
सामान्यपरामर्शान्पर्वतीयवह्निमात्रविषयकानुमितिसंभवः विशेषणज्ञानाभावे नवह्न्यंशभानासंभवात्। न च विशेषणां
शे ज्ञानप्रकारकविशिष्टप्रत्यक्षं प्रति विशेषणज्ञानस्य हेतुत्वेऽपि सर्वत्र विशिष्टबुद्धौ तथात्वे सामान्याभावः इति वाच्यं सर्वत्र विशि

३६ नुभवएव विशेषणज्ञानं हेतुरिति संप्रदायमतेनेतदभिधानात् यद्वा पर्वतीयवह्निकल्पने लाघवं तदन्यवह्निकल्पने गौ
रवमिति गौरवज्ञानस्य पर्वतीयवह्न्यतिरिक्तसिद्धौ प्रतिबंधकत्वे तत्तत्स्वरूपाणामेव सामान्यपरामर्शे दपि पर्वतीयवह्निमा
त्रविषयकानुमितिसंभवः पाठांतरमेतत्॥ पर्वतीयवह्निकल्पने लाघवं तदन्यकल्पने गौरवमिति ज्ञानस्य पर्वतीयवह्न्यतिरिक्त
सिद्धेः प्रतिबंधकत्वात्। तत्तत्स्वरूपाणामेव सामान्यपरामर्शादपि पर्वतीयवह्निमात्रविषयकानुमितिसंभवात्। यत्रोद्बोधकम
हिम्ना वह्नित्वरूपेण पर्वतीयवह्निमात्रविषयकस्मरणात्मकपरामर्शस्तत्रापि सामान्यपरामर्शात्पर्वतीयवह्निमात्रविषयकानुमि
तिसंभवाच्च। तत्र विशेषणज्ञानविरहेण वह्न्यंतरभानासंभवात्। न च विशेषणांशे न्याप्रकारकविशिष्टबुद्धिप्रसङ्गे विशे
षणज्ञानस्य हेतुत्वेपि सर्वत्र विशिष्टबुद्धौ न हेतुत्वे मानाभाव इति वाच्यं। सर्वत्र विशिष्टानुभवे विशेषणज्ञानं केचित्तु यत्र वह्नि
व्याप्यधूमवान्पर्वतो वह्निमानिति सिद्ध्यात्मकः परामर्शः ततः पर्वतीयवह्न्यनुमितिर्जायतामिति सिषाधयिषा तत्रैव सामान्ये
न परामर्शादपि पर्वतीयवह्निमात्रविषयकानुमितिसंभवः स्यादुः तत्र तत्पदार्थवह्निव्याप्यधूमवान्पर्वत इति परामर्शः ततः
पर्वतीयवह्न्यतिरिक्तवह्न्यभाववानिति बाधज्ञानं च पर्वतेतेन तत्र पर्वतीय [illegible] वह्नित्वेन न पर्वतीयवह्न्यभानमनुमितिर्व्यापकतावच्छेदकप्र
कारकत्वनियमादपि तु वह्नित्वेन पर्वतीयवह्निमात्रभानं तद्धर्मा [illegible] वच्छिन्नेतरबाधज्ञानस्य भिन्नप्रकारकत्वेपि सामान्यप राम

३ सिद्धेः प्रतिबंधकतया वह्न्यंतरभानासंभवादि

५ नहेतुरिति संप्रदायमतेनेतदभिधानात्॥

येनानधर्मावच्छिन्नेतरविधेयकानुमितित्वावच्छिन्नं प्रत्यतिरिक्तप्रतिबंध[illegible]कत्वकल्पनादिति प्राचीनमतमभिप्रेत्ये
दं वैदृष्णत्वासिद्धेः॥ तादृशप्राचीनमतविचारस्यास्मत्कृतत्वाभिधानतात्पर्यविषयत्वं त्वत्र बोध्यं। तादृशानुमितिमुद्दिश्य तत्र ज्ञानस्य
पक्षसिद्ध्यनुरोधेनाव्याप्तिरापद्यतेः तत्करत्वान्यलोकप्रसिद्धतत्संगतमितिरिक्तं॥ तटस्थः शंकते नन्वेति। सामान्यतः व्याप्तिप्रत्य
अ क्षत्वप्रकारेण। परस्य नानुमितिहेतुव्याप्तिज्ञानेन कार्यव्याप्तिरितिजिज्ञासोः परस्य हृदयेनाप्रव्याप्तिलक्षणहृदयेन। अ
साधकत्वा। अनुमितिप्रयोजकतांत्र कव्याप्तिमात्रमितिशेषः तत्याचकिंव्याप्तिनिरूपणेनेति भावः। त्वात्पर्येति। यस्मिन्सति
ज्ञि यः [illegible]व्याप्तेरित्यर्थः प्रयोजनेनेपरस्य एतादृशं परत्वनुमाने व्याप्तिज्ञानं शिष्यादिव्याप्तिज्ञानमितिपावत् तत्पुपयोगियदि व्याप्तिस्व
रूपनिरूपणं न हि नेत्यर्थः कथायामिति। वीयाशिष्यादेरित्यादिकथादिवारः अप्रवेशात् प्रवेशासंभवात् व्याप्तिनि
दे रूपणं विना शिष्यादेर्व्याप्तिज्ञानासंभवेनसा[illegible]तुत्वाम त्येनुत्वपरिचयासंभवेन हेतुप्रयोगस्यैवासंभवादित्यर्थः तथा
न चैकेवलमिह परस्य समाधिन्सया व्याप्तिनिरूपणमपितु शिष्यादीनां व्याप्तिस्वरूपज्ञानं विना कथायां प्रवेशो न संभव
तीत्येतदर्थमपीति भावः॥ व्याप्तिपूर्वपक्षरहस्यं॥ प्रतियोग्यसमानाधिकरणेति यत्संबंधेनत्वमिमनपरं हि नीयपर्यवसाव्या
न्त नावच्छेदकाभिमतपरं प्रतियोगितावच्छेदकावच्छिन्नं यं भवतिप्रतियोगितावच्छेदकत्वरूपयम्भवति। तेन समवायेन सामा त

नाधिकरणत्वं यत्तदवच्छिन्नेन समं सामानाधिकरण्यं तस्य हेतोर्व्या॰ रिति योजनात् तद्धर्मावच्छिन्नेन सह तस्य हेतोर्व्याप्तिरि
४० त्यर्थः । भवति च वह्निमान् धूमादित्यादौ धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं वह्नित्वं तदवच्छिन्नसमा
हे नाधिकरणो धूमः । धूमवान् वह्नेरित्यादौ च वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकमेव धूमत्वमिति नाति
व्याप्तिः । प्रतियोगितावच्छेदकावच्छिन्नत्वादिपर्याप्तके तु न संगच्छते वह्निमान् धूमादित्यादौ सर्वेषामेव वह्नीनां तादृ दै
शप्रतियोगितावच्छेदकतत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छिन्नत्वादसंभवापत्तेः । नैवमपि वह्निसमानाधिकरणात्यन्ता
भावप्रतियोगितानवच्छेदकं यद्यत्प्रमेयत्वं तदवच्छिन्नधूमसमानाधिकरणो वह्निरिति सत्ति व्याप्तिरिति वाच्यं व्यभिचारिण्यपि वस
दः । प्रमेयत्वादिरूपेण धूमादेर्व्याप्यत्वाभ्युपगमात् धूमत्वेनैव हि धूमो न वह्निव्यापकः प्रमेयत्वादिना तु व्यापको भवत्ये
व । सत्तावान् द्रव्यत्वादित्यादिव्यतिरेकिसाध्यके साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिकसाध्यसामान्याभावमा
दाय व्याप्तिवारणीय हेतुसमानाधिकरणत्वमत्यन्ताभावविशेषणं । तत्र हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छि
न्नहेतोर्यदधिकरणं तत्र येन केनापि संबंधेन वर्त्तमानं यद्गगनत्वसामान्याभावस्य प्रतियोगितावच्छेदकमेव गगनत्वमि सामान्येन
स व्याप्तिः स्यात् । स्याच्च द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ हेतुमत्सत्ताधिकरणे गुणे वर्त्तमानस्य द्रव्यत्वसामान्या राम
५०
२ त्वां अन्यथा द्रव्यं गगनं गगनत्वप्रकारकप्रमा[illegible]त्यादौ विशेष्यतासंबंधेन हेतुतायां समवायसंबंधेन हेत्वधिकरणे आत्मनि वर्त्तमान १
संबंधविशिष्टनिविशि यात्

भावस्य प्रतियोगितावच्छेदकमेव द्रव्यत्वत्वमिति व्याप्तिः नच हेतौ साध्यसामान्याभावप्रतियोग्यसामानाधिकरण्य
विरहात् प्रतियोग्यसमानाधिकरणत्वस्य हेतोर्विशेषणत्वेनैवेतद्व्याप्तिघटकाश इति वाच्यं प्रथमश्चात्मत्वपेहत्वधि न
क करणमादाय प्रसिद्धौ यत्र गुणादिमानाहार्यपक्ष्यमाणक्रमेण वक्ष्यमाणद्विविधप्रतियोग्यसामानाधिकरण्यस्यैव सा
ध्याभावस्य हेतौ सत्त्वात् तच्चानुपदं स्फुटीभविष्यति अधिकरणत्वं च संबंधित्वमात्रं तेन तादात्म्यादिवृत्तिनियामक
संबंधेन हेतुतायां हेतुतावच्छेदकसंबंधेन हेत्वधिकरणत्वाप्रसिद्धावपि नाव्याप्तिः संबंधित्वं च धर्मित्वं न तु वृत्तिनियामका
धर्म नियामकसंबंधमात्रं निरूपितसंबंधिमात्रसाधारणो धर्मिभावाख्यः स्वरूपसंबंधविशेषः न त्वाधारमात्रवृत्ति अत
एव चागृहीतासंसर्गकधर्मधर्मिभावकोटिकैककज्ञानत्वविशिष्टज्ञानत्वमिति मीमांसकाः अन्यथा घटस्य ज्ञानं चैत्रस्य
धनमित्यादिविषयित्वस्वत्वादिवृत्त्यनियामकसंसर्गकविशिष्टप्रत्यक्षादौ तल्लक्षणाव्याप्त्यापत्तेः एतेन च हेतुतावच्छेदक
संबंधेन हेतुतावच्छेदकावच्छिन्नहेतोरधिकरणत्वविवक्षणे वृत्त्यनियामकसंबंधेन हेतुतायामव्याप्तिरित्यादृशहेतोः संबंधित्व
मात्रमेव [redacted]

चिंता·दी
४१

वह्नरोचद्रव्यं विशिष्टसत्वादित्याद्यव्याप्तिनास्वस्थ्यं। गुणादौ विशिष्टनिरूपिताधारतानिरूपितसंबंधितायाः स

त्वादिस्मपि निरुक्तविशिष्टनिरूपिताधारतावद्विशिष्टनिरूपितापाधर्मितापरना मास्तं वधितायाश्चापि विलक्षणतया

त्ता गुणादावसत्वात्सत्तावान्द्रव्यत्वादित्यादौ द्रव्यं घधिकरणे महाकालादौ कालिकविशेषणतादिनावर्त्तमानस्य स

त्तादिसामान्याभावस्य प्रतियोगितावच्छेदकमेव सत्तात्वादिकमिति व्याप्तिः एवंकपिसंयोगी एतत्वादित्याद्यव्याप्यवृ

सा त्तिसाध्यके व्याप्तिम्वसाध्यसामान्याभावस्य [illegible] पि निरुक्तहेतुसमानाधिकरणत्वादत्तः प्रतियो

गपसमानाधिकरणेति पत्तु रार्थ्ये सहेतौ विशेषणं न तथात्वे प्रतियोग्यसमानाधिकरणस्य हेतुतावच्छेदकावच्छिन्न

स्य हेतोर्हेतुतावच्छेदकसंबंधेन संबंधिनि येन केनापि संबंधेन वर्त्तमानो योऽभावस्तत्प्रतियोगितानवच्छेदकं यदिसर्थः

तु स्वपदमभावपरं न च साध्यसाधनभेदेन व्याप्तिभेदात् व्याप्यवृत्तिसाध्यकस्थले न्यविशेषणं सफलं अभावीयविशेषणता

संबंधेन साध्याभाववति साध्यप्रतियोगितावच्छेदकत्वान्यतरावच्छेदकसंबंधेन वा हेत्वधिकरणवृत्तित्वे वि स

णीस्वसाध्याभावस्य यथा कथंचित्संबंधेन हेत्वधिकरणवृत्तित्वमादाय व्यतिरेकसाध्यक मात्रे ऽव्याप्त्युद्धारेणैसंभवा

दितिवाच्यं तत्राप्यतद्विशेषणानुपादानेन साध्याभावस्याव्याप्यवृत्तित्व भ्रमेण हेतुसामानाधिकरण्यभ्रमेऽनु राम ४१

सा
मं
हे

मिसनुपपत्तेः हेतुसमानाधिकरणाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वग्रहे तादृशप्रतियोगितासामान्यस्य साध्य
तावच्छेदकावच्छिन्नत्वाभावग्रहासंभवात्। प्रकृतलक्षणे वक्ष्यमाणस्य तथैव विवक्षणीयत्वादिति भावः। स्वप्रतियोग्यस
समानाधिकरणत्वं च न स्वप्रतियोग्यधिकरणे केनापि संबंधेन वर्तमानत्वं संयोगी सत्त्वादित्यादावतिव्याप्तेः सत्तायां द्र
व्यसंयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात्। किंतु स्वप्रतियोग्यधिकरणे केनापि संबंधेन वर्तमानत्वसामान्याभा
वः तथा च सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तायां गुणादावेव संयोगसामानाधिकरण्यासंताभाववत्त्वमतो ना
तिव्याप्तिः एतेन द्रव्यं वाच्यं ज्ञेयत्वादित्यादौ तादृशाभावएवाप्रसिद्धेः मद्भावप्रतियोग्यसमानाधिकरणं यत्त्वमित्यपिनि
रस्तं सामानाधिकरण्यस्याव्याप्यवृत्तितया तावन्मात्राद्यभावस्यैव तादृशस्य प्रसिद्धत्वात् न च एवं केवलान्वय्यव्याप्यवृत्तित
या वह्निमान् धूमादित्यादावव्याप्तिः हेतुसमानाधिकरणस्य धूमसामान्याभावस्यापि धूमावयवावच्छेदेन प्रतियोगिसमा
नाधिकरणत्वाभावस्य धूमादौ सत्त्वादिति वाच्यं प्रतियोग्यधिकरणवर्तमानत्वसामान्याभावविशिष्टहेतुतावच्छेदका
वच्छिन्ने हेतौ तुतावच्छेदकसंबंधेनाधिकरणत्वस्य विवक्षितत्वात् इत्थं च वह्निमान् धूमादित्यादौ वह्न्यादिसामान्याभा
वस्य प्र तियोग्यधिकरणवृत्तित्वाभावविशिष्टहेतुतावच्छेदकावच्छिन्ने हेतौ हेतुतावच्छेदकसंबंधेनाधिकरणत्वमेवाप्र

सिद्धमतेऽभावान्तरस्यैव लक्षणघटकत्वान्नाव्याप्तिः केचित्तु प्रतियोगिसमानाधिकरणत्वमत्यन्ताभावविशेषणं
नचैवं कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिस्तदवच्छिन्नसंयोगी सत्त्वादित्यादावतिव्याप्तिः प्रतियोगिसामानाधिकरण्यस्या
व्याप्यवृत्तित्वाभ्युपगमाभावस्यैकत्र यो हेतुसमानाधिकरणकपिसंयोगाभावस्सोऽपि गुणे हि प्रतियोगिसमानाधिकरण
त्वादिति वाच्यं स्वप्रतियोगिसामानाधिकरण्यविशिष्टेऽभावे हेत्वधिकरणवृत्तित्वाविवक्षितत्वादित्याहुः
तदसत् विशिष्टस्यानतिरिक्ततया गुणाद्यन्यत्वविशिष्टसत्तायां गुणादिवृत्तित्ववत्प्रतियोगिसामानाधिकरण्याभा
व [redacted] विशिष्टकपिसंयो
गाभावस्यापि एतद्वृक्षवृत्तित्वात् । नच हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभाववत्त्वं विवक्षितमतस्तादृशाभावपरं च
हेतुसमानाधिकरणपदमिति वाच्यं कुसृष्टिकल्पनापत्तेः वस्तुतस्तु प्रतियोगिसमानाधिकरणत्वेन प्रतियोग्यधिकर
णवृत्तित्वाभावः सत्तायां गुणेन संयोगाभावप्रतियोगिसमानाधिकरणत्वमिति प्रतीतेर्गुणादौ सत्तानिष्ठतादृशसमा
नाधिकरणत्वस्यावच्छेदकतासंबन्धेनाभावविषयकतया सामानाधिकरण्यस्याव्याप्यवृत्तित्वेऽमानाभावेन संयोगिसत्त्वादि
त्यादावतिव्याप्तेः । किन्तु प्रतियोग्यनधिकरणं येन केनापि संबन्धेन वर्तमानत्वात् तदपि हेतुविशेषणेनत्वभाववि राम

शेषणं कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिर्न स्यात् हेतुसमानाधिकरणकपिसंयोगाभावस्यापि प्रतियोग्य
ग्य नधिकरणगुणादिवृत्तित्वविशिष्टस्यानतिरिक्ततया प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्याभावस्य हेत्वधिकरणवृत्ति
ताविरहस्य सत्त्वानिस्तारात् न च निरुक्तप्रतियोग्यनधिकरणवृत्तित्वस्य हेतुविशेषणत्वेपि वह्नेरपि स्वव्याप्यवृत्तितया
वह्निमान् धूमादित्यादावव्याप्तिः धूमादेर्धूमादिसमानाधिकरणवह्न्यादिसामान्याभावस्यापि प्रतियोग्यनधिकर
णाधर्मावयवाद्यवृत्तेः कपिसंयोगी एतत्त्वविशिष्टसत्त्वादित्यादावव्याप्तिः निरुक्तहेतुसमानाधिकरणो योऽभा
वः कपिसंयोगसामान्याभावः विशिष्टस्यानतिरिक्ततया तत्प्रतियोग्यनधिकरणगुणादिवृत्तिरपि हेतुतावच्छेदकवि
शिष्टहेतुस्तत्प्रतियोगितावच्छेदकत्वात् कपिसंयोगत्वस्यैतत्त्वावच्छिन्नहेतुतावच्छेदकावच्छिन्ने हेतौ हेतुतावच्छेदकसंबंधेना
धिकरणत्वस्य विरहितत्वात् एवं च वह्निमान् धूमात् कपिसंयोगी एतत्त्वविशिष्टसत्त्वादित्यादौ वह्निकपिसंयोगादिसा
क मान्याभावस्य प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेतुतावच्छेदकविशिष्टहेतौ हेतुतावच्छेदकसंबंधेनाधिकरणमेवाप्रसिद्धमिति विस
भावोत्तरस्यैव लक्षणघटकत्वात्तन्नाव्याप्तिः इत्थं च प्रतियोग्यनधिकरणं यद्धेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकविशि
ष्टहेत्वधिकरणं तद्वृत्त्येकेनापि संबंधेन न वर्त्तमानो योऽभावः इत्यभावोत्तरनिष्कर्षः प्रतियोग्यनधिकरणत्वप्रतियोगितावच्छे

१ प्रतियोग्यनधिकरणहेत्वधिकरणस्यैव प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वधिकरणतया वृत्तित्वपर्यंतमप्रवेशे गौरवात्

चिं०टी

५२

दक संबंधेनपत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसंबंधितद्व्यत्वं अन्यथाज्ञानवान्द्रव्यत्वात् वह्निमान्धूमादित्यादौ
समवायेनज्ञानवत्त्वादेः साध्यतायांइदंवाच्यत्वेयत्वादित्यादौ कालिकसंबंधेनवाच्यत्वादेः साध्यतायांचातिव्याप्यापत्तेः हे
तुसमानाधिकरणस्यसमवायसंबंधावच्छिन्नज्ञानवदन्योन्याभावस्यकालिकसंबंधावच्छिन्नगगनत्वाद्यभावस्यचाविषयत्वसं
षसं योगविशेषणताविशेषसंबंधेनप्रतियोग्यधिकरणमेवहेत्वधिकरणमितिस्वभावात् एवंताद्दशप्रतियोगितानवच्छेद
कत्वात् ज्ञानत्ववह्नित्ववाच्यत्वत्वादेः गुणकर्मान्यत्वविशिष्टसत्तावान्ज्ञातेः मनत्वमूर्तत्वभयवान्मूर्तत्वादित्यादा
वतिव्याप्त्यापत्तेः सर्वैः हेतुसमानाधिकरणस्यविशिष्टसत्तात्वावच्छिन्नाभावस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्य
धिकरणमेवहेत्वधिकरणमितिस्वभावात् एवंताद्दशप्रतियोगितानवच्छेदकत्वात् विशिष्टसत्तात्वादेः स्वविषयिता
स्वित्वनियामकसंबंधेनघटादेः साध्यतायांनित्यज्ञानत्वादिहेतौविषयित्वादिसंबंधावच्छिन्नपटाद्यभावस्यप्रतियोगिता
वच्छेदकसंबंधेनप्रतियोग्यधिकरणाप्रसिद्ध्याऽव्याप्त्यापत्तिरतोऽधिकरणत्वमपहायसंबंधितानुधावनं । केचित्तुप्रति
योग्यनधिकरणत्वे साध्यतावच्छेदकसंबंधेनपत्प्रतियोगितावच्छेदकावच्छिन्नस्यसंबंधितद्व्यत्वंनावृत्तमपि ज्ञानवान्द्र
व्यत्वादित्यादावतिव्याप्तिवारणसंभवादित्याहुः तन्न स्वविषयित्वकालिकविशेषणत्वादिसंबंधेनघटादेः साध्यतायांनि राम

१ तथाचसंयोगादिसंबंधावच्छिन्नपटाद्यभावमादायलक्षणसमन्वयइतिभावः ७२

समानत्वमहाकालत्वादिहेतावव्याप्त्यापत्तेः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणस्य स्वस्याप्यनावच्छेदकविषयि
तादिसंबंधेनाभावमात्रस्यैव प्रतियोगिसंबंधितयात्ताहशाभावाप्रसिद्धेः प्रतियोगितावच्छेदकसंबंधेन तद्यात्ताभि
धानेच संबंधात रावच्छिन्नाभावमात्रस्यैवप्रसिद्धिरित्यनुपदं वक्ष्यामः प्रतियोगि तावच्छेदकावच्छिन्नत्वंच
प्रतियोगितावच्छेदकतावच्छेदकसंबंधेन बोध्यं तेन गुणकर्मान्यत्वविशिष्टवत्सत्ताहित्यादौ हेत्वधिकरणस्य गुण
कर्मादेः स्वरूपसंबंधेन गुणकर्मान्यत्ववतः सत्तादेः समवायसंबंधेनाधिकरणेऽपि नाव्याप्तिः ननु तथापि प्रति
योगितावच्छेदकावच्छिन्नासंबंधित्वं किं प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्संबंधित्वं प्रतियोगि
दका तावच्छेदकावच्छिन्नसामान्यासंबंधित्वं वा प्रतियो गितावच्छेदकं यत्किंचित्स्वावच्छिन्नसामान्यासंबंधित्वं वा आद्येक
पिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः कपिसंयो [redacted] तियोगितावच्छेदकावच्छिन्नसामान्यासंबंधी हेतुसंबंधी
पर्वतादिरिति तत्र घटाभावनिष्ठस्याकाशाभावादिनिष्ठस्याभावाधिकरणकाभावत्वेनाधिकरणस्वरूपतया आका
शाभावादिरपि जलत्वाघटाभावप्रतियोगितासंबंधित्वात् पर्वतादेः न च व्याप्यत्वाद्यात्मकभावरूपाभाव एव ताहृशः

४ गतावच्छिन्नयत्किंचित्कपिसंयोगासंबंधित्वादेतद्वृक्ष स्यात् द्वितीये वह्निमान् धूमादित्यादावसंभवः यत एवमभावो नास्ति यस्य प्रति

भावत्वस्याभावस्याभावाधिकरणकत्वाभावादित्याशयः ९

६४ प्रसिद्धः इति वाच्यं । भावस्यापि स्वसमानाधिकरणान्योन्याभावाभिन्नत्वाभेदस्य च्चाधिकरणस्वरूपानतिरेकित
यात्र अन्योन्याभावं तत्सत्ति योगि संबंधि हेतु संबंधि वृत्तित्वात् । अन्योन्याभावा [illegible] सं ता भावस्याधिकरणातिरिक्त
त्वेऽपि अन्योन्याभावान्योन्याभावस्याधिकरणस्वरूपानतिरिक्तत्वात् न च यत्र भावाधिकरणकाभावस्या
न्योन्याभावान्योन्याभावस्याधिकरणस्वरूपत्वाभावादिसंताभावत्वनिरूपितप्रतियोगितावच्छेदकावच्छिन्न
सामान्यासंबंधित्वस्याविवक्षितत्वाद्वान्याप्रसिद्धिरिति वाच्यं तथापि सर्वेषामेव भावरूपाणामभावरूपाणां वाऽभा
वानां पूर्वक्षणादिपर्यन्तविद्धृत्तित्वविशिष्टस्वाभावासंताभावात्मकत्वस्य सर्वेषां सिद्धत्वपाततांकृशा … स्वाभावस्यप्र
तियोग्यधिकरणमेव हेत्वधिकरणमित्यप्रसिद्धेर्दुर्वारत्वात् पूर्वक्षणादिवृत्तित्वविशिष्टानां घटादिवृत्तित्वविशिष्टा
नां वा जलत्वाभावादीनामभावाभावस्य विशिष्टजलत्वाभावादेः केवलजलत्वाभावाद्यनतिरिक्तत्वात्तन्नीये
टत्वाभावो घटत्वाभावत्वादि स्यादेतादात्म्यसंबंधेनाभावसाध्यकेऽव्याप्तिः … प्रतियोगितावच्छेद
कावच्छिन्नासंबंधि हेतु संबंधि निरूप्यगवादिभेदस्य प्रतियोगितावच्छेदकत्वात् घटत्वाभाववादेः … न्नेयऽभा
वाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणस्वरूपानतिरे किंतु यागवादिभेदवर्तमानस्य घटत्वाभावादि एम

भेदस्पगवादिमेदरूपत्वात् कपिसंयोगाभावे साध्ये आत्मत्वइम्पत्वादिहेतावव्याप्ति स्यात् आत्मत्वादिसमानाधिकर
णकपिसंयोगाभावाभावस्य कपिसंयोगस्य गुणत्वसामान्याभावत्वसमवेतसामान्याभावत्वादिरूपस्य तत्किंचित्प्रति
योगितावच्छेदकावच्छिन्नसामान्यसंबंधितारा लोदेरिति भेवं। स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्य
संबंधिनिरूपकहेतुसंबंधिनिष्ठाभावनिरूपितायाप्रतियोगितातत्प्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्।
स्वपदं प्रतियोगितापरं। इत्थं च वह्निमान् धूमादित्यादौ जलत्वाद्यभावस्य जलत्वादिनिष्ठजलत्वावच्छिन्नप्र
तियोगिताव्यक्त्यपेक्षया तादृशप्रसिद्धः प्रतियोगिता वच्छेदकभेदेन प्रतियोगिताभेदात् तदनवच्छेदकं च
त्वा वह्नित्वादिकमिति नासंभवः घटत्वाभावो घटत्वाभावत्वादिस्वरूपो घट भावत्वावच्छिन्नघटत्वाभावनिष्ठगवादिभे
तादृशी दनिरूपिताप्रतियोगिताव्यक्तिर्नैकिंतु गवादिसामान्याभावनिष्ठैव सामान्याभाव त्वाद्यवच्छिन्नतदीयप्र
तियोगिताव्यक्तिरेव तादृशी तस्यानवच्छेदकमेव कपिसंयोगाभावत्वमिति नाव्याप्तिः वस्तुतस्तत्त्वावच्छेदकसं
बंधेन स्वावच्छेदकावच्छिन्नसामान्यसंबंधिनिरूपकहेतुसंबंधिका या प्रतियोगिता तदनवच्छेदकं यदित्येव विवक्षणीयं। अ
भावनिवेशप्रयोजनविरहादिति तादृशीया प्रतियोगितातस्यात् अपायत्वेन समं सामानाधिकरण्यमित्युक्तावसंभवः वह्नि

४ व तत्प्रतियोगितानवच्छेदकत्वस्य घटत्वाभावत्वसत्त्वान्नाव्याप्तिः कपिसंयोगाभाववान् आत्मत्वादित्यादौ ४

मान् धूमादित्यादौ सर्वेषामेव हीनो तत्तद्व्यक्तित्वाभावत्वाद्यवच्छिन्नप्रतियोगितायाः तादृश्याः स्वाश्रयत्वादेरवच्छेदका
नुधावनं । नन्वेवमपि वह्निमान् धूमादित्यादावसंभवः वह्नित्वादेर्महानसीयत्वविशिष्टवह्नित्वाद्यवच्छिन्नप्रतियोगिता
याः तादृश्या अवच्छेदकतावद्विशिष्टसावच्छेदकत्वेन तद्घटकतया विशेष्यस्याप्यवच्छेदकत्वात् अथैवमवच्छेदकत्वपर्याप्त्या
न ख्यसंबंधेनावच्छेदकताशून्यत्वं तथा च वह्नित्वादिकं केवलं महानसीयत्वविशिष्टवह्नित्वाद्यवच्छिन्नप्रतियोगिताया अवच्छेद
कतापर्याप्त्यधिकरणमतो नासंभवः न चैवं दण्डिमान् दण्डिसंयोगादित्यादौ नानाव्यक्तिकसाध्यतावच्छेदकस्थलेऽव्या
प्तिः साध्यतावच्छेदकीभूतानां सर्वेषामेव दण्डानां चालनीन्यायेन दण्डिसंयोगवन्निष्ठतत्तद्दण्डावच्छिन्नप्रतियोगिताकं
वच्छेदकतया दण्डव्यक्तीनां पर्याप्त्याख्यसंबंधेनावच्छेदकत्वविरहात् । न च तद्दण्डत्वयोरप्यव … शयमवच्छेदककोटिप्रविष्ट
त्वादिति चेन्न तथा सति महानसीयत्वविशिष्टवह्निमान् धूमादित्यादावतिव्याप्तेः वह्नित्वस्य पर्याप्त्याख्यसंबंधेनावच्छे
दकताशून्यतया महानसीयत्वविशिष्टवह्नित्वस्यापि तथात्वात् महानसीयत्वविशिष्टवह्नित्वस्य वह्नित्वानतिरिक्त
डि त्वात् तद्दण्डमान् दण्डिसंयोगादित्यादावतिव्याप्तेश्च नासदण्डोपाध्यतिरिक्तपदार्थस्य स्वरूपतोऽभावप्रतियोगितानवच्छे
दकतया साध्यतावच्छेदकीभूततत्तद्दण्डव्यक्तेरपि पर्याप्त्याख्यसंबंधेन तादृशप्रतियोगितावच्छेदकता … शून्यत्वादिति । मैवं रम
ऽक्तव्याप्त्यादिति भावः
६ तत्तद्दण्डाभावप्रतियोगितायाः तादृश्याः अवच्छेदकतापर्याप्त्यधिकरणत्वादिति वाच्यं ज्ञातस्वं दण्डोपाधिव्यतिरिक्तपदार्थस्य स्वरूपतो

भावप्रतियोगितान

स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यसंबंधिनिरुक्तहेतुसंबंधिकायाः प्रतियोगितातत्प्रतियोगिनासा
मान्ये यद्धर्मपर्याप्तावच्छेदकताकत्वाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात् यद्रूपेण यस्य सा
ध्यतावच्छेदकत्वं तत्र तेन रूपेण तदेव तद्धर्मपदेन ग्राह्यं॥ एवं च वह्निमान् धूमादित्यादौ धूमवन्निष्ठमहानसीयवह्नि
त्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायाम् महानसीयत्वविशिष्टवह्नित्वपर्याप्तावच्छेदकताकत्वेपि शुद्धवह्नि
त्वे सैव साध्यतावच्छेदकतया शुद्धवह्नित्वपर्याप्तावच्छेदकताकत्वविरहान्नासंभवः महानसीयत्वविशिष्टवह्निमान्
धूमादित्यादौ च धूमवन्निष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायास्तादृशप्रतियोगितान
गतनत्वस्य साध्यतावच्छेदकीभूतमहानसीयत्वविशिष्टवह्नित्वपर्याप्तावच्छेदकत्वान्नातिः [redacted] व्याप्तिः एवं ह्रदिमान् न
द्रव्यसंयोगादित्यादौ ह्रदसंयोगवन्निष्ठतद्व्यभावप्रतियोगितायास्तादृशप्रतियोगितान्तर्गता या ह्रदत्वह्रदपर्याप्तावच्छे
दकताकत्वाभावस्तथापि तद्ह्रदत्वविशिष्टह्रदव्यक्तेरेव साध्यतावच्छेदकतया तादृशतद्व्यक्तिपर्याप्तावच्छेदकता
व्याप्यजातौ नाचालनी [redacted] पन्यायेन द्रव्यसमवायिनि वर्तमानस्य स्वरूपतः पृथिवीत्वजलत्वादिरूपद्रव्यत्वव्याप्य

२ त्वे व्याप्तिः। इति तेन द्रव्यत्वव्याप्यजातिमद्वान् द्रव्यसमवेता दित्यादिना नाजा तिसाध्यतावच्छेदकस्थले ऽव्याप्तिः साध्यतावच्छेदकीभू
ति

पर्याप्तिनिवेशेन

४ विशिष्टजातेरवच्छेदकत्वे पर्याप्त्यधिकरणत्वेनास्तु इत्यत आह

तत्तत्कालावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकता पर्याप्त्यधिकरणत्वात् जातिसखण्डोपाध्यतिरिक्तपदा
५८ र्थस्य वस्तुस्वरूपतोऽवच्छेदकानभ्युपगमादित्यपि परास्तं। महानसीयत्वविशिष्टवह्निमान् धूमात्॥ न हि वह्निमान् इति संयो
गादिसाध्यकत्वे व्याप्तिवारणाय यथोक्तविवक्षाया आवश्यकत्वेन तत एवाव्याप्त्यापत्तेर्निरासात् स्वरूपतः पृथिवीत्वज
न्यलाघवावच्छिन्नप्रतियोगिताप्रवेशे त्वयाप्युजातित्वविशिष्टस्य तावच्छेदकताकत्वाभावात्॥ नैवं विवक्षणे घ्राण
ग्राह्यगुणवान् पृथिवीत्वादित्यादौ लघुसमनियतगुरुरूपेण साध्यतायामव्याप्तिः स्वरूपसंबन्धरूपावच्छेदकत्व
स्य संभवति लघुधर्मे गुरुत्वाभावेन घ्राणग्राह्यगुणत्व निष्ठावच्छेदकत्वाप्रसिद्धेः लाघवात् धत्वस्यैव प्रतियोगिताव
च्छेदकत्वात्॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वप्रवेशे सत्तावान् जातेरित्यादौ चाव्याप्तिः विशिष्टसत्ता लाघवच्छि
न्नप्रतियोगितायामनतिरिक्तवृत्तित्वात् सत्तात्वे इति वाच्यं लघुसमनियतगुरुरूपेण साध्यतायामव्याप्तित्वात्
घि न एव गुरुधर्मेनैकरूपेणतावच्छेदकः तन्निष्ठपर्याप्तावच्छेदकत्वाप्रसिद्ध्यातेन रूपेण व्यापकत्वविरहात्॥ पर्याप्त
व्यापकतायाश्च कारणतावच्छेदकत्वात्। अन्यथा गुरुधर्मरूपेणापि व्यापकत्वेऽकार्यत्वविहितपर्वत्वव्यापकताव
च्छेदकान्यथासिद्धनिरूपकधर्मस्यैव कारणतावच्छेदकतया गुरुधर्मस्यापि कारणतावच्छेदकत्वे कम्बुग्रीवादिमा

क
१ त्त्वापत्तेः गुरुधर्मस्य कार्यतावच्छेदकत्वं तु तत्तद्घटित व्याप्तस्य गौरवेण कार्यतापदार्थत्वविरहात्। वस्तुतस्तु लघुसमनियतगुरुधर्मस्य ज्ञापक

न्याप्ती त्वबाधितप्रतीतेः प्रतियोगितायाः अवच्छेदकत्वम् । सेत्वेनहितत्वाति ते स्तस्प्रतियोगिकाभावमात्रं विषयः तथाविध
धर्मविशिष्टत्वेपि तादृशप्रतीत्युपपत्तेः गुरुधर्मस्य कारणतानवच्छेदकत्वे चावश्यक्लृप्तनियतपूर्ववर्तिसहभावादिवत्
गौरवस्यापि स्वातंत्र्येणान्यथासिद्धिसंपादकत्वात् ॥ यच्च कार्याव्यवहितपूर्वत्वव्यापकतावच्छेदकान्यथासिद्धिनिरूपकधर्मस्यै
वनकारणतावच्छेदकत्वमपि तु तादृशधर्मवत्त्वरूपस्यातिरिक्तस्य वा पदार्थरूपस्य वा कारणत्वस्य स्वरूपसंबंधविशेषरूपाव रू
च्छेदकत्ववत एव कारणतावच्छेदकत्वं ॥ तथा च लघुसमनियतगुरुधर्मस्य प्रतीतिबलात् भावप्रतियोगितायाः स्वरूप
संबंधरूपावच्छेदकत्वेपि पर्याप्तिरूपायाः कारणतायाः स्वरूपसंबंधरूपावच्छेदकत्वविरहादेव न कारणतावच्छेदकत्व
न चैवं दंडत्वादेर्लघुधर्मस्यापि कारणतायाः तादृशावच्छेदकत्वे मानाभा [illegible] वः कारणतावच्छेदकधर्मवत्त्वस्यैव का
रणतारूपत्वेन दंडत्वस्यैव कारणतारूपतया स्वस्य स्वावच्छेदकत्वासंभवाच्चेति वाच्यं दंडत्वेन दंडं कारणमित्यादिप्रतीति
रेव मानत्वात् प्रतीतिबलात् स्वस्यापि धर्मांतरविशिष्टस्यावच्छेदकत्वाच्चेत्यवधेयम् तथाप्यसंभवः वह्निमान् धूमादि
त्यादौ धूमादिसमानाधिकरणवृत्त्यभावमात्राभावप्रतियोगितायाः तादृशसमवायादिकिंचित्संबंधावच्छिन्नत्वं स्यादि
सामान्यान्यताभावप्रतियोगितायाश्च तादृशप्रतियोगितावच्छेदकताघटितत्वात् साध्यतावच्छेदकसंबं

वि-टी- धावच्छिन्नत्वेन प्रतियोगिताव्यक्तयो विशेषणीया। [redacted]: स्वावच्छेदकसंबंधेनेति स्वीनसाध्यतावच्छेद-
कसंबंधेनेति वा वक्तव्यमिति वाच्यं। तथा सति कालिकसंबंधेन घटादेः साध्यके कालपरिमाणादिहेतावव्याप्त्यापत्तेः तत्र
४० व स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नासंबंधिनिरूक्तहेतुसंबंधिका याः साध्यतावच्छेदककालिकसंबंधावच्छिन्नप्रतियो-
गिता याः साध्यतावच्छेदककालिकसंबंधेन स्वावच्छेदकावच्छिन्नसंबंधिनिरूक्तहेतुसंबंधिकाया प्रतियोगिताया अप्र-
सिद्धत्वात् निरूक्तहेतुसंबंधिनो महाकालस्य कालिकसंबंधेन वृत्तिमन्मात्रस्यैवाधारत्वात् न च कालिकसंबंधावच्छेदेन गगना-
द्यभावप्रतियोगितैवनाप्रसिद्धा तस्याः स्वावच्छेदककालिकसंबंधेन स्वावच्छेदकगगनत्वाद्यवच्छिन्नासंबंधित्वस्य
हेतुसंबंधिनि महाकाले सत्वात् महाकालस्य गगनाद्यसंबंधित्वादिति वाच्यं। कालिकसंबंधेन गगनवृत्तित्वे महाकाल-
स्य कालिकसंबंधेन गगनादेरपि संबंधित्वात्। तेन संबंधेन गगनादेरवृत्तित्वे तु तेन संबंधेन गगनत्वाद्यवच्छिन्नसंबंधेवाप्र-
सिद्धिस्तु भूपपापि कालिकसंबंधावच्छिन्नगगनाद्यभावप्रतियोगितामादाय प्रसिद्ध्यसंभवात् किंच यदवान्तिसत्ता-
न्तत्वादि साध्ये विषयितासंबं [illegible] धेन घटादिसाध्यके विषयितासंबंधावच्छिन्नगगनाद्यभावप्रतियोगितामादाय प्रसि-
द्धिसंभवे विषयितया गगनादेरपि निरूक्तानेसत्वादिति। मैवं। स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामानाधिकर-
१ सामान्यासंधिनिरूक्तहेतुसंबंधिकप्रतियोगिता सामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्वद्वमिनिरूपपर्याप्त्यावच्छेदकत्वोभययाभावः तद्धर्मो

एवस्य विवक्षितत्वात्॥ इत्थं च घटवान् कालपरिमाणादित्यादौ समवायादिसंबंधावच्छिन्नघटाद्यभावप्रतियोगिताकाप्र
येवप्रसिद्धिः॥ एतेन घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः घटत्वसमानाधिकरणसंयोगत्वाभावादेर्घटत्वाभावनिष्ठप्रति
तियोगितायाघटत्वाभावात्वा ... घवच्छेद्यत्वात्॥ अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणस्वरूपान्
तिरेकितया गोत्वाभावादिनिष्ठपटत्वाभावादिभेदस्य गोत्वाभावादिरूपत्वेन घटत्वाभावस्यापि गोत्वाभावादिप्रतियोगि
त्वौ व्यक्तेः घटत्वाद्यभावत्वावच्छेद्यत्वेपि साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावेनोभयाभावसत्वात्॥ ...एवमपि घवान्
निसत्वानत्वादित्यादौ वृत्त्यनियामकविषयितादिसंबंधेन साध्याभावाप्रसिद्ध्याव्याप्तिः तादात्म्यातिरिक्तवृत्त्यनियामकसंबंध
मात्रस्याभावप्रतियोगितानवच्छेदकत्वेन तत्र साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्याप्रसिद्धत्वात् परिचरत्वनियामकवि
षयितादिसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेपि घटरवम्... नाम्पनाभावादेः प्रतियोगितावच्छेदकत्वावच्छेदकत्वमस्ये
वेत्यभावप्रतियोगितावच्छेदकतायामेव तत्त्वच्छिन्नत्वंप्रसिद्धमित्युच्यते न ता... पिवृत्त्यनियामकविषयितादिसंबंधेन साध्य
तायां घटवत्त्वानत्वादित्यादावतिव्याप्तिः वृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेन तान... समानाधि
करणभावप्रतियोगितायां विषयितादिसंबंधावच्छिन्नत्वघटत्वाद्यवच्छिन्नत्वोभयाभावसत्वादिति चेन्न। वृत्तिनियामक
५ न्॰ तत्प्रतियोगिताव्यक्तेः स्वावच्छेदकतादात्म्यसंबंधेन स्वावच्छेदकावच्छिन्नासंबंधित्वस्यापि हेतुसंबंधिनि सत्वाच्चेति प्राचां १८

चिन्ता-टी

४८

संबंधावच्छिन्नत्वस्य नियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वान्नैनैव मपि तादात्म्यसंबंधेन [illegible]तापंघयोर्द्रव्यत्वा
दित्यादावतिव्याप्तिः मूलोक्तलक्षणकाले ऽसंभावावयवत्वेन अत्यंताभाववन्निरूपितप्रतियोगिताया एव लक्षणघटकतया
तादृशप्रतियोगितासामान्ये तादात्म्यसंबंधावच्छिन्नत्वघटत्वाद्यवच्छिन्नत्वोभयाभावसत्त्वादिति वाच्यं॥ अत्यंताभावत्वस्य
विशेषणे न विरहेणानुपादे यत्वात्॥ न च तथापि संयोगादिसंबंधेन द्रव्यत्वादिसाध्यके द्रव्यं पृथिवीत्वादित्यादावति
व्याप्तिः संयोगसंबंधावच्छिन्नद्रव्यत्वाभाववन्निरूपितप्रतियोगिता व्यक्तेः स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसंबंधि
नोऽप्रसिद्धेः किं त्वभाववृत्तीयप्रतियोगिता व्यक्तय एव तथा च तत्संयोगसंबंधावच्छिन्नत्वद्रव्यत्वत्वावच्छिन्नत्वोभयाभा
वसत्त्वादिति वाच्यं। तदवच्छिन्नसामानाधिकरण्यस्थलेनैव तन्निरासात् साध्यतावच्छेदकसंबंधेन तदवच्छिन्नसंबंधिनि हेतु
तावच्छेदकसंबंधेन हेतोर्वृत्तित्वस्य तदर्थत्वात्। साध्यतावच्छेदकसंबंधहेतुतावच्छेदकसंबंधघटितसाध्यसामानाधिकर
ण्यज्ञाने संबंधांतरेण साध्यसामानाधिकरण्यज्ञाने वानुमितेरनुदयात्। तादात्म्यादिरूप्यनि यामकसंबंधेन साध्य
वति हेतुत्वे व्याप्तिव्यावर्त्तकाधिकरणत्ववृत्तित्व मपहाय संबंधित्वप्रवेशः। न च तथापि व्यापकतां स्थलम त
तिव्याप्तिमव स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्याभावसंबंधिनिरूपितहेतुसंबंधिकप्रतियोगितासामा

रामः

४८

६ ज्ञानमनुमितिहेतुः न तु समवायादिसाक्षात्संबंधेनेत्यभ्युपगमात्। धूमत्वादेस्तत्संबंधता च तदाश्रयवृत्तित्वसंबंधेन रासभ

न्यसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयद्धर्मपर्याप्तावच्छेदकताकत्वोभयाभावस्तद्धर्मावच्छिन्नत्वं व्यापकत्वमिति तस्यैव व्यापक
तात्वत्तया परामितिकायां साध्यतावच्छेदकसंबंधेन सवृत्तित्वे सति सनेनापि व्यापकतालक्षणे विशेषणीयत्वात् साध्यतावच्छे प
दकसंबंधाश्रयवृत्तित्वेन व्यापकतावच्छेदकधर्मो वा विशेषणीयः तेन द्रव्यत्वादेः संयोगसंबंधेन प्रमेयत्वादिरूपेण पृ
थिवीत्वादिव्यापकत्वाभ्युपगमेऽपि न क्षतिः न च प्रतियो गिसामानाधिकरण्यं हेतुसामानाधिकरण्यं साध्यसामानाधिक
रण्यं इत्येषु सर्वत्रैव संबंधित्वस्यैव अवेयोऽधिकरणवृत्तित्वयोरप्रवेशात् संयोगेन गगनादेर्द्रव्यत्वादिव्याप्यत्वं पृथि
वीत्वादेः संयोगेन गगनादिव्याप्यत्वं स्यात् पृथिवीत्वाधिकरणे संयोगेन गगनाभावसत्वेऽपि तस्य संयोगेन तदीयप्रतियो
गितावच्छेदकावच्छिन्नसंबंधित्वादिति वाच्यं॥ इष्टत्वात्। नन्वेतावता धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नसंयोगि
संयोगित्वादेरेव व्याप्तिः मिते पर्यवसिते तादृशप्रतियोगित्वस्य समवायसंबंधेन रासभादावपि वृत्तत्वात् कारकाद्यपि वह्न्यनुमिसा
पत्तिः न्यायनयेऽतिरिक्तावच्छेदककव्याप्यत्वपरामर्शस्याप्यनुमितिहेतुत्वात्तेन चेष्टापत्तिः रासभलिंगकस्यानुमिते
र्व्यापकांशेऽभ्रमपरामर्शजन्यत्वनियमादिति वाच्यं॥ तादृशसंयोगित्वादिरूपव्याप्तेः स्वघटकीभूतधूमत्वादिसंबंधेनैव
धूमवत्त्वं प्रमात्वनुमितिरित्यत एव केचित् तादृशसंयोगिवह्निधूमत्वादिकमेव व्याप्तिः ननु तादृशसंयोगित्वादिमात्रं
तादृशसंयोगिवह्निधूमत्ववद्रासभवान्वर्तत इति भ्रमपरामर्शादनुमितिरित्यत एव तस्याः तत्र तलाघवाद्धूमत्वादि

५ दोऽव्यभिचारित्वापि सत्त्वात् रासभादेः समवायेन तद्वत्तापरामर्शात् धूमव्यापकव्यापकवह्निसमानाधिकरणरासभ ५

[illegible]

संबंधेन नाद्दशप्रतियोगित्वादेरेव व्याप्तित्वस्योचितत्वात्। ननु तथापि कपिसंयोगी एतत्वादित्यादावव्याप्यवृत्तिसाध्य
केः व्याप्तित्वं स्वरूपा समवायसंबंधावच्छिन्नकपिसंयोगत्वावच्छिन्नप्रतियोगिताया अपि तादृशप्रतियोगितासामान्यान्तर्गं
तत्वेन तन्निष्ठायास्तावच्छेदकसंबंधावच्छिन्नत्व कपिसंयोगत्वावच्छेद्यतोभयाभावविरहात्। न च समवायावच्छिन्नकपि
संयोगत्वावच्छिन्नप्रतियोगितायाः स्वावच्छेदकसमवायसंबंधेन स्वावच्छेदककपिसंयोगत्वावच्छिन्नसंबंधिभिन्नत्वे
वन्निहत्वाधिकरणमेतद्धस्तइति न तस्यास्तादृशप्रतियोगितान्तर्गतत्वमिति वाच्यं। कपिसंयोगस्याव्याप्यवृत्तितया
तदत्यंताभावस्यैतद्धर्मिन्नत्वस्यापि मूलावच्छेदेन वृत्तेः सत्वात्॥ अव्याप्यवृत्ति .मतामोऽन्याभावस्याप्यव्याप्यवृत्ति
[redacted] त्वादिति चेन्न। कपिसंयोगादेरव्याप्यवृत्तित्वेऽपि तत्संबंधिता [redacted] नो व्याप्यवृत्तिरतः कपिसंयोगत्वावच्छिन्नसं त्ते
बंधिभिन्नत्वं नैतद्धस्वरूतियं यद्दृतोभिप्रायात् अव्याप्य [redacted] वृत्तित्वेऽपि तद्धर्मान्योन्याभावो नाव्या
प्यवृत्तिरित्यभिप्रायाद्वा न चायोन्याभावस्याव्याप्यवृत्तितामिति वक्ष्यमाणत्वादिति मन्तव्यं तु रहस्यं। स्वतेन्नात्स्वा
वच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसंबंधिभिन्नत्वेन हेतुसंबंधिनो न विशेषणीयाः किंतु निरुक्तहेतुसंबंधिनि

वृत्तेरत्यंताभावस्याव्याप्य ३

रवच्छिन्नवृत्तिमान् योऽभावस्तत्प्रतियोगितासामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्व यद्धर्मपर्याप्तावच्छे
दकतोभयाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यमेव व्याप्तिर्वक्तव्या। इत्थं चाव्याप्यवृत्तिसंबंधितत्वाव्याप्यवृत्तिमद
न्योन्याभावयोरव्याप्यवृत्तित्वेपि नक्षतिः। वह्निमत्त्वाभावीयविशेषणताविशेषसंबंधेन वक्त्यमानेन सत्तावान्ज्ञा
नेरित्यादौ समवायसंबंधावच्छिन्नसत्तासामान्याभावादेर्विषयित्वाप्यत्वादिसंबंधेनेहव्यधिकरणज्ञानादौ व
र्तमानत्वेपि नक्षतिः। अखंडाभावानभ्युपगमे व्याभावयोरभावस्य च प्रतियोगितावच्छेदकस्वरूपः किंतु तिरिक्तः। तेन घ
टत्वसंख्याभाववान् घटान्योन्याभाववान्वा द्रव्यत्वादित्यादौ नातिव्याप्तिः। यद्वा निरुक्तहेतुसंबंधिनिष्ठावच्छेदक
संबंधेन स्वावच्छेदकावच्छिन्नसंबंधध्वनिरूपितवृत्तिमत्तानिरूपितप्रतियोगितासामान्ये साध्यतावच्छेदकसंबंधावच्छि
न्नत्वपर्याप्तावच्छेद्यत्वोभयाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिः स्वपदं प्रतियोगिनापरं। प्रथमसप्तम्य
न्तं वृत्तिविशेषणं। इत्थं च संबंधविशेषणमपि विवक्षणीयमपि नक्षतिरिति प्राहुः। एतेन तत्प्रचावितेन। वह्निमान् धू
मादित्यादौ व्याप्तिः संयोगावच्छिन्नतत्तद्वह्नित्वावच्छिन्नप्रतियोगिताव्यक्तीनामेव तादृशप्रतियोगितासामान्यां
तर्गतानां साध्यतावच्छेदकसंयोगसंबंधावच्छिन्नत्ववह्नित्वावच्छेद्यत्वोभयसत्तान्तानचवह्नित्वस्यापि तत्तद्वह्नित्वाव
२ तत्र प्रतिबद्धत्वमात्रमादाय पूर्वपक्षग्रन्थो न काममव्याप्तिमुद्धरति अन्यनिष्ठेति। एतेनावच्छेदकानुधावनस्य व्यावृत्तिः स्यात्तनोद्भिता। ननु
२ तावच्छेदकं सामान्यमेव। अन्यथाऽभावप्रतियोगितावच्छेदकमेव न तत्स्यात्। तथा च वह्निमान्धूमादि २

च्चिन्नाट\

५० च्छिन्नप्रतियोगिताव्यक्तिनामवच्छेदकेषु तत्प्रतियोगिताव्यक्तयो नताद्दशप्रतियोगितासामान्यांतर्गताहेतुसंबं
क धिनः एवं तादृशात्माकशादेर्धूमत्वावच्छेदेसंयोगसंबंधेनतद्वेछेदकवह्नित्वावछिन्नसंबंधत्वात् अपितुविषयित्व को
त्वदिद्धि·स्थितविशेषणत्वादिसंबंधावछि[redacted]न्नप्रतियोगिताकवह्निघटाभावप्रतियोगितेचताद्दशप्रतियोगिता
त सामान्यांतर्गताश्चेसाध्यतावछेदकसंयोगसंबंधावछिन्नत्ववह्नित्वावछिघत्वोभयाभावस्यसत्वान्नाव्याप्तिरि
ता तिवाच्यं विशेषप्रतियोगितांमेवसामान्यधर्मावछिन्नत्वेस्वावछेदकसंबंधेनस्वावछेदकपर्यवसितावछिन्ना
संबंधित्वमेवहेतुसंबंधिनोविशेषणवक्तव्यं ॥ अन्यथाधूमवान्वह्नेरित्यादौ अतिव्याप्तेः संयोगसंबंधावछि
न्नधूमत्वावछिन्नप्रतियोगिताव्यक्तीनांस्वावछेदकसंयोगसंबंधेनस्वावछेदकद्रव्यत्वसत्तादिरूपसामान्यध
र्मावछिन्नसंबंधेवनिखिलहेतुसंबंधीकिंतुविषयतादिसंबंधावछिन्नधूमघटाघभा[redacted]वप्रतियोगितावक्तीनामेवस्वावछेदकसंबंधेनस्वावछेदकावछिन्नसंबंधिहेतुसंबंधीतत्रसाध्यता
वछेदकसंबंधावछिन्नत्वधूमत्वावछिन्नत्वोभयाभावसत्वात् ॥ इत्थंचवह्निमान्धूमादित्यादौतत्तद्वह्नित्वाव राम
५०

छिन्नप्रतियोगितानामप्रसिद्धतद्वह्नित्वरूपविशिष्टत्वावच्छेदकावच्छिन्नासंबंधीभवत्वेवधूमसंबंधीत्वव्याप्तिर्दुर्वा
रैवेत्यत आह। धूमवतीतिप्रत्यये वैलक्षण्यमेकोर्थः इत्यप्रतीतेरिति। इति वह्नित्वावच्छिन्नप्रतियोगिताकाभावत्वविशे
ष्यतावच्छेदककधूमवद्वृत्तित्वप्रकारकप्रतीतेः धूमवद्वृत्तित्ववह्नित्वावच्छिन्नप्रतियोगिताकत्वाभयांशे एव यथार्थत्व
भ्रमत्वयोरापत्तेरित्यर्थः॥ वह्नित्वावच्छिन्नप्रतियोगिताकानां तत्तद्वह्नित्वावच्छिन्नाभावानां सर्वेषामेव धूमवद्वृत्तित्वादिति
भावः सामान्यावच्छिन्नप्रतियोगिताकवह्नित्वावच्छिन्नप्रतियोगिताकः प्रत्येकं तत्तद्वह्नित्वावच्छिन्नप्रतियोगिता
म कातिरिक्त एव। न च तत्प्रतीतौ वह्न्यंशे वह्निविशेषाभावो विशेष्ये इति मत्वमप्रमात्वं चेति वाच्यं। तथापि पावकत्वं धूम भ्रा
वद्वृत्तीति प्रतीतिवत् प्रमात्वभ्रमत्वापत्तेर्दुर्वारत्वात्। एतेन स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन वह्नित्ववह्नित्वावच्छिन्न
प्रतियोगिताकत्वसंबंधेन वह्निर्व्याप्यत्वस्य वृत्तिः तच्चैतेन संबंधेन विशेषाभावकूट एव पर्याप्त इति। ननु प्रत्येकाभा
व इति तत्प्रतीतेर्भ्रमत्वं प्रमात्वं चेत्यपि परिनिरस्तं। तथापि पावकत्वस्य व्याप्यत्ववृत्तित्वेपि पावकत्वं धूमवद्वृत्तीति प्रतीति
वत् तत्प्रतीतेः प्रमात्वभ्रमत्वापत्तेर्दुर्वारत्वात्। न च वह्न्यंशे वह्निविशेषाभावाधिकरणवृत्तित्वविशेषाभावस्य तत्र वि
शेष्यतया भ्रमत्वं प्रमात्वं चेति वाच्यं। विशिष्टेनान्यस्य तत्रानुल्लेखात् तदुल्लेखेपि विशेष्यस्यानतिरिक्ततया गुरुण्यगु

५२ कर्मान्यत्वविशिष्टसत्त्वेति तत्र प्रमात्वभ्रमत्वापत्तेर्दुर्वारत्वाच्च ॥ एतेन यथा विशिष्टसत्तायाः सत्तानतिरेकेऽपि वि
शिष्टसत्तात्वावच्छिन्नाधारतानवगुणादौ तथा तत्तद्घटाभावानामेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वेऽपि वह्नि
त्वावच्छिन्नप्रतियोगिताकत्वावच्छिन्नानां तेषामाधारता न धूमवतीत्येतन्मती तेर्भ्रमत्वमभ्रमप्रमात्वे वेत्यपि निरस्त
।न यथापि गुणे गुणकर्मान्यत्वविशिष्टसत्तेति विशिष्टसत्ताया गुणाधेयत्वावगाहिप्रतीतेः प्र मात्वादिवत् धूमवति
वह्निर्नास्तीति धूमाद्याधेयतावगाहिप्रतीतेः प्रमात्वाद्यापत्तेर्दुर्वारत्वात् ~~कथं स्वावच्छिन्नतत्प्रतियोगिताकत्व~~
~~संबंधेन वह्नित्ववह्नित्वावच्छिन्नतत्प्रतियोगिताकसंबंधेन [illegible]~~ । न च स्वावच्छि
न्ननतत्प्रतियोगिताकत्वसंबंधेन वह्नित्ववह्नित्वावच्छिन्नतत्प्रतियोगिताकसंबंधेन वह्निर्नास्त्यव्याप्यवृत्तिः तच्च ज
लह्रदाद्यवच्छेदेनेव विशेषाभावे एवं तेनात्यन्ताभावाधिकरणावच्छेदेनेति न तत्प्रतीतेः प्रमात्वमिति वाच्यं ॥ तावता
धूमवति वह्नित्वादेरवच्छेदकत्वावगाहिप्रतीतेरप्रमात्वापत्तावपि विशेषणताविशेषावच्छिन्नाधेयतासंबंधेन धू
मवत्प्रकारकवह्नित्वावच्छिन्नप्रतियोगिताकाभावविशेष्यकयथोक्तप्रतीतेः प्रमात्वापत्तेर्दुर्वारत्वात् । अन्यथा गुणे
हेः सत्तानिष्ठद्रव्यवृत्तित्वानवच्छेदकतया द्रव्यवृत्तिसत्ता गुणे इति प्रतीतेरप्यप्रमात्वापत्तेः । न च यथा गुणादौ विरहा एम ५१

१ एतत्कर्मान्यत्वविशिष्टसत्तावान् गुण इति प्रतीतिर्न प्रमा । विशिष्टसत्तायाः सत्तानतिरेकेऽपि विशिष्टसत्तात्वावच्छिन्नाधारता या गु १
ते

त। गुणेगुणेकर्मान्यत्वविशिष्टसत्तेति आधेयताबुद्धिप्रतीतिश्च प्रमैव तथेहापि घटवान्वह्निसामान्याभाववानि
ति प्रतीतिर्न प्रमा तत्र वह्न्यभावानामेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वेपि तेषां तद्वत्त्विनाधारतया धूमवति विर
हात् धूमवति वह्निर्नास्तीत्याधेयताबुद्धिप्रतीतिश्च प्रमैव न तु भ्रमः इति वाच्यं। अननुभवापलापात् एवमनुभवा
पलापे एकस्यैवाभावस्य घटपटयोगत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्य स्वतन्त्रपात्र अभावमात्रेऽभेद इति लाघवापप
त्तेः घटवान्घटसामान्याभाववानिति प्रतीतिर्न प्रमा घटवति घटसामान्याभावत्वावच्छिन्नाधारतार्हात घटवतिघ ताविर
टो नास्तीत्याधेयताबुद्धिप्रतीतिश्च प्रमा भवत्येवेति क्रमेणानुभवापलापस्य सर्वत्र सुकरत्वादिति भावः। के
चित्तु विशेषाभावेष्वनन्तेषु सामान्यावच्छिन्नप्रतियोगिताकत्वसंबंधकल्पनापेक्षया लाघवादतिरिक्त एकाभाव
एव तत्संबंधः कल्प्यते। न च तथाप्यनन्ताधिकरणेष्वतिरिक्ताभावस्य संबंधकल्पनमिति तुल्यमतिरिक्ताभावस्य
क तत्र सामान्यावच्छिन्नप्रतियोगिताकत्वसंबंधस्य च कल्पनं पुनरधिकमिति वाच्यं। अतिरिक्ताभावस्यानन्ताधिक
रणेषु संबंधकल्पनायाः फलमुखत्वादित्याहुः तदसत् अणुरपीति न्यायेन फलमुखगौरवस्यापि दोषत्वात् किंच
सामान्यावच्छिन्नप्रतियोगिताकत्वस्य संबंधः किं तत्स्वरूपोऽतिरिक्तो वा। आद्ये तत्तद्वापि कल्प्यत्वात् अत एव ना

स्य तथापि विशेषणताविशेषरूपस्य संबंधस्य साधारणस्यैकत्वेन न चापि क्लृप्तत्वात्। एतेनानंतविशेषाभावे
षु घटेनास्तीत्यादिप्रतीतिविषयताकल्पनाम् अपेक्ष्य लाघवादेकस्मिन्नेवातिरिक्तैकाभाव एव तद्विषयत्वं कल्प्यत
इत्यपि निरस्तं अतिरिक्तानंतकल्पनस्यापि करणेन संबंधकल्पनं चापेक्ष्यानंतविशेषाभावेषु घटेनास्तीत्यादि
प्रतीतिविषयताकल्पनाया एव लघुत्वात् विषयत्वस्य ज्ञानविषयोभयरूपत्वे सर्वज्ञानसाधारणातिरिक्त
त्वे चोभयथैव तस्य तत्रापि क्लृप्तत्वाच्च। अत्रो मैथिलाः क्रमयौगपद्यादिप्रतिबंधकप्रतियोगित्वैरनंतविशेषाभावानां वत्
दाहादिकार्यप्रतिकरणत्वकल्पनाम् अपेक्ष्य लाघवादेकाभाव एव तत्तत्कारणतया कल्प्यत इत्याहुः। तत्र यस्य ए
तावता प्रतिबंधकीभूतानां यस्याम् अतिरिक्तैः सामान्याभावम् अन्येषाम् अतिरिक्ताभावसिद्धौ मानाभावात्। किंच
कारणत्वं कारणतावच्छेदकधर्मवत्तं तच्च प्रकृते मणित्वावच्छिन्नप्रतियोगिताकत्वमेव तथा चानंतविशेषाभा
वेषु मणित्वावच्छिन्नप्रतियोगिताकत्वकल्पने गौरवमित्येव फलितं तं तद्व्याक्तरीत्यैव दूषितं॥ अन्ये तु अशेषविशे
षादिरूपेणानंतविशेषाणां मण्यादिनिष्ठदाहप्रतिबंधकतावच्छेदकत्वकल्पनामपेक्ष्य लाघवादेक एव तत्
त्प्रतियोगिकसामान्याभावदाहप्रतियोगितावच्छेदकतया कल्प्यत इत्याहुः सामान्याभावस्यातिरिक्तत्वे सकलनमपुक्ति

मभिधायप्रयुक्ताभावान्तरमाह अन्येयेति। यदि लाघवात्तत्तद्द्वित्वावच्छिन्नप्रतियोगिताकाभाव एव वा द्वित्वावच्छि
न्नप्रतियोगिताकस्तदित्यर्थः। तुल्ययुक्त्या तद्रूपत्वावच्छिन्नप्रतियोगिताकाभावानामेव रूपत्वावच्छिन्नप्रतियोगिताका
भाववत्तयेति शेषः। सकलप्रसिद्धरूपाभाववतीति। वायुः पृथिवीरूपत्वावच्छिन्नप्रतियोगिताकाभाववान् जलरूपत्वा
वच्छिन्नप्रतियोगिताकाभाववान् तेजोरूपत्वावच्छिन्नप्रतियोगिताकाभाववांश्चेति सकलप्रसिद्ध[redacted]ता रूपास्सं
भावानां निर्णये वायुः पृथिवीरूपत्वावच्छिन्नप्रतियोगिताकान्योन्याभाववान् जलरूपत्वावच्छिन्नप्रतियोगिताका
न्या न्योन्याभाववांश्चेति सकलप्रसिद्धरूपवदन्योन्याभावानां निर्णयेऽपीत्यर्थः। वायाविति। अथ च रूपतदभावविशेष्यको वा
युविशेष्यकः विरुद्धयोरेकधर्मिसंबन्धावगाहिज्ञानस्यैव संशयत्वान्न तु विरुद्धोभयप्रकारितापि नियतादित्तीयस्तु रूप
तद्रूपान्योन्याभावकोटिको वायुविशेष्यक इति नाभेदनिश्चितत्वादिति निश्चितत्वेन संशये कोटित्वासंभवादनिश्चि
तान्योन्याभावस्य चानंगीकारादित्यर्थः। तथाप्यतिरिक्तसामान्याभावानभ्युपगमे संशयविषयोऽभाव एव दुर्लभ इ
तिभावः। यद्यपि वायौ रूपं नवेति संशये रूपाभावनिश्चयो न विरोधी किंतु रूपतदभावान्यतरविशेष्यकाधेयतासंब
न्धावच्छिन्नत्वाभावनिश्चय एव विरोधीति यद्यप्यधिकरणे तत्तदभावान्यतरनिश्चयोपि तदभावोभयविशेष्यकाधे

वैयाटी

५२ पताप्रकारकसंशयविरोधी । स्यभिप्रायः वायुः रूपवान्नवाभाववान्वेति वायुविशेष्यकसंशय एवतन्नास्त्यर्थः ।
एतच्चापादनतः विशेषाभावज्ञानीतत्तद्रूपावच्छिन्नप्रतियोगिताकाभाववत्वेननिश्चितत्वेपि रूपत्वावच्छिन्नप्रतियोगि
५ ताकाभाववत्वप्रकारेणसंशयविषयत्वं तत्त्वमवान् । तेनापि रूपेण विशेषाभावज्ञानोनिर्णीयतयासंशयस्यसामान्याभावा
तिरिक्तत्ववाहिनाप्यसिद्धत्वादिति ध्येयं । शेषमस्मत्कृतसिद्धान्तरहस्येऽनुसंधेयं पंहत्यादि स्व पदं हेत्वभिमतपरं ।
कपिसंयोगी एतत्वादित्यादौ व्याप्तिवारणाय प्रतियोगिव्यधिकरणेति स्वपदार्थस्य हेतोर्विशेषणं । तदर्थ
श्च प्रतियोग्यनधिकरणवृत्तित्वं । ननु तथापि वह्निमान् धूमात् रूपवान् पृथिवीत्वादित्यादिष्वनानाव्यक्तिकसाध्य
केऽव्याप्तिः चालनीन्यायेन सर्वेषामेव वह्न्यादीनां हेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् सत्तावा
न् द्रव्यत्वादित्यादौ एकव्यक्तिसाध्यकेप्यव्याप्तिश्च । हेतुसमानाधिकरणविशिष्टाभाववह्नित्वाद्यवच्छिन्ना
भावप्रतियोगितान्सत्तादेः गुणकर्मान्यत्व विशिष्टसत्तावान् जातेः भूतल मूर्त्तत्वाभाववान् मूर्त्तत्वादित्या
दावतिव्याप्तिवारणाय प्रतियोगिव्यधिकरणपदेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणत्वस्यावश्यं विव
क्षणीयत्वादिति चेन्न । अप्रतियोगिपदस्य तादृशप्रतियोगितानवच्छेदकस्य व्यापकतावच्छेदकावच्छिन्नपरत्वात् । राम ५२

नैवं वा एवं स्यादभेदः तत्र तादृशप्रतियोगितानवच्छेदकवह्नि [redacted] त्वावच्छिन्नप्रकिंचिद्वह्निसामानाधिकरण्यव
ह्निसामान्यधूमसामान्ययोर्व्याप्तिः अत एव वह्नित्वरूपेणायोगोलकीयवह्नेरपि धूमाव्याप्यत्वमुक्तमिदानीं तु तादृशप्रतियोगि
तानवच्छेदकसाध्यतावच्छेदकावच्छिन्नतत्तद्वह्निना समं तत्तद्धूमसामानाधिकरण्यं वह्नित्वरूपेणात्तद्वह्नितत्तद्धूमेकाव्याप्तिः
वह्नित्वरूपेणाव्यापकीयवह्निव्याप्यो न धूमः इत्येव विशेषाद्व्याप्त्यसंभव एवेति दिक्। नन्वेतल्लक्षणद्वयप्रमेयद्रव्यत्वत्वा
यवच्छिन्नविधेयिका घटो द्रव्यत्ववानित्यादिरूपेवानुमितिः सर्वत्र स्यात्। न तु कदाचिदपि स्वरूपतो द्रव्यत्वादिविधेयिका
घटो द्रव्यमित्यादिरूपा एतयोर्द्वयोरेव साध्यतावच्छेदकघटितत्वात्। न च साध्यतावच्छेदकघटितत्वेऽप्येतयोरेव ज्ञाने द्रव्यत्व
त्वाद्यवच्छिन्नविधेयकानुमितौ स्वरूपतो द्रव्यत्वादिविधेयकानुमितावपि हेतुर्द्रव्यत्वत्वाद्यतिरिक्तानवच्छिन्नद्रव्यत्वादि
विधेयताकानुमितित्वस्य वकार्यतावच्छेदकत्वादिति वाच्यं तथा सति द्रव्यत्वानुमितेर्नियमतो द्विविधविषयतापत्तेः
द्रव्यत्वत्वादिघटकतया स्वरूपतो द्रव्यत्वादिविशिष्टबुद्धिजनकीभूतस्वरूपतो द्रव्यत्वज्ञानस्यापि सर्वत्र सत्त्वादिति च स्व
न स्वरूपतो द्रव्यत्वादिविधेयकानुमितेरसिद्धेः घटो द्रव्यत्ववानित्याकाररूपायाः एवं द्रव्यत्वत्वाद्यवच्छिन्नविधेयताकानु
मितेः सर्वत्राभ्युपगमात्। एतद्रहस्यं नैव वा ऽन्योन्याभावगर्भ लक्षणान्तरमाह साध्यसामानाधिकरण्येनेति प्रसंदेहत्व

५८ भिमतप र्यं पर्यवसन्नं भवति यदधिकरणं न भवति। यत्तद्धेत्वाध्यापरं वह्निमान् धूमात् स्पन्दवान् द्रव्यत्वादित्यादौ हेत्वधिक
रणे धूमावयवे वृक्षादिमतोऽन्योन्याभावस्य वृत्तावपि नाव्याप्तिः न वा द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ स
त्ताद्यधिकरणे गुणादौ द्रव्यत्वादिमतोऽन्योन्याभावस्य सत्त्वेऽपि अव्याप्तिः तादात्म्यादिरूपनियामकसंबंधेन हेतुतापा
मव्याप्तिवारणोपाधिकरणत्वपर्याप्तसंबंधित्वप्रवेशः वर्तमानत्वं च विशेषणताविशेषसंबंधेन साध्यप्रतियोगिकाभाववृ
त्तिसाधीयप्रतियोगितावच्छेदकत्वाभावत एव हेतुकसंबंधेन वा यत्र घटे तेन समवायेन ज्ञानादिसाध्यके हेत्वधिकरणे ज्ञानादौ विष
यित्वकालिकविशेषणत्वव्याप्यत्वादिसंबंधेन सत्तादिमदन्योन्याभावस्य सत्त्वेऽपि नाव्याप्तिः यदि च वक्ष्यमाणयुक्त्या प्रति
योगिभिन्नत्वं निरुक्तहेतुसंबंधिनः प्रतियोग्यनिरूपितत्वं वा तद्वर्तमानत्वस्य विशेषणमुपादीयते तदा तु वर्तमानत्व
येन केनचित्संबंधेनैव ग्राह्यं न तु संबंधविशेषो निवेशनीयः वह्निमान् धूमादित्यत्र संयोगेन धूमादिसाधारणा सत्ताभावस्य
संयोगादिसंबंधेनासत्ताभावस्य हेतुसमानाधिकरणत्वात् संभववारणायान्योन्याभावत्वनिरूपितप्रतियोगितानाभा
वो मन्योन्यपरं यद्यपि तेऽसत्ताभावस्यापि तादात्म्यावच्छिन्नभेदात्मकतया ऽन्योन्याभावत्वेन तदोषतादवस्थ्यात्। ननु तथा
पि वह्निमान् धूमादित्यादौ सत्तासामान्याभावाकालिकीयमापि न निरुक्तहेतुसमानाधिकरणमन्यतमं किं तावद्धि राम

न्नप्रतियोगिताकान्योन्याभावस्य प्रतियोगि[illegible]त्वान्ताहृत्यावासत्स्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावस्य
प्रतियोगित्वाद्यसंभवः ननु वन्हिमान्हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यत्साध्यं तेन समं सामाना
धिकरण्यमितिवाच्यं तथापि वह्निमान्धूमान् सत्तावान्जातेरित्यादौ वह्न्यादेः निरुक्तहेतुसमानाधिकरणयत्तदधि
करणवृत्तित्वविशिष्टवन्ह्यादिमत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य वह्निघटोभयाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वेनासंभवनाद्भवस्यात्र अथ यानवच्छेदकत्वं पर्याप्त्याख्यसंबंधेनावच्छेदकताशून्यत्वं नचतथापि वह्निमान्
धूमादित्यादिवाक्यनीयमायेन सर्वेषामेव साध्यव्यक्तीनां साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदक
तापर्याप्त्यधिकरणत्वाद्व्याप्तिर्दुर्वारैवेति वाच्यं जातेः खंडोपाध्यतिरिक्तस्य स्वरूपतोऽभावप्रतियोगितानवच्छेदक
तया वन्ह्यादेरवच्छेदकतापर्याप्त्यधिकरणत्वाभावादिति चेन्न सत्तावान्जातेः मत्त्वादित्यादौ तथाप्यव्याप्तेः सर्वासामेव
सत्ताव्याप्यजातीनां स्वरूपतः साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वाद्गुण
कर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादावतिव्याप्तेश्च सत्तायाः पर्याप्त्याख्यसंबंधेन तादृशावच्छेदकताशून्यतया विशि
ष्टसत्तायाश्चापि तथात्वात्। विशिष्टसत्तायाः सत्तानतिरेकित्वात् महानसीयवह्निमान्धूमादित्यादावव्याप्तिश्च जा

तिमान्जाति

चिनारि ३ स्वपर्याप्त्यसंबंधेन साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छेदकतात्वस्य कदाचिदप्यसंभवात्. सत्ताव्या
३ प्यजातिमान् जातिमत्त्वादित्यादौ सर्वासामेव सत्ताव्याप्यजातीनां स्वरूपतः साधनसमानाधिकरणान्योन्याभावप्रतियोगिता

५५ त्सर्वदेशोपाध्यतिरिक्तधर्मस्य स्वरूपतोऽनवच्छेदकतया महानसीय वह्न्यादेरपि पर्याप्त्यसंबंधेन तादृशावच्छेदकता
संभवात्। एतेन निरुक्तहेतु समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यनधिक
रणं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं विवक्षितमतो नासंभवः सद्धेतो वह्न्यादेः साध्यतावच्छेदक
त्वपि साध्यतावच्छेदकीभूत सत्ताव्याप्यजातित्वरूपेणानवच्छेदकत्वादित्यपि निरस्तं। द्रव्यत्वव्याप्यजातिमद्द्र
व्यसमवायित्वादित्यादिना जातित्वरूपेणावच्छेदकस्थले ऽव्याप्तेर्दुर्वारत्वात्। साध्यतावच्छेदकीभूतानां स
र्वासामेव पृथिवीत्वजलत्वादिरूपाणां द्रव्यत्वव्याप्यजातीनां चालनीन्यायेन साधनसमानाधिकरणपृथिवी
त्वजलत्वादिमदन्योन्याभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणत्वात्। गुणकर्मान्यत्वविशिष्टसत्तावान् जा
तेरित्यादावतिव्याप्तेश्च सत्तात्वस्य पर्याप्त्यसंबंधेन तादृशप्रतियोगितावच्छेदकतावच्छेदकत्वशून्यतया सा
ध्यतावच्छेदकस्य विशिष्टसत्तात्वस्याप्रसिद्धत्वात्। विशिष्टसत्तात्वस्य सत्तात्वानतिरिक्तत्वात् महानसीयत्व
विशिष्टवह्निमान् धूमादित्यादावतिव्याप्तेश्च। वह्नित्वस्य पर्याप्तिसंबंधेन तादृशप्रतियोगितावच्छेदकतावच्छेदकत्व
शून्यतया साध्यतावच्छेदकस्य महानसीयत्वविशिष्टवह्नित्वस्याप्रसिद्धत्वात् विशिष्टवह्नित्वस्य वह्नित्वानति

५५

दे साध्यव्यक्तिपरं। वह्निमान् धूमात् रूपवान् पृथिवीत्वात् इत्यादि चिद् वह्नित्वसाध्यकं चालक्ष्यमेव नीलरूपवत्त्वे दोषाद्यतिरिक्तस्य

रिक्तत्वात् तद्वह्निमान् वह्निसंयोगादित्यादावतिव्याप्तेश्च जात्यतिरिक्तपदार्थस्य स्वरूपतोऽनवच्छेदकतया साध्यतावे
च्छेदकीभूततद्वह्निव्यक्तेः यथोक्तसम्बन्धेन तादृशप्रतियोगितानवच्छेदकत्वसम्भवात्। अस्यापि साध्यतावच्छेदक
घटितत्वेन स्वरूपतोऽनवच्छेदकत्वादि विधेयकानुमितेः तज्ज्ञानादप्रसम्भवापत्तेश्च। यत्र हि स्वरूपेण द्रव्यत्वादिः साध्यत्वेन
तु साध्यतावच्छेदकं किमप्यस्ति तत्र निरुक्तसमानाधिकरणान्योन्याभाववत्त्वनिरूपितप्रतियोगितासामान्यपर्याप्त्यधिक
रणत्वनिष्ठपर्याप्त्यवच्छेदकतावच्छेदकत्वाभाववत्त्वसामानाधिकरण्यं स्वरूपतः साध्यव्याप्तिरिति विवक्षणीयं। स्वरूपतः स्वरू
पतोऽव्याप्यनुपगमादिति नाव्याप्तिः। न च गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिः विशिष्टसत्ता
याः सत्तानतिरिक्तत्वेन सत्ताया एव साध्यतया तदधिकरणत्वपर्याप्त्यवच्छेदकतावच्छेदकत्वाभावस्य जातिमन्निष्ठान्यो
न्याभावप्रतियोगितासामान्ये सत्त्वादिति वाच्यम्। तादृशविशिष्टसत्तात्वरूपेण सत्ताया व्याप्यत्वानभ्युपगमेऽपि
स्वरूपतो विशिष्टसत्ताव्याप्यत्वस्य सर्वसिद्धत्वात्। किं चिद्वह्नित्वसाध्यकस्थले तु निरुक्तहेतुसमानाधिकरणान्यो
न्याभाववत्त्वनिरूपितप्रतियोगितासामान्यपर्याप्तधर्मावच्छिन्नाधिकरणत्वनिष्ठपर्याप्त्यवच्छेदकत्वाभाववत्तद्धर्मावच्छि
न्नसामानाधिकरण्यं तद्धर्मावच्छिन्नस्य व्याप्तिरिति विवक्षणीयं। एवं च न रूपेण साध्यतावच्छेदकत्वेन रूपेणत्व ण

हेतुता

५८ देववद्धर्मपदेन ग्राह्यं इत्थं च वह्निमान् धूमादित्यादौ वह्नित्वादिः स्वरूपत एव साध्यतावच्छेदकतया स्वरूपतो वह्नित्वा
दिकमेव पक्षधर्मपदेन ग्राह्यं महानसीयत्वविशिष्टवह्निमान् धूमादित्यादौ महानसीयत्वादिविशिष्टत्वेनैव वह्नित्वादेः
साध्यतावच्छेदकतया न हि विशिष्टवह्नित्वादिकमेव पक्षधर्मपदेन ग्राह्यं इत्थं च द्रव्यत्वव्याप्यजातिमान् द्रव्यसमवायित्वादित्यादौ
पृथिवीत्वजलत्वादिरूपाणां द्रव्यत्वव्याप्यजातीनां द्रव्यत्वव्याप्यजातित्वरूपेणैव साध्यतावच्छेदकतया तादृशजा
[redacted] तित्वविशिष्टमेव पक्षधर्मपदेन ग्राह्यं न तु स्वरूपतः पृथिवीत्वजलत्वादिकमेव तादृश स्व
यमत्यां यत्रोधिकरणत्वेनाश्रयस्यानतिप्रसंजकतया तमपहाय लक्षणान्तरमाह यत्समानाधिकरणेति स्वपदं
हेत्वभिमतपरं यद्धर्मवत्त्वमिति यद्धर्मवत्तित्वमित्यर्थः पक्षपतस्य तदव्याप्यत्वमिति शेषः तथा च पक्षस्वरूपतो हे
तुत्वाद्धि: साध्यत्वेनाभिमतहेतुसमानाधिकरणान्योन्याभाववत्त्वनिरूपितप्रतियोगिता सामान्ये पक्षिरूपपक्षसा
वच्छेदकतावच्छेदकत्वाभावः तत्समानाधिकरणपदस्वरूपतस्तत्स्वव्याप्तिरिति वक्तव्यं। यत्पदं स्वरूपतः साध्यक्षिपरं कि
चिद्धर्मावच्छिन्नसाध्यकस्थले तादृशप्रतियोगितासामान्ये पक्षधर्मावच्छिन्ननिष्ठपर्याप्त्यवच्छेदकत्वाभावस्तद्धर्मावच्छिन्न एम

सामानाधिकरण्येन हूर्णावच्छिन्नस्य । व्याप्तिरिति वक्तव्यं न तु तथापि द्रव्यं पृथिवीत्वात् वह्निमान् धूमादित्यादौ
कालिकविशेषणत्वसमवायादिसंबंधेन साध्यवृत्तेः ऽन्योन्याभावस्य हेत्वधिकरणे सत्त्वाद् संभवः नन्वप्रतियोगि
तासाध्यतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकत्वे न विशेषणीयेति वाच्यं । घटत्वेन कालपरिमाणात् घटवान्
नित्यज्ञानत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्धेरिति चेन्न साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनावच्छेदकत्वेन यदि वि
शेषणत्वात् केवलान्वयिनि वाच्यत्वादिपर्याप्तस्वरूपसंबंधावच्छिन्नावच्छेदकताकत्वसंयोगादिसंबंधेन वाच्यत्वा
देरेतत्ताभावप्रतियोगित्वाप्रसिद्धेः । साध्यतावच्छेदकसंबंधभेदेन व्याप्तिभेदान्नयत्ता तादात्म्यसंबंधेन किंचिदव
च्छिन्नस्य साध्यत्वे तन्न तादृशान्योन्याभावत्वनिरूपितसामान्यधर्मपर्याप्तावच्छेदकताकत्वाभावरूपधर्मावच्छिन्न
सामानाधिकरण्यमेव वक्तव्यं । यद्वा परं साध्यतावच्छेदकपरं तु वच्छेदकतावसाध्यतावच्छेदकतावच्छेदकसंबंधाव
दत्वं च्छिन्नत्वेन विशेषणीया । सर्वमवशिष्टाभावगर्भप्रथमलक्षणवदवसेयमिति संक्षेपः नन्वसत्ताभावघटितहि
तोपलक्षणपक्षे व्यधिकरणधर्मस्य वह्नित्वरूपेण व्यधिकरणवह्निव्याप्यलिंगकस्थलस्यात् । सामानाधिकरण्यविरहादि २
सतत्त्वाहअन्येति प्रतियोगित्वादिति परस्य सामानाधिकरण्यविरहेणेति शेषः । यथा कैतेनानात्मिकेसाध्यक ।

५७ यनुरोधेनानवच्छेदकत्वपर्यंतानुधावनस्यावश्यकत्वेन तादृशप्रतियोगितस्याकिंचित्करत्वात्। इत्थं च परस्प
रसामानाधिकरण्यविरहघटकस्य हेतुत्वात् नचैवमस्य वृत्तिवहेरस्पतिं धूमवन्निष्ठात्यन्ताभावप्रतियोगित्वादि
स सैव वसम्यक्त पातन्मते: न्योन्याभावप्रतियोगित्वादिति व्यर्थमिति वाच्यं अन्यवृत्तिवहेरन्यवृत्तिधूमवन्निष्ठात्यं
ताभावप्रतियोगित्वेपि इष्टस्याव्याप्यवृत्तितानपेक्षसामानाधिकरण्यप्रवेशेनानुशयेन तदुपादानादिति। नचैव
मिति। नव्यास्तु नैकाव्याप्तिसिद्ध्यर्थं न्यायाच्च धूमत्वं व्याप्य तानवच्छेदकं नस्यात् तद्व्याप्ते: प्रतिस्वभेदेन धूमत्वस्याति
प्रसक्तत्वादिति भावः नचैवं व्याप्यस्याप्रत्यक्षेन धूमसमानाधिकरणस्येतिनवाच्यं व्याप्ते: प्रतिस्वभेदे पि वह्नि धूमव्याप्तिसत्ता
५ वच्छिन्नस्याननिष्ठसत्कत्वात् धूमत्वमनवच्छेदकं च प्रतियोगितापा: प्रतिव्यक्तिभेदेन भिन्नत्वेपि तदभावप्र
तियोगितात्वावच्छिन्नस्याननिष्ठसत्कत्वात् घटत्वादिकमवच्छेदकमिति भावः ननु सर्वेस्मिन्नेव क्षणे धूमसमा
नाधिकरणवह्निधूमव्याप्य: स्मितरणवंयुगपद्वत्तविनष्टव्यक्तिद्वयोरपि कालिकसमव्याप्ति: स्यादिसेत्राषापत्ति
माह धूमसादिस्मात्स्यैदैशिकसमव्याप्यतायां समदेशत्वस्यैव तत्रत्वात् सारविनाशयो: योगपद्याभिधानमसं
गतं स्यादतः समव्याप्यत्वानुधावेनतु प्रतियोग्यसामानाधिकरण्यघटितप्रथमलक्षणे सं योगिसत्वादिस्यादेष राम ५७

२ कालिकसमव्याप्तिरेव+

घापिनगतिव्याप्तिः सत्तायोगुणाद्यवच्छेदेन संयोगसामानाधिकरण्याभाववत्त्वेन प्रतियोग्यसमानाधिकरणत्वा
याः सामानाधिकरण्याभावः संयोगाभावः तत्प्रतियोगितावच्छेदकत्वात्संयोगत्वस्य तथा विसंयोगवान् तत्र संयो
गाभावादित्याशंवतिव्याप्तिः संयोगाभाववृत्तौ संयोगसामानाधिकरण्याभावात्त्वेन प्रतियोग्यसमानाधिकरण
हेतुसमानाधिकरणाभावेन संयोगाभावं किं त्वभावांतरमेव तत्र हि शत्तत्प्रतियोगितानवच्छेदकत्वात्संयोगत्वस्य। नच
सत्तावत् संयोगाभावे हेतावपि गुणाद्यवच्छेदेन संयोगसामानाधिकरण्याभावोऽस्त्येवेति वाच्यं तथा सति प्रतियो
गितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभाववद्भावस्यैव व्याप्यवृत्त्यभावत्वात् संयो
गाभावस्याविव्याप्यवृत्त्यभावत्वापत्तेरित्यत आह कर्मणि वेति। संयोगाभावः संयोगवान् तदभावादित्यादौ सा
धनीभूतः संयोगाभावोऽपि प्रतियोग्यसमानाधिकरणः संयोगरूपप्रतियोगिसमानाधिकरणोऽत्यंताभावोऽप्र
यसंयोगाभावेऽकर्मादौ न संयोगसामानाधिकरण्यमिति प्रतीतेः नचैवं तस्य व्याप्यवृत्त्यभावत्वापत्तिरिति वाच्यं
निरुक्तप्रतियोगिसमानाधिकरणाभिन्नाभावस्यविशेषणताविशेषणावच्छिन्नवृत्तिमद्भिन्नाभावस्यैव व्याप्यवृ
त्त्यभावत्वादिति भावः ननु सामानाधिकरण्येन व्याप्यवृत्तिसंयोगवद्वृत्तित्वाभावो न सत्तावति तत्र हि प्रतीत्या स

ननु ५ वक्तव्यमिति तु फलितार्थः यद्वा प्रथमलक्षणे प्रतियोग्यसमानाधिकरणत्वं स्वसंताभावविशेषणमेवोपादीयतां किं तत्स्वहेतुवि

५८ नुपपत्तिः सत्तायां कर्मादौ न संयोगसामानाधिकरण्यमिस्यादिमत्तितेष्व कर्मादौ स्ववच्छेदकतासंबंधेन सत्तादिनि
ष्ठसंयोगसामानाधिकरण्यस्याभावएवविषयत्वाव प्रथमलक्षणे संयोगीसत्वात् संयोगवानतरभावादि
त्याहावतिव्याप्तिदुर्वारेस्वरसाद्याह। यद्वेतिप्रतियोगिवैयधिकरण्येति। प्रतियोगिवैयधिकरण्यप्रतियोग्य
नधिकरणवृत्तित्वमवच्छेदकंविशेषणंपञ्चेहेतौ तरवच्छिन्नत्वं सामानाधिकरण्यसंबंधेन तद्विशिष्टत्वं तत्स
मानाधिकरणत्वमिति यावत प्रतियोग्यसमानाधिकरणपदहाप्रतियोग्यनधिकरणवृत्तित्वहेतुविशेषणं
नेत्पत्स्याह कर्मणि चेति [redacted]
न यावत स्वासमानाभावविशेषणत्वे संयोगिद्रव्यत्वादित्यादावव्याप्तिः विशिष्टस्यानतिरिक्तत्वेन प्रतियोगिसा
मानाधिकरणाभावविशिष्टः सन्हेत्वधिकरणवृत्तिर्यो ऽभाव इति विवक्षायामप्यप्रतीकारादिति भावः इत्थमु
पलक्षणं हि तौ पलक्षणे प्रतियोगिवैयधिकरण्यस्य स्वासमानाभावविशेषणत्वे नैवाव्याप्तिः कर्मादौ संयोगाभाव
स्यप्रतियोग्यनधिकरणवृत्तित्वात् विशिष्टस्यानतिरिक्ततया प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन्हेत्वधि राम

गुरुरामो

यो॰ ८ करणवृत्तिभाव इति विवक्षायां न पूर्वोक्तदोष इति ध्येयं । ननु सामानाधिकरण्यं नाव्याप्यवृत्तितया चासत्ताभा
भावविशेषणत्वेपि नातिः अतिव्याप्तिः स्वहेतुभावयोरुभयोर्विशेषणत्वे एवं संयोगी सत्वादित्यादौ सामानाधि
करण्यस्याव्याप्यवृत्तितया सत्तायां संयोगाभावे च संयोगाभावीयप्रतियोग्यसामानाधिकरण्यविरहात् तत्राव्या य दि
हयेतु निरर्थकम् एवं च तत् । प्रतियोगिवैयधिकरण्यस्य प्रतियोग्यनधिकरणवृत्तित्वस्य पदवच्छेदकनिरूपकहे
त्वधिकरणप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिपात्वन्तु । तदवच्छिन्नत्वं तद्वृत्तित्वमसत्ताभावविशेषणमित्यवा
र्थः । केचित्तु प्रतियोगिवैयधिकरण्यं प्रतियोग्यनधिकरणवृत्तित्वरूपं परवच्छेदकं विशेषणं तदवच्छिन्नत्वं चाहि शि
ष्टत्वमसत्ताभावविशेषणमित्यर्थः प्रतियोग्यसमानाधिकरणेति विहाय प्रतियोग्यनधिकरणाधिकरणवृत्ति
त्वमसत्ताभावविशेषणत्वकेव्याप्तिभावः नैवं कपिसंयोगी एतद्वृक्षत्वादित्यव्याप्तिः एतद्वृक्षत्वसमानाधिक हिता
रणकपिसंयोगाभावस्यापि प्रतियोग्यनधिकरणगुणादिवृत्तित्वादिति वाच्यं हेत्वधिकरणे प्रतियोग्यनधिक
रणवृत्तित्वस्य विवक्षणीयत्वात् एतल्लाभायैव च हेतुसमानाधिकरणपदमेतेन तत्रैव पर्यवे प्रतियोग्यनधिक
रणगुणादिवृत्तित्वविशिष्टस्याधिकरणहेत्वधिकरण का भावतिवाभावानां तार्थ इत्याहुः तदसत्त्ववह्नमरकुरु

५८ विकल्पनापत्तेरिति ध्येयं । ननु मूले वृक्षः कपिसंयोगी नेत्यबाधितप्रतीतेः कपिसंयोगादिमत्त्वस्यापि वृक्षे मूलाद्यव
न्या च्छेदेन कपिसंयोगादिमतोऽन्योन्याभावस्य तादृशान्योन्याभावघटितलक्षणं कपिसंयोगि एतत्त्वाद्यव्याप्यवृत्तिकेऽव्या
प्तमित्यत आह नचेति अन्योन्याभावस्य कपिसंयोगादिमतोऽन्योन्याभावस्याव्याप्यवृत्तित्वे कपिसंयोगादिमत्त्वस्या
पि वृक्षे मूलाद्यवच्छेदेन सत्त्वे भेदस्येति मूले वृक्षः कपिसंयोग्यभिन्न इति मूलाद्यवच्छेदेनापि कपिसंयोगि
भेदाभावस्य कपिसंयोगिभिन्नभेदस्य च यथार्थप्रतीतेरित्यर्थः नत्वव्याप्यवृत्तिनोरप्येतयोर्भावत्वेन प्रतियो व
गिनोऽन्योन्याभावत्वेन प्रतियोगितावच्छेदकयोरेकावच्छेदेन सत्त्वे विरोधात् न च कपिसंयोगिभेदाभावस्य कपि
संयोगिभिन्नभेदस्य च कपिसंयोगरूपतया मूलावच्छेदेन कथं न सत्त्वमिति रिति वाच्यं । अन्यत्रान्योन्याभावेन्या
वस्यान्योन्याभावभेदस्य च प्रतियोगितावच्छेदकस्वरूपत्वेऽप्यव्याप्यवृत्तिस्थले तद्धन्योन्याभावस्य तद्भिन्नभे भावा
देस्य चा तिरिक्तस्याव्याप्यवृत्तिस्वभावस्याक्लृप्तप्रतिसम्बन्धानुपपत्त्याऽभ्युपगमात् । नचैवं मूले वृक्षः क
पिसंयोगिनेत्यादिप्रतीतेः का गतिरिति वाच्यं । विशेषणीभूतस्य कपिसंयोगादेरसत्ताभावस्यैव तद्विषयत्वात्
न च तत्र कपिसंयोग्यन्योन्याभावविषयकत्वमप्यनुव्यवसायसिद्धमिति वाच्यं । तथानुव्यवसायस्याप्रमात्वा त्
५९

त। अथैवं गुणत्वादावपि संयोगवदन्योन्याभावोऽयोगोलकादौ धूमास्ति मदन्योन्याभावोऽपि च न सिद्धः न तत्रापि
गुणेन संयोगि अयोगोलकं न धूमवदिति प्रतीतेर्विशेषणीभूतस्य संयोगस्य धूमादेरसत्त्वाभावस्य विषयता
याः स्ववत्तादिनियन्त्र। तत्र बाधकाभावेनानुव्यवसायानां भ्रमत्वे मानाभावात् प्रकृते च यथोक्ताभेदप्रतीतेर
वबाधकतया तु अव्यवसायस्य भ्रमतायाः प्रमाणसिद्धत्वादिति भावः। एतच्च यानतः मूले च स्तः कपिसंयोगि
भिन्नभेदस्य चातिरिक्तस्य कल्पने गौरवात् तत्प्रतीतेर्यथार्थत्वे मानाभावाच्च। न च तथापि वृक्षः कपिसंयोग
भिन्न इति यथार्थप्रतीतिनिर्वाहान्योन्याभावस्याव्याप्यवृत्तित्वे बाधिके तिष्ठ्य वृक्षे कपिसंयोगिभेदस्याव्याप्यव
ता त्तित्वे तादृशत्वं भावस्य च तद्भिन्नभेदस्य च सत्त्वाय स्ते। अवच्छेदकेन सत्त्वानादृश प्रतीतावनुपपत्ति विरहात्। न
च कपिसंयोगिभेदाभावस्याव्याप्यवृत्तित्वज्ञानं बाधकमिति वा [redacted] या। तदसिद्धेः प्रस्तुतज्ञप्तिलसे
ग्रहात्। वस्तुतस्तु अन्योन्याभावस्याव्याप्यवृत्तितानिषयनयेऽपि कपिसंयोगी एतत्त्वादिसादेकपिसंयो
गिभेदस्याव्याप्यवृत्तित्वनये गोहेतु सामानाधिकरण्यभ्रमेणेनिपतेतां निरुक्तपापत्त्या नह्यवच्छिन्नत्वं स्वप
म

तियोगितिहृपि [illegible] नत्वं वाहेत्वधिकरणावृत्तित्वस्य स्वप्रतियोगि भिन्नहेत्वधिकरणस्य वा विशेष
६० णाभावघटकं स्वपदम् अतएव पूर्वोक्ते याचलतद्व कपिसंयोगा [illegible] द्धिमद्वेरख्याप्यव्याप्ति त्वेपि कपिसंयो
गिएतत्त्वाद्धिसाद्धेनाव्याप्तिः मूलेव सः कपिसंयोगिनेतिप्रत्ययेपि पित्रसः कपिसंयोगाभावप्रतियोगिने
तमप्रत्ययेन स्वप्रतियोगितावच्छिन्नप्रतियोगिकभेदवत्त्वस्य हेत्वधिकरणेविरहाद्धिसेवतत्वं। केचित्तु कपि
संयोगिभेदस्याव्याप्यवृत्तित्वक्रमेण अमर्यादाहेतुसामा नाधिकरण्यघटके निषमतोऽनुमितसनुसाद्
वाध्यणपप्रतियोग्यवृत्तित्वेनान्योन्याभावो विशेषणीयः। नचैवं कपिसंयोगी सत्वादित्यादाववाप्तिरितिवाच्यं
सामानाधिकरण्यपस्याव्याप्यवृत्तितया कपिसंयोगवदन्योन्याभावस्यापि गुणादेः प्रतियोग्यवृत्तित्वात् हेत्व
धिकरणवृत्तेरेन चप्रतियोग्यवृत्तित्वं विवक्षितमेतत्साध्याभावेहेतुसमानाधिकरणपदं तेन संयोगिद्व्यत्वा
दि साध्येनाव्याप्तिरत्न द्रव्यत्वादि हेतुरेव वा प्रतियोग्यवृत्तित्वेन विशेषणीपदसायुः तदसत्गौरवात्। संबंधविशे
षेणैवप्रतियोग्यवृत्तित्वस्यवक्तव्यतया स्वप्रतियोग्यनिरूपितत्वापेक्षया पि गुरुत्वात् प्रतियोग्यवृत्तित्वस्या ६०

साध्यवतो व्याप्यत्वेन ज्ञानं विनापि =

व्याप्यवृत्तित्वेमानाभावाच्चेतिदिक् ॥ ननु पक्षधर्मत्वमिसन्नपक्षसत्वैव्याप्तिः तथाच व्याप्तिघटितत्वेन व्याप्ति
ज्ञानं विना कथं तद्ग्रहः स्यात अत आह व्याप्यव्यापकभावज्ञानेति व्याप्यव्यापकभावज्ञानं विनापि संबंधत्वेनैव सं
योगत्वादिनैव भासमानस्य पक्षोक्तव्याप्तित्वेनभानस्य तथात्वेनं ज्ञायमानस्य । व्याप्तित्वेन व्याप्तिबुद्धावभासमानस्यैव वस्तु
तः वस्तुनिसाध्यवति साध्यमानस्य पक्षधर्मत्वेनतु व्याप्तित्वविशिष्टस्यसन्त्वयः तथाच पक्षतासहसाधनस्यव्याप्य
त्वेन संबंधः किंतु संयोगादिरूप एव च पक्षधर्म इति नाव्याप्त्यादिप्रसंग इति भावः नेचैवमिति । एवं च पक्षपदार्थस्य साध्य
... र्थघटितत्वलक्षणे । अननुगतत्वेचेति लक्षणाननुगतत्वेन लक्षणस्याननुगमत्वमेव परस्परं व्याप्तिरूपदोष
सम्भवादितिभावः धूमवान्वह्निमतद्धेनन्न वृत्तीपाद्ः । नन्वकाश्यतीपाठस्तथा माहिकः । व्यासज्येति । व्यासज्यवृत्ति
धर्मावच्छिन्नप्रतियोगिताकाभावप्रसिद्धः धूमवति । वह्निहृदोभयत्वावच्छिन्नाभावाधिकरणे धूमवति । कथमेतदसिद्धिरि
ति अत्यन्ताभावान्योन्याभावगर्भलक्षणे प्रतियोगिव्यधिकरणत्वस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकर
णत्वरूपतया वह्निहृदोभयत्वावच्छिन्नाभाव ... स्यापि तथात्वानं विभिन्नावच्छेदेनापि वह्निहृदो
भयवतिमहानसादौ तदुभयत्वा... वच्छिन्नाधिकरणत्वस्याप्रसिद्धत्वादिति भावः तादृशाभावेति व्यासज्येति

६१ धर्मावच्छिन्नप्रतियोगिताकातिरिक्ताभावानभ्युपगमादिसर्थः। नचैवं वह्निह्रदोभयत्वाद्यवच्छिन्नप्रतियोगिताकः कोऽपि विषय इति
वाच्यं। ह्रदाधिकरणे तादृशप्रत्ययस्य वह्निसामान्याभावो विषयः। वह्निमति तादृशप्रत्ययस्य ह्रदसामान्याभावो
विषयः। तदुभयशून्ये च तादृशाभावद्वयमेव विषय इत्यभ्युपगमात्। नचैवं वह्नित्वस्य प्रतियोगितावच्छेदकत्वा
नुपपत्तिरिति वाच्यं। लाघवात् क्रमप्रकारीभूतवह्नित्वादितत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावानामेव
वह्नित्वावच्छिन्नप्रतियोगिताकत्वकल्पनात्। अथैवं लक्षणाव्याप्तिस्तद्वद्धूमसमानाधिकरणह्रदसा
मान्याभावस्य ह्रदत्वावच्छिन्नह्रदमात्रवृत्तिप्रतियोगिताकत्वेऽपि वह्नावसत्त्वेऽपि वह्निह्रदोभयत्वावच्छिन्नतत्प्रतियोगि
ताकत्वस्योभयसाधारण्यात्तया वह्नावपि सत्त्वात्। ह्रदसामान्याभावो वह्निप्रतियोगिकः वह्निह्रदोभयाभावो वह्नि
प्रतियोगिक इति प्रतीतिवत् ह्रदसामान्याभावो वह्निप्रतियोगिक इत्यपि प्रसक्तापत्तिः ह्रदसामान्याभावो न वह्निप्र
तियोगिक इति प्रत्ययानुपपत्तिश्च ह्रदसामान्याभावस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वे वह्निनिष्ठत्वादिति
चेन्न। वह्निसामान्याभावह्रदसामान्याभावयोर्वह्नित्वह्रदत्वावच्छिन्नवह्निह्रदमात्रवृत्तिप्रतियोगिताकत्वेऽपि वह्नि
ह्रदोभयता [redacted] राम
६१

धत्वात्· न विशिष्टसंबंधेन ५

[redacted] वच्छिन्नत्वाभ्युपगमात् ह्रदत्वसाधारणप्रतियोगितानिरूपणाभावात्। नचैवं प
र्वते वह्निह्रदौ नस्त इति प्रतीतेः प्रतियोगितासंबंधेनाभावे वह्निह्रदयोरुभयोः प्रकारतानुपपत्तिः ह्रदसामान्याभा प
[redacted] वे वह्निनिष्ठप्रतियोगिताकत्वविरहादिति वाच्यं। ह्रदत्वावच्छिन्नह्रदसामा
न्यनिष्ठप्रतियोगिताव्यक्तेः ह्रदसंबंधवद्वह्निसंबंधत्वस्याप्यभ्युपगमात्। नञ्तत्संबंधस्यैकत्वात् तत्संबंधत्वमि
ति वाच्यं। [redacted]
[redacted] तद्वृत्तिधर्मावच्छिन्नत्वसंबंधेन तस्यापि तत्संबंधेन प्रतियोगित्वस्योभयसं
हृ बंधत्वेमानाभावात् अथ वह्निर्घटेनास्ति घटपटौ नस्त इत्यादिप्रतीतेः प्रकारीभूततत्तद्धर्मद्वयावच्छिन्नप्रतियोगि
ताकाभावस्य विषयत्वेनोपपत्तावपि घटेनास्ति पटौ नस्त इत्यादिप्रतीतेर्नञ्ब्द्व्याभावत्वेनोपपत्तिः घटादिसा
मान्याभावस्य तत्तद्विषयत्वे एकैकघटादिमति तादृशप्रतीत्यनुपपत्तेः यत्किंचिद्घटाद्यभावस्य तद्विषयत्वे घटद्व
यादिमत्यपि तादृशप्रतीत्यापत्तेरतो घटद्वयत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्यातिरिक्तस्यावश्यकत्वमिति चेन्न।
तावतापि घटेनास्ति पटौ नस्त इत्यादिप्रतीतिबलाद्घटद्वयत्वावच्छिन्नप्रतियोगिताकाभावस्यातिरिक्तस्य सिद्धावपि

६२ घटपटोभयत्वावच्छिन्नवह्निहृदोभयत्वावच्छिन्नाभावादेरतिरिक्तत्वेमानाभावात् यावत्सौ घटत्वत्तत्पः प्राति
स्विकरूपेण तत्तद्व्यक्तिभिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावानामेवप्रत्येकं घटद्वयत्वाद्यवच्छिन्नप्रतियो
गिताकत्वकल्पनात् यत्किंचिद्घटभिन्नघटाभावादेव घटौ न स्त इति प्रतीत्युपपत्तेः घटद्वयत्वाद्यवच्छिन्नप्रति
योगिताकाभावेपि मानाभावाच्च यत्किंचिद्घटद्वयवत्यपि तत्घटेतरघटस्यैव सत्त्वात् तथात्वे नचानंताभावेषु घ
टद्वयत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधस्य कल्पनामपेक्ष्य लाघवादेक एव तत्संबंध्यतिरिक्ताभावः सिध्यती
ति वाच्यम् अनंताधिकरणातिरिक्ताभावसंबंधकल्पनामपेक्ष्यानंताधिकरणसंबंधेनानंताभावेषु घटद्व
यत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधकल्पनाया एव लघुत्वादिति भावः एतेन द्वित्वाद्यवच्छिन्नाभावोपि
व्याख्यातः ननु घटो न स्तः पटो न स्तः वह्निहृदौ न स्त इत्यादिप्र [redacted]
तीतेरधिकरणभेदेननानाभावविषयकत्वमनुभवविरुद्धमेकाभावविषयकत्वस्यानुभवसिद्धत्वात्तत्तादृशानुभवा
य लाघवाऽधिकरणातिरिक्ताभावस्यावश्यकत्वापत्तिरिति चेत्साहाह उभयपक्षमेवाति। ननूभयप्रतियोगिकत्वस्या
वच्छेदकं तत्तद्धर्मद्वयघटितं चेत्तादृशाभावप्रतियोगितावच्छेदकं नवह्निर्वह्निमन्नोनवह्निर्वह्नित्वव्याप्यमत्वं तथाच हेतुस राम
६२

१ भावस्य वह्नित्वेहृदत्वे मुभयत्वाव्निनयंप्रतियोगितावच्छेदकं अवच्छेदकतावच्छासज्यवृत्तिर्न तु वह्नित्वमवच्छेदकतापर्याप्त्यधिकरणे। एवं वह्निमद्धृदभय

मानाधिकरणवह्निहृदोभयों योन्याभावस्यवह्नित्वहृदत्वमुभयत्वात्रितयंप्रतियोगितावच्छेदकं अवच्छेदकता
वच्छासज्यवृत्ति न तु वह्नित्वमवच्छेदकतापर्याप्त्यधिकरणे एवं वह्निमद्धृदोभयान्योन्याभावस्यवह्निमत्वहृदत्वमुभय
त्वंत्रितयंप्रतियोगितावच्छेदकं अवच्छेदकतावच्छासज्यवृत्ति। न वह्निमत्वमवच्छेदकतापर्याप्त्यधिकरणमतो
नाव्याप्तिः प्रागुक्तयुक्त्या सर्वेषामेव लक्षणानाम वच्छेदकतापर्याप्त्यधिकरणताघटितत्वादिति भावः न
तु भयंप्रतियोगिकत्वादिपथ्याश्रतं तु न सम्भवेत्तेदुभयोः प्रतियोगित्वेएकस्यापिप्रतियोगित्वानपायात्। नच
व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्यप्रतियोगि[redacted] नापिव्यासज्यवृत्तिरित्विवा
च्याघटोघटपटोभयाभावप्रतियोगितिप्रसज्यापत्तिः घटो न घटपटोभयाभावप्रतियोगीतिप्रसज्यापत्तेश्च
तिध्येयं। केचित्तु तदुभयंप्रतियोगिकस्यावह्नित्वत्वावच्छिन्नकंतदभावच्छिन्नाभाववृत्तिपर्याप्त्यधिकरणतासंबंधेनो
भयत्वेतादृशाभावप्रतियोगितावच्छेदकं न वह्नि वह्निमनौ न वह्नित्व वह्निमत्वे तथाच वह्निहृदोभयाभावोः
वह्निहृदमात्रवृत्तिपर्याप्त्यधिकरणत्वादिसंबंधेन वह्नित्वप्रतियोगितावच्छेदकं न तु वह्नित्वादि। न च वह्निहृदौन स्तह
सारेत्यत्रापितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमुच्यतिभंगप्रसंगः केवलवह्नित्वस्यान्वयितानवच्छेदकत्वादितिवो

ई समानाधिकरणं च साध्यं तेन समं सामानाधिकरण्यमित्यर्थः सपदं हेतुत्वेनाभिमतपदं वह्निमान्धूमादित्यादौ धूमसमानाधिकरण

६२ ण्या। न हुत्तरीत्या त्तत्संकोचावश्यकः प्रागुक्तघटपटोभयाभावादेः घटपटोभयत्वावच्छिन्नत्वेन तादृशच्छिन्नमेवप्रति
योगितावच्छेदकं तन्नापितावच्छेदकावच्छिन्नप्रतियोगिताकत्वघुसितेत्यावश्यसंकोच एवेत्याकुः न ह्यसत्त्वच्छिन्नस्य घट
पटवृत्तित्वानुपरिच्छिन्नत्वापि घटपटोन स्तइतिप्रत्ययात्। न च तत्तदानीं तादृशाप्रसप्यासिद्धरितिवाच्यं। तदानीमपि
तादृशप्रत्यपस्फुरीधितिकृते वलिखितलोहितिरिकु। यथा कृते सहेतौ सिद्धसिद्धिव्याघा तादृशहेतौ त्वेनि
यावत्त्वेति। यावत्त्विस्वसमानाधिकरणसंतताभावप्रतियोगितावच्छेदकानित्त्वच्छिन्नप्रतियोगिताकासंता
भावप्रतियोगितावच्छेदकानि यावत्तिजलत्वादिनि तत्स्वच्छिन्नप्रतियोगिताकाभावसमानाधिकरणएव वह्निः
व्याप्यसमानाधिकरणात्यंताभावप्रतियोगिनोव्यापकवत्तित्वतरामत्यंताभावादिनिलक्षणसमन्वयः धूमे
वान्व्यहीत्यादौ वह्निसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकमाईंधनवधूमत्वादितत्स्वच्छिन्नप्रतियो
गिताकात्यंताभावसमानाधिकरणः [redacted] न धूमः आर्द्रेंधनादेर्धूमव्या
पकत्वादिनिनातिव्याप्तिः एवं वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकजलत्वादितत्स्वच्छिन्नप्रतियोगि हाम

६२

ताकाभावसमानाधिकरणोधर्मस्सव्याप्तिर्वारणाययथावह्नित्व [redacted] ननु सर्वत्र तादृशावच्छेदकैर्घटत्वपटत्वगोत्वादिभिर्यावद्भि
रवच्छिन्नस्य कुत्राप्यभावादप्रसिद्धिः नच यावन्ति तादृशावच्छेदकानि तत्तत्सेकावच्छिन्नप्रतियोगिताकाभा
वेति विवक्षितमिति वाच्यं । अवच्छिन्नपदस्याश्रयार्थकतया प्रसेकाश्रयप्रतियोगिकोभयाभावादिकमादा
च यातिव्याप्त्यापत्तेः नच यावत्त्वमवच्छिन्नस्य विशेषणं तथा तादृशावच्छेदकावच्छिन्नानि यावन्ति तत्प्रतियोगिको
भाव इत्यर्थः अवच्छिन्नपदमाश्रयात्मकमिति वाच्यं । तथापि यावत्त्वावच्छिन्नप्रतियोगिकान्यतमाभावमादायाति व्याप्ति
...तादवस्थ्यात् । प्रतियोगिव्यधिकरणत्वेनाभावविशेषणे तदप्रसिद्धिः नच तादृशावच्छेदकानि यावन्ति तत्त
त्सेकावच्छिन्नप्रतियोगिताकान्यतमाभावसमानाधिकरणं यत्स्याप्यमिति विवक्षितं अवच्छिन्नत्वं च स्वरूपसं
बन्धविशेषः तस्य चावशिष्टाभावो भयाभावादिकमादाय नातिव्याप्तिरिति वाच्यं रूपवान् पृथिवीत्वादित्यादा
वव्याप्तेः पृथिवीत्वसमानाधिकरणो यो भावप्रतियोगितावच्छेदकानि यावन्त्वपटत्वादीनि यावन्ति तत्तत्से
कावच्छिन्नप्रतियोगिताकान्यतमाभावसामानाधिकरण्यस्य कापि रूपे सत्त्वात् घटीयरूपे घटत्वावच्छिन्नप्र

तियोगिताकाभावसामानाधिकरण्यविरहात् । यद्यपि रूपपुरत्वत्वावच्छिन्नप्रतियोगिताकसत्ताभावसामा
६४ नाधिकरण्यविरहात् विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिश्च जातिसमानाधिकरण्यात्सत्ताभावप्रतियो
गितावच्छेदकानियावृत्तित्वरूपैकावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यस्यैव विशिष्टसत्त्वेऽसत्त्वा
न तिरिक्ते सत्त्वादित्यमेवं हेतुसमानाधिकरणस्यत्ताभावप्रतियोगितावच्छेदकापावतोऽधर्माः यद्धर्मावच्छिन्न
न्नसमानाधिकरण्यात्सत्ताभावप्रतियोगितावच्छेदकात्सद्धर्माश्रयसामानाधिकरण्यस्य विवक्षितत्वात् य
द्रूपपदं साध्यतावच्छेदकपरं च न च रमप्रतियोगिताविशेषणान्ताविशेषसंबंधावच्छिन्नत्वेन विशेषणीया
तेन धूमवान्वह्नेरित्यादौ वह्निसमानाधिकरणसत्ताभावप्रतियोगितावच्छेदकस्याईंधनत्वादेः सर्वस्यैव धूम
वन्नि[illegible] समानाधिकरणसमवायादिव्याधिकरणसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेपि धूमप्रकार प्रणताविशे
कधूमाविशेष्यकत्वादेः [illegible] तादृशावच्छेदकपावहत्वात्तिस्य धूमसमानाधिकरणस्यत्ताभावीयविशेषणावच्छिन्न
प्रतियोगितावच्छेदकत्वाविरहात्तातिव्याप्तिः एवं प्रथमप्रतियोगितापि विशेषणताविशेषावच्छिन्नत्वेन वि
शेषणीया तेन वह्निमान्धूमादित्यादौ धूमसमानाधिकरणसंयोगसमवायादिसंबंधावच्छिन्नाभावप्रति तद्
६५

योगितावच्छेदकत्वविरहेपि नस्यानिरितिदिक्। यथा स्वनाभिप्रायेण संकेतोक्तलक्षणस्य सत्वप्रतिपादयन्ति नन्वे
वमिति प्रतियोगिनः प्रतियोगितावच्छेदकावच्छिन्नस्य उपाधेः आर्द्रेन्धनवत्वादुपाधेः भवेत्तस्यानौपाधिकरूपत्वे
यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वमिति प्राचीनग्रन्थविरोधः स्यात्तत्राह ए
न दोषेति। अयमाशयः नेदमेतदेवेत्यर्थः अनौपाधिकत्वमिसनंतरमिति: प्ररणीय ग्रीय
ते प्राचीनैरुच्यते। स्वव्यभिचारिण्यद साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नार्थकत्वमुपादि
तीयव्यभिचारिपदस्य स्वत्वतत्प्रतियोगिकात्यन्ताभावसमानाधिकरणार्थकत्वयानस्याप्य यमित्यार्थ इति भावः प्र
कारान्त रेणानौपाधिकत्वं निर्वक्ति। यद्वेति। यावन्तोयत्समानाधिकरणाभावप्रतियोगिनस्त
त्प्रतियोगिकात्यन्ताभावसामानाधिकरण्यं यस्य तस्य तत्त्वमेव तत्तस्यौपाधिकत्वमित्यर्थः अयमयसंदर्भाध्य
पदं। यद्यपि सत्त्वप्रसद्धेतुपरे वह्निमान्धूमादित्यादौ वह्निसमानाधिकर [redacted]
णाभावप्रतियोगिनामार्द्रेन्धनादीनां सर्वेषामेवाभावेन च समं धूमस्य न सामानाधिकरण्यं व्यापकव्यापकस्य स
त्वं व्याप्यकत्वादिति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ धूमसमानाधिकरणाभावप्रतियोगिनामा [redacted]

६५ र्घनादीनामभावेनसमंबन्धेः समानाधिकरण्यान्नातिव्याप्तिः धूमसमानाधिकरण्याभावाप्रतियोगित्वेऽद्रव्य
ताद्वाभावेनसमम सामानाधिकरण्यस्य वह्नौ सत्वादिति व्याप्तिगरणाकयावेतदिति। ननु सर्वत्र साध्य समा
नाधिकरण्याभावप्रतियोगित्वस्य वाच्यसिद्धत्वादृशविशिष्टाभावो भयोभ्यादिप्रतियोगित्व स्यकेवलान्वयित्वात् न
चाप्रतियोगिपदं विशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छिन्नपरं अधिकरणसंबंधाव
च्छिन्नतादृशाभावप्रतियोगितावच्छेदकत्वस्य सर्वत्र सत्वात् तादृशप्रतियोगितानवच्छेदकस्याप्रसिद्धेरिति
[redacted] विशेषणताविशेषावच्छिन्नेति वाच्यं तथापि वह्निमान् धूमादित्यादाव
धूमवान्। वह्निसमानाधिकरण्यो भावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छिन्न पा
वत्प्रतियोगिकेन पावत्वावच्छिन्नप्रतियोगिकाभावेन समं सामानाधिकरण्यस्य धूमे सत्वात् न च साध्य
समानाधिकरण्याभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकं यावत्तत्तत्सकावच्छिन्नविशे
षणताविशेषावच्छिन्नप्रतियोगिताकाभावेन सामानाधिकरण्यं विवक्षितं संयोगसमवायादिसंबंधाव एम
६५

छिन्नाभावसामान्यासंभववारणाय विशेषणताविशेषावच्छिन्नेति चरमप्रतियोगिताविशेषणमिति वा
च्यं प्रमेयत्वादेरपि लक्षणतादृशप्रतियोगितानवच्छेदकयावदंतर्गततया तदवच्छिन्नविशेषणताविशेषावच्छिन्नप्रतियो
गिताकाभावाप्रसिद्धेः संभवतादवस्थ्यात् । नच व्यतिरेकितावच्छेदकत्वेन तादृशप्रतियोगितानवच्छेदकं विशेष
णीयमिति वाच्यं तथापि केवलान्वयिन्यव्याप्तेः तत्र तादृशप्रतियोगितानवच्छेदकव्यतिरेकितावच्छेदकधर्मा
प्रसिद्धेः इदंविशिष्टसत्वादित्यादावव्याप्तेश्च विशिष्टस्यानतिरिक्तत्वात् न च यथापावके हितीयास्तत्ताभावविशेष
णं तथा च साध्यसमानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छिन्नप्रति
योगिताकयावदभावासामानाधिकरण्यमर्थः न चाप्रमात्वात्मत्वानादित्वादौ तादृशयावदभावान्तर्गता
नारूपादिसामान्याभावानां सकलरूपादिव्यक्तीनामधिकरणाप्रसिद्धेः तादृशयावदभावानामसेकासामानाधि
करण्योक्तावपि तादृशयावदभावान्तर्गततस्याकाशादेरधिकरणाप्रसिद्ध्या संभवः इदं विशिष्टसत्वादित्यादा
वव्याप्तिश्च विशिष्टस्यानतिरिक्तत्वादिति वाच्यं सप्तमीतत्पुरुषाश्रयणात्तादृशयावदभावे यत्सामानाधिक
रण्यं पर्याप्त्यावच्छिन्नस्य तद्धर्मवत्वं तदनौपाधिकत्वमित्यस्य विवक्षितत्वात् । आकाशादावपि हेतुसमानाधिक

रणेऽभावसत्तान न दोषः इति चेन्न। इत्थं पृथिवीत्वादिव्यापकाव्याप्तेः तादृशप्रतियोगितानवच्छेदकव्याप्यत्व
६६ विशिष्टसत्ताभावत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य सत्तादेः पृथिवीत्वादिसमानाधिकरणत्वात् आ
वेमा... काशाभावादेः गगनाभावेन केवलान्वयिस्थलेऽतथाविधाभावाप्रसिद्धेश्चेति भावः साध्यसमानाधिका
रणाभावीयविशेषणतात्तविशेषावच्छिन्नप्रतियोगितानवच्छेदकापावृत्तो धर्मो लदवच्छिन्नसमानाधिक
रणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकासत्त्वधर्मवत्त्वमनौपाधिकत्वमिति विव
क्षितत्वात् इति दिक्। सोपाधौ पथ्यायाः कृताभिप्रायेण लक्षणाभावं प्रतिपादयति सोपाधाविति पदैरिति।
साधनसंबंधितासंबंधितावच्छेदकसामानाधिकरण्ये। तथा च पक्षसामानाधिकरण्यावच्छेदकरूपवत्त्वं पक्ष
राम तस्य तत्सामानाधिकर... मित्यर्थः। प्रथमपक्षे संसर्गाध्यत्वेनाभिमतपरं। न चा... ममसत्तादिसाध्यकव्याप्ति
स्मिः सत्तापादव्यत्वसामानाधिकरण्यावच्छेदकगुणान्यत्वविशिष्टसत्तात्वावच्छिन्नत्वात् पक्षेऽसत
वे पक्षधर्मे च अव्यावर्तकत्वात् इति वाच्यं। यत्संबंधितावच्छेदकयद्रूपवत्त्वं यस्य तस्य तत्सामानाधिक
न रण्ये हेतुना तत्साध्यत्वमिति अभिप्रायात् इत्थं च वह्नेर्वह्नित्वरूपेण धूमव्याप्यत्वं वारणाय पक्षे सत्। तथा राम ६६

त्वसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकत्वस्येति साध्यसामानाधिकरण्यपर्याप्तिरिति फलितं । यत्र य
ले साध्यसामानाधिकरण्यावच्छेदकत्वं न स्वरूपसंबंधविशेषः लघुसमनियतगुरुरूपस्य हेतुतायामव्याप्त्यापत्तेः धू
मत्वादेर्वह्निसामानाधिकरण्यस्वरूपसंबंधरूपावच्छेदकत्वे मानाभावाच्च । नापि साध्यसामानाधिकरण्यान्यूनवृ
प त्तित्वं । वह्निमान्प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेः वह्निमान्धूमादित्यादौ अव्याप्त्यापत्तेश्च । नापि तदन्यूनानति
रिक्तवृत्तित्वं वह्निमान्धूमादित्यादावव्याप्तेः नापि तदनतिरिक्तवृत्तित्वं द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेः
किंतु पारिभाषिकं । तच्च स्वविशिष्टाधिकरणावृत्तित्वं यावत्साध्यसमानाधिकरणकत्वं । स्वपदं हेतुतावच्छेदकप
रं नच वह्निमान्नीलधूमादित्यादौ व्यर्थविशेषणेऽतिव्याप्तिः निरुक्तावच्छेदकत्वस्य नीलधूमत्वादावपि सत्त्वा
दिति वाच्यं तस्यापि लक्ष्यत्वात् । व्यर्थविशेषणेऽभाववेन वा ऽसिद्धोऽधिकेन निग्रहस्थले व्यर्थविशेषणताया दूषकता
बीजत्वात् । अत्र साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नस्याधिकरणे दे
शिकविशेषणतानाविशेषणत्वावृत्तित्वं तेन समवायेन घटादौ साध्ये वह्निमान्धूमादित्यौ गुणगुण्यन्यत्वविशिष्टसत्ताजाते
र्जातेरित्यसंभवोचनातिव्याप्तिः नवा गगनादेः कालिकसंबंधेनावृत्तित्वमते द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाधिकरणकाला

वह्नित्वर्थः। संयोगादौ संयुक्तत्वादौ। आदिना च प्रमेयत्वपरिग्रहः। तथात्वाद्दर्शनादिति। यथोक्तधूमादिसामानाधिकरण्यावच्छेदकं

वत्तित्वस्याव्यत्तिमात्रे सत्वेप्यतिव्याप्तिः गगनादेस्तेन संबंधेन वृत्तित्वमते द्रव्यगुणादिसाध्ये द्रव्यत्ववद्वृत्ति
त्वस्याप्रसिद्ध्याऽव्याप्तिः स्वविशिष्टाधिकरणावृत्तित्वमपि हेतुतावच्छेदकसंबंधेन स्वविशिष्टाधिकरणोद्देशिकविशे
षणतानाविशेषणावर्तमानत्वं तेन वह्निमान् धूमादित्यादौ वह्निसमानाधिकरणो धूमो वयवत्वादेः दैशिकवि
शेषणताविशेषणावच्छसमानाधिकरणः द्रव्यत्वादेश्च धूमसमानाधिकरणत्वेपि नाव्याप्तिरिति संक्षेपः॥
सहेतुसद्धेतोः लक्षणसत्वासत्वमुपपादयति तथाहीति। वह्निसंबंधित्वं वह्निसामानाधिकरण्यं एवं सर्व
त्र व्याप्तिप्रसक्तमिति। वह्निसाध्यसामानाधिकरण्यातिप्रसक्तं निरुक्तसाध्यसामानाधिकरण्यावच्छेदकं व
दर्शनादित्यर्थः साध्यसामानाधिकरण्यातिप्रसक्तस्यापि निरुक्तसाध्यसामानाधिकरण्यावच्छेदकत्वो अ
पेत्वे संयुक्तत्वप्रमेयत्वादेरपि तादृशधूमादिसामानाधिकरण्यावच्छेदकत्वापानादिति भावः अत्र साध्यसामाना
धिकरण्यांशस्यातिरिक्तस्य प्रवेशप्रयोजनं विरहाय्य स्वाच्छन्दसारित्वमुपलक्षणेन तरमाह अथवेति। यत्संबंधेन सा
ध्यपरं। अत्रापि यत्संबंधितावच्छेदके यद्धर्मावच्छिन्नयत्तत्त्वरूपेण तत्साव्याप्यमित्यर्थः अन्यथा द्रव्यसत्वादिसा
ध्यावपि सत्तायाः द्रव्यत्वसामानाधिकरण्यावच्छेदकविशिष्टसत्तात्वावच्छिन्नत्वादतिव्याप्त्यापत्तेः। तथा च साध्य

राम
६०

२ तथा च सोपाधौ साध्यव्यभिचारिणि साधने उपाधिनैव साध्यसंबंधोऽवच्छिद्यत इत्यर्थः। तुशब्दस्येतरव्यवच्छेदार्थत्वात्। न चो

सामानाधिकरण्यावच्छेदकहेतुतावच्छेदकवत्त्वं व्याप्तिरिति पर्यवसितं अन्यथा सर्वं पूर्ववत्। सहेतुत्वसहेतुत्वो[...]ले स
णाघत्वासत्वमुपपादयति। वह्निसामानाधिकरण्यमित्यादिना। सोपाधौ तूपाधिनेति। उपाधिना तु सोपाधा
विति यावत् भावनिला[...]ल्क्रयं साधननिष्ठसाध्यसंबंधितावच्छेदकत्वमिति वाच्यं सर्वत्र साध्यसमव्याप्तोपाधौ
सामानाधिकरण्यसंबंधेनैव साध्यसामानाधिकरण्यावच्छेदकत्वसंभवादिति भावः। यथाश्रुतं तु न संगच्छते साध
नतावच्छेदकानवच्छेदकप्रतिपादनस्यैवमसंगतोपयोगितया तद्भानात्। यद्यपि धूमवान्वह्नेरित्यादावार्द्रेन्धन
प्रभववह्नित्वादेरुपाधिभिन्नस्यावच्छेदकत्वावधारणमनुपपन्नं न चार्द्रेन्धनप्रभववह्नेरपि संयोगादिसंबंधेन धूम
संबंधितया तत्र साध्यसमानाधिकरणः सदुपाधयः हेतोरेकाश्रयेषु साध्यव्यभिचारित्वेनान्यायेना
र्द्रेन्धनप्रभववह्नित्वाद्विकमप्युपाधिरिति वाच्यं एवमपि लिहकतस्पर्शादित्यत्रानुपाधि। नापि शीतत्वेन साध्यसा
[redacted] मानाधिकरण्यावच्छेदावधारणासंगतेः। न च लिहकतस्पर्शादिसाहोशीतलादिरपि
साक्षापीभूतशीतस्पर्शादिसंबंधेनउपाधिरेवेति वाच्यं। तथा सति परार्थमात्रस्यैव यथाकथंचित्संबंधेनोपाधित्वा

११ दुपाधिभिन्नसाध्यसिद्ध्यावच्छेदकासिद्धेः। धूमवान्वह्नेरित्यादौ साधनतावच्छेदकस्यापि वह्नित्वादेरार्द्रेन्धनप्रभ
६९ ववह्न्यादिसंबंधेनोपाधित्वात्। साधनतावच्छेदके यावच्छेदस्यासंभवः। ननु उपाधिपदं साधनतानवच्छेदकपरमिति वा
२ च्य [illegible] वच्छेदकत्वे [illegible] तत्र साधनतावच्छेदकस्यापि उपाधित्वस्य सामानाधिकरण्यसंबंधेनावच्छेदकतयोपाधिपर्यासेन
तिनादेवक्यात्। तथापि सामान्यतः उपाधिभिन्नावच्छेद्यत्वेन नियमव्यवच्छेद्यमपि तु साधनतावच्छेदकता
वच्छेदकसंबंधेन साधनतावच्छेदकानवच्छेद्यत्वमात्रमिति न कोऽपि दोषः। पित्तवर्णाद्युपाधिपदमुपाधिवन्निध
र्मपरं तथा चोपाधिवन्निधर्मेणैव विपर्ययः भवति च धूमवान्वह्नेरित्यादौ आर्द्रेन्धनप्रभववह्नित्वादिकं साध्यसामा
नाधिकरण्यावच्छेदकमुपाधिवृत्ति। तथा च यथाश्रुतनियमेऽपि न व्यभिचारः। सर्वत्र व्यभिचारिणि किंचिद्विशि
ष्टसाधनस्यैवोपाधित्वात् न तत्र व्याप्तिरंकतेरभाववतः स्पर्शादि साध्यव्यापकसाधनस्थले एव व्यभिचारः
शीतान्यस्पर्शत्वादिरुपाध्यवृत्तिधर्मस्यैव तत्र साध्यसंबंधितावच्छेदकत्वमिति वाच्यं। शीर्तन्यस्य शीतेर
पि साधनावच्छिन्नसाध्यव्यापकत्वेनोपाधितया शीतान्यस्पर्शत्वादेरप्युपाधिवृत्तित्वादित्याहुः। तदसत्। तथा
पि साधनतावच्छेदकस्यानवच्छेदकत्वालाभेन प्रकृतानुपयोगात्। व्यभिचारिणि किंचिद्विशिष्टसाधनस्यैवोपाधि[illegible] त्वात्

तेन साधनतावच्छेदकस्या[illegible]प्युपाधित्वमित्यादि निषेधे । सोपाधौ साध्यतावच्छेदकेन साध्य
संबंधितावच्छेदकभिन्नत्वप्राभाकरसंमतमित्याह अत एवेति । यत एव सोपाधौ साधनतावच्छेदकेन साध्यसाध्यसं
बंधितावच्छेदकमनन्तर्भाव्येत्यर्थः साधनतावच्छेदकभिन्नेति साधनतावच्छेदकं च तत् भिन्नं चेति कर्मधारयः भिन्नप
दं च साध्यसंबंधितावच्छेदकभिन्नपरं वैशिष्ट्यं च तृतीयार्थः । अन्वयश्चास्य साधनाभिमतं इत्यनेन । तथा च साध्य
संबंधितावच्छेदकभिन्नेन साधनतावच्छेदकेन विशिष्टे साधनत्वाभिमते वर्त्तते यः साध्यसंबंधः स येनावच्छिद्य
ते । स एव विशेषणानां स एव धर्मस्तत्र साधनेऽनुपाधिरिति नियमं प्राभाकरवृत्तौ सत्यर्थः अन्यथा सोपाधौ साधन
तावच्छेदकस्यापि साध्यसंबंधितावच्छेदकत्वेऽपि तत्र व्यभिचारिणि साधनतावच्छेदके साध्यसंबंधितावच्छेदकं तत्र
सोपाधौ केवलं हेतौ तन्नियमो व्यभिचारी स्यात् तत्र साधनतावच्छेदकस्य साध्यसंबंधितावच्छेदकभिन्नत्वविर
हादिति भावः । न चार्द्रेन्धनप्रभववह्न्यादौ वह्नित्वहेतौ तन्नियमो व्यभिचारी तस्य साधननिष्ठसाध्यसामानाधि
करण्यप्रत्यधिकरणत्वेन तदवच्छेदकत्वादिति वाच्यं सामानाधिकरण्यसंबंधेनावच्छेदकत्वस्योक्तत्वात् । अ
वच्छेदकत्वं च न स्वरूपसंबंधविशेषः आर्द्रेन्धनीयवह्न्यादेस्तादृशावच्छेदकत्वे मानाभावेनाव्याप्त्यापत्तेः नाप्यन

६६

५.५५

नैतिरिक्तवृत्तित्वं धूमवान्वह्नेरित्यादौ आर्द्रेन्धनप्रभववह्निसामानाधिकरण्यस्यार्द्रेन्धनादौ वह्निनिष्ठधूमसमा
धिकरण्यानतिरिक्तवृत्तित्वासंभवापत्तेः किं तन्न्यूनवृत्तित्वव्यापकत्वमितिपावत् इत्थं च साध्यसंबंधिता
नवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधननिष्ठसाध्यसंबंधितायाः सामानाधिकरण्यसंबंधेन व्यापको
यः स एवोपाधिरिति फलितो प्रत्यक्षमुद्भूतरूपादित्यत्र प्रत्यक्षत्वसामानाधिकरण्यस्य सत्त्वेत्वरूपत्वादौ स
त्वात्तत्र च महत्त्वसामानाधिकरण्याभावान्महत्त्वे व्यभिचारेणोपनिष्ठान्तसाध्यसंबंधिताविशेषणे। तस्या
पि साधनावच्छिन्नसाध्यव्यापकत्वेनोपाधित्वात् न च तत्र व्याप्यपक्षाप्रसिद्धा जातिमत्त्वादित्यत्र पक्षधर्मद्रव्यत्वावच्छि
न्नसाध्यव्यापकोपाध्यनुद्भूतरूपे व्याप्त्यापत्तिः विषमव्यापकस्योपाधित्वानभ्युपगमे च महत्त्वे व्यभिचार
णोपनिष्ठान्तविशेषणवैयर्थ्यं वक्ष्यमाणलक्षणे धूमवान्वह्नेरित्यादावार्द्रेन्धनादेरव्याप्यत्वं कर्मान्यत्वे सतिस
त्त्वात् प्रत्यक्षमनुद्भूतरूपात् महानिःस्पर्शत्वादित्यादौ गुणान्यत्वमहत्त्वानित्यसमवेतत्वादिषु अतिव्याप्त्याप
त्तेश्चेति वाच्यं। साधनावच्छिन्नसाध्यव्यापकस्यैव तन्मते उपाधिनया उक्तस्थले उद्भूतरूपस्यानुपाधित्वात्। न
च व्याप्तिसाधकव्यक्तिहेतुकेऽव्याप्तत्वादित्यादौ साध्यव्याप्यघटत्वादौ अतिव्याप्तेर्दुर्वारत्वात् सामानाधिक
रण्यसंबंधेन तस्यापि साधननिष्ठसाध्यसामानाधिकरण्यव्यापकत्वादिति वाच्यं· परेषामनेनमुपाधिलक्षणांगीकृते तादृशविशिष्ट

तथा च असंभवाव्याप्त्योर्व्यभिचारसंपादकतया दोषत्वेपि व्याप्यकातिप्रसंगस्यादोषतयाऽतिव्याप्तेरप्यदोषत्वात् नचैतस्य व्यापकधर्मरूपत्वे
साध्यसंबंधितानवच्छेदकसाधनतावच्छेदकावच्छिन्नेति साधनविशेषणावैयर्थ्यं व्यापकातिप्रसंगस्यादोषतया सत्त्वेतो साध्यव्यापकेऽतिव्या
प्तेरप्यदोषत्वादिति वाच्यं शुद्धधर्मवद्विशिष्टधर्मस्यापि व्यापकत्वेन व्यापकेऽव्यर्थविशेषणतया दोषत्वादिति दिक् नन्वेतादृशधर्मस्य गोत्ववा
नश्वत्वादित्यादिविरुद्धस्थले सास्नादिमत्त्वाद्युपाधावभावात्कथमुपाधित्वव्यापकत्वमित्यत आह अत एवेति यत एवैतन्मते न तत्र तस्योपाधित्व
मत एवेत्यर्थः तत्रैतन्मते साधनावच्छिन्नेति साधनविशिष्टस्येत्यर्थः ध्रुवनिर्देशश्चान्यथा साधनविशिष्टसाध्याप्रसिद्ध्या तत्रैवतल्लक्षणमव्याप्तं स्या
दिवारणाय विशेष्यदलं स श्यामो मित्रातनयत्वादित्यादावव्याप्तिवारणाय सत्त्वं तत्तत्रैव महानसत्वादिवारणाय विशेष्यदलं स श्यामो मित्रातनयत्वा
दित्यादावव्याप्तिवारणाय साधनावच्छिन्नेति नच अयं वायुः प्रमेयत्वादित्यादौ पक्षधर्मद्रव्यत्वावच्छिन्नसाध्यव्यापके उद्भूतरूपवत्त्वादौ अव्याप्तिरि
ति वाच्यं साधनावच्छिन्नसाध्यव्यापकस्यैवैतन्मते उपाधितया तस्यालक्ष्यत्वात् द्रव्यसत्त्वादिसाध्ये रूपान्यत्वगुणान्यत्वादिकं चेल्लक्ष्यमेव तेन न तत्राति
व्याप्तिः केचित्तु साध्याभावविशिष्टसाधनवद्वृत्तेरेव तन्मते लक्ष्यत्वात् अयं वायुः प्रमेयत्वादित्यादौ उद्भूतरूपादेर्नाव्याप्तिः एवं च द्रव्यसत्त्वादि
त्यादौ रूपान्यत्वगुणान्यत्वादेरलक्ष्यतया नातिव्याप्तिवारणाय साधनाव्यापकत्वमित्यत्र साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वमि
ति वाच्यं धूमवांश्च ह्रदे द्रव्यप्रमेयत्वादित्यादौ तत्तद्योगोलकान्यत्वसत्त्वादिकं न लक्ष्यमतो न तत्राव्याप्तिरित्याहुः नन्वेतस्योपाधिलक्षणत्वे व्यभिचारे चा
वश्यमुपाधिरिति नियमो न स्यात् व्यभिचारिणि हेतौ तादृशधर्मानास्तित्वस्यैव निरुपाधित्वादित्यत आह अव्यभिचारिणीति संगच्छत इत्यन्तमेको ग्रन्थः व्यभि
चारित्वं च साध्यतदभावसामानाधिकरण्यं तच्चोभयसंबंधाभावान्न तदुभयसामानाधिकरण्यासंभवात् साध्यसंबंधितावच्छेदकमधिकरणमेव साध
ननिष्ठसाध्यसंबंधितावच्छेदकत्वेन रूपेण तादृशसंबंधेनेति शेषः तत्रोपाधिः अतः तत्रोपाधिः साध्यतदभावयोर्विरोधितदुभयसामानाधिकरण्य
योर्विरोधात्कथं तत्रावच्छेदकभेदापेक्षेत्यत आह अन्यथेति साध्यतदभावसामानाधिकरण्ययोर्विरोधाभावे इत्यर्थः तत्र व्य[illegible]

मू॰ मथु प्यत्वञ्च व्याप्यत्वसंभवेति व्यभिचारित्वेनेति अत्र सोपाधिकः व्यभिचारित्वादिति व्यभिचारित्वेन हेतुता उपाध्यनुमानं अप्रयोजनकं अनुकूलतर्का
१० भावादित्यर्थः साध्यतदभावसामानाधिकरण्यविरोधेत्यत्र अवच्छेदकविषयाविरोधभंजनमेवानुकूलतर्कः साधननिष्ठसाध्यसंबंधितावच्छेदकी
भूतस्याधिकरणस्यैव तादात्म्यसंबंधेन तादृशावच्छेदकत्वे तत्प्रयोगात् साध्याधिकरणत्वादित्यपेक्षणात् उपाधित्वादिति भावः सोपाधौ साधनतावच्छेद
कस्य न साधननिष्ठसंबंधितावच्छेदकत्वमिति सत्रपाभाकरसंमतिमुक्ता आचार्यसंमतिमाह अत एवेति एतदेव सोपाधौ साधनतावच्छेदकं केवलं
न साध्यसंबंधितावच्छेदकं अत एवेत्यर्थः तस्य साध्यसमव्याप्यधर्मस्य साधनाभिमते चकारात्तीति साधनाभिमताशेषप्रकारीभूतसाधनतावच्छेदके ता
दात्म्यसंबंधेन विशेषणीयभ्रमविषयो भवतीत्यर्थः इतीति हेतोरित्यर्थः उपसमीपस्थे आदधाति स्वाश्रयसंष्टपरयवावनिष्ठधर्मप्रकारकं
भ्रमं जनयतीति उपधिपदव्युत्पत्तेति शेषः स्फटिके जपाकुसुमवदिति यथा जपाकुसुमं स्फटिके स्वनिष्ठलौहित्यभ्रमजनकं तथा लौहित्याभेदभ्रमज
नकत्वात् स्फटिके उपाधित्वमित्यर्थः उपाधिरसावुच्यत इति अत्र सोऽसाध्यसमव्याप्तो धर्मः उपाधिपदवाच्यत्वेनाचार्यैरुच्यत इत्यर्थः अन्यथा सोपा
धावपि केवलसाधनतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वेन तत्र स्वनिष्ठसाध्यसंबंधितावच्छेदकरूपोपाधेः आनेतृतादात्म्यसंबंधेन साधनता
वच्छेदके विशेषणीभूय भ्रमविषयत्वनिबंधनसाध्यसमव्याप्तधर्मस्य उपाधिपदवाच्यत्वाभिधानमसंगतं स्यात् तत्संबंधेन तद्धर्मावच्छिन्नप्रति
योगिताकाभाववति तत्संबंधेन तद्धर्मावच्छिन्नप्रकारकतानस्यैव भ्रमतया साधनतावच्छेदके तादात्म्यसंबंधेन उपाधिनिष्ठसाध्यसंबंधितावच्छेद
कप्रकारकतानस्य भ्रमत्वासंभवादिति भावः एतच्च साध्यसंबंधितावच्छेदकत्वं सर्वसाधारणामनुगतस्वरूपसंबंधरूपलक्षणाघटकमिति अभि
मानेन अन्यथा साधनतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वेऽपि साधनतावच्छेदके उपाधिनिष्ठसाध्यसंबंधितावच्छेदकाभेदभ्रमस्य यथोक्तभ्र सम॰
मत्वसंभवात् अत एव आचार्यैरपि व्याप्यतरमपहाय साध्यसंबंधितावच्छेदकरूपवत्त्वलक्षणाव्याप्तिरूपकामकत्वमेव योगार्थोऽभिहितः स्वरूप ७०
संबंधरूपावच्छेदकघटितत्वेन तस्य सर्वतो लघुत्वादिसमभिमानादिति ध्येयं नन्वेवमाचार्यनये मूलमनुरुद्धेत्यादौ महानसत्वादौ नोपाधित्व

वहारःस्यात्योगार्थसत्वात् नचसर्वेसाध्यसमानाधिकरणाइतिन्यायेनइष्टापत्तिरितिवाच्यंआचार्यैःसाध्यसमव्याप्यस्यैवोपाधित्वाभ्यु
पगमादित्यतआहलक्षणांशेतिव्यर्थतावच्छेदकत्वेत्यर्थः तथाचोपाधिपदस्ययोगरूढत्वान्महासत्वादौयोगार्थसत्वेपिव्यर्थभावा
न्नोपाधिपदव्यवहारइतिभावः साध्यसाधनेतिसाधनसमानाधिकरणसाध्यसमव्यापकत्वेसतीत्यर्थः अन्यथागोत्ववान्भव्यत्वादित्यादिविरुद्धे
स्थलेसाध्याविरुद्धत्वेनोपाधिपदवाच्यत्वप्रसंगात् नचैवमपिसश्यामोमित्रातनयत्वादित्यत्रशाकपाकजत्वादावव्याप्तिर्दुर्वारेतिवाच्यंआचार्यनये
साध्यसमव्याप्यस्यैवोपाधितयातस्यानुपाधित्वात् ननुतथाप्यत्रविशेष्यदलव्यर्थंअसंभवितोसाध्यव्याप्यत्वस्ययोगार्थस्याभावादेवातिप्रसंग
विरहात् नचैवसंभवितोसाध्यसमव्याप्तेःतिव्याप्तिवारणायापक्षदावश्यकमितिवाच्यंतत्रहेतुतावच्छेदकस्यापिसाध्यसंबंधितावच्छेदकतयास्वनिष्ठसा
ध्यसंबंधितावच्छेदकतयास्वनिष्ठसाध्यसंबंधितावच्छेदकत्वापित्तिसंक्रामकत्वस्यस्वनिष्ठतादृशव्याप्तिप्रकारकहेतुतावच्छेदकत्वेनजनकत्वरूप
स्यलघुतयाआचार्याभिप्रेतयोगार्थस्याभावादेवातिप्रसंगविरहात्नचसाध्याव्यभिचारिहेतावेवस्वनिष्ठतादृशव्याप्तिसंक्रामकत्वसंभवा
दतिमैवं वह्निमान्धूमादित्यादिसद्धेतौहेतुतावच्छेदकसंबंधभिन्नसंबंधेनसाध्यसमव्याप्तवह्निप्रकारकप्रमाविशेष्यत्वातिप्रसक्तिवारणा
यविशेष्यदलस्यावश्यकत्वात् संबंधभेदेनसाध्यसंबंधितावच्छेदकत्वस्यभिन्नतयातदवच्छेदकत्वस्याभिन्नतयातदवच्छेदकत्वस्यापिभिन्न
त्वेनतत्रनिरुक्ततादृशव्याप्तिसंक्रामकत्वस्ययोगार्थस्यासंभवात्नचहेतुतावच्छेदकसंबंधेनयास्वनिष्ठव्याप्तिःतत्संक्रामकत्वविवक्षयैवतत्रा
तिष्कारइतिवाच्यंधूमवान्वह्नेरित्यादौरूपप्रकारकप्रमाविशेष्यादेरसंग्रहापत्तिरितिभावः नन्वेवंविषमव्याप्ततन्मतेउपाधिपदवाच्यंस्या
त्तदव्यर्थसत्वादित्यतआहविषमेतिप्रवृत्तिनिमित्ताभावादितियोगार्थाभावादित्यर्थः यथास्थलपद्मेनपंकजपदवाच्यत्वमितिभावः इत्या

मू॰ मञ्जरी
१

पात्ततः पौगिकप्रवृत्तिनिमित्तान्न्रावेपि केवलरूपधर्ममादाय उपाधिपदवाच्यत्वस्य उद्भूतत्वात्तन हि योगार्थविशिष्टरूढ्यर्थः प्रवृत्तिनिमित्तः नैव

वस्थलपक्षस्यापि पंकजपदवाच्यत्वापत्तिरिति वाच्यं युक्तितादृशस्याप्तेति वैजात्येन रूढ्यर्थतावच्छेदकेतदा तस्यापि हुर्वारत्वात् अत एव प्रामा

णिकास्तव्यावृत्तं वैजात्यं तत्र रूढ्यर्थतावच्छेदकमामनंतिनन्वेवं विषमव्याप्तस्योपाधिपदवाच्यत्वे दूषकवीजमपि तस्य न स्यादत आह दूषकता

चेति तस्य विषमव्याप्तस्य व्यभिचारोन्नायकतयेति व्यभिचारितासंबंधेन तद्व्यत्ते या साध्यव्यभिचारानुमानसंभवादित्यर्थः ॥ उपाधितेति ॥ उपा

धिपदवाच्यतेत्यर्थः तादात्म्यसंबंधेन तयोरप्युपि साध्यव्यभिचारानुमापकत्वादिति भावः अप्रयोजके साध्यव्यापकव्यभिचारिणः अप्र

योजकत्व साध्यव्यापकत्वव्यभिचारिणोरिसर्थ इति केचित न च स्वव्यभिचारित्वेन साध्यव्यभिचारानुमापकत्वमेव तथात्वं न चेदं अप्रयोजक

त्वादेरीति वाच्यं योगार्थापेक्षया एतस्य गुरुत्वादिति दिक् ॥ ॥ इत्यनुमानपरिच्छेदरहस्यव्याप्तिरहस्यं ॥ ॥ ज्ञानत्वेन हेतुत्वान्मुपगमेन चत्ता

ज दृष्ट्याप्रत्यक्षाप्रसिद्धाप्रतियोगिप्रसिद्धं विशेषणतावच्छेदकप्रकारकज्ञानविधया तत्तन्त्वमादाय प्रसिद्ध्यभिधाने सहचारविशिष्टबोधात्मकप्र

नौपाधिकत्वज्ञानं व्याप्तिधीहेतुरिति भावः। अनवस्थानान्नादिति। तदनुमानमूलभूतव्याप्तिज्ञानेप्यनौपाधिकत्वनिश्चयस्य हेतुत्वादिति भावः। व्याप्तिग्र
हे परंपरयापि कुत्रचित्तर्कोपयोग इति मीमांसकैकदेशिमतं निराचष्टे। येनेति। व्यभिचारसंशयस्य तन्मात्रस्य प्रतिबंधकत्वादिति शेषः। अनुकूले
व्यभिचारशंकानुत्पादकत्वे इत्यर्थः। सहचाराहीत्यादिना संबंधिनः साध्यादेः परिग्रहः। व्याप्तिग्रहं सर्वत्र व्याप्तिनिर्णयं। साध्यव्यापकत्वग्रहे सा
ध्यव्यापकत्वनिर्णये। अनुमानमात्रमिति संदिग्धसाध्यकपक्षकानुमानमात्र[illegible]मुच्छिद्येत इत्यर्थः। यथाश्रुते निश्चितसाध्यके व्यभिचारनिर्णयस्य

स्वपक्षेतरत्वस्य व्यभिचार १

चि॰ टी॰ पक्षेतरत्वस्य साध्यव्यापकत्वनिर्णयासंभवादनुमानमात्रोच्छेदाभावात् अस्माकं तु पक्षे साध्यं संशयसत्त्वादनुकूलतर्कं
१४ विना न साध्यव्यापकत्वनिर्णयसंभव इति भावः। अनुमानमात्रेति। तादृशानुमानमात्रोच्छेदापत्त्वज्ञानलक्षणापत्तिः तुल्यतर्को दिरर्थः। नोपाधिः
८५ नस्वव्यभिचारेण साध्यव्यभिचारानुमापकः। उपाधित्वेनेति। व्यभिचारोन्नायकत्वेनेत्यर्थः। साध्यव्यापकत्वेन तन्निर्णयेन। व्यापकव्यतिरेके व्यापकव्यतिरेक
ज्ञाने। व्याप्यव्यतिरेकस्य व्याप्यव्यतिरेकज्ञानस्य। ननु तादृशानुमानमात्रोच्छेदकत्वज्ञानमेव न तु साध्यव्यापकताज्ञाने विरोधी तस्य स्वरसादात्। अपि चेति। व्य
तिरेकेति। न चास्मन्मते साध्याप्रसिद्धिः परशीलेन वपरं व्यभिधानात्स्वमते तु अतिरिक्तत्ववद्विर्भावेन साध्यं वाच्यं असाधकं न लिंगं व्याप्यत्वस्य व्याप्यत्वेन नि
श्चितस्य पक्षधर्मत्वेन पक्षधर्मत्वनिर्णयेन। तत्रेति व्यभिचारसंशयसामग्रीसत्त्वेन न तत्र व्याप्तिनिर्णय इत्यर्थः। ननु उक्तव्याप्तीनां ज्ञानं न समुच्चये हेतुरसंभ
वात् नचप्रत्येकं। अननुगमात्कस्यचिदेव ज्ञानं तथ्येत्यननुविगमकाभावात् तत आह उक्तेति। अनुमितिहेतुरिति। ज्ञानविषयतयानुमितिहेतुतावच्छेदके
त्यर्थः। लाघवादिति प्रतियोगितावच्छेदकताघटकसंबंधेन यत्प्रतियोगितावच्छेदकावच्छिन्नं यत्प्रतियोगितावच्छेदकसंबंधेन तद्भिन्नत्वस्य हेत्वधिकरणाविशेष
णत्वेनात्वं तामाभवगर्भमपेक्ष्यापि लाघवादित्यर्थः। अन्योन्याभावगर्भलक्षणे तन्नोपादेयं प्रयोजनविरहात् अन्योन्याभावगर्भलक्षणेऽपि प्रतियोगिता
वच्छेदकसंबंधेन प्रतियोगिमद्भिन्नत्वं हेत्वधिकरणाविशेषणमात्रवत्रूपकमन्याव्याप्तेः संयोगादिमदन्योन्याभावस्य साध्यव्याप्यवृत्तितानये संयोगी द्रव्यत्वादित्यादावव्या
प्यवृत्तिसाध्यकेऽव्याप्तेः। अन्योन्याभावस्य व्याप्यवृत्तित्वनियमनयेपि संयोगादिमद्भेदस्याव्याप्यवृत्तितानये हेतुसमानाधिकरणपमभेतत्रानुमितुमाहाय रा म०
गेः। तथा च कल्पपर्वं। नन्वान्योन्याभावगर्भलक्षणे हेत्वधिकरणवृत्तित्वमेव निरवच्छिन्नवृत्तित्वेन विशेषणीयं ननु यथोक्तप्रतियोगिमद्भिन्नत्वेन हेत्वधिकरणमतो ८५

लाघवमिति वाच्यं । तथा सत्यसंताभावगर्भलक्षणेऽपि तथैव लाघवसत्त्वात् यात्तत्राऽपि गौरवाभावादिति चेन्न । अन्योन्याभावगर्भलक्षणे तादृशा प्रति
योगिभिन्नत्वेन हेत्वधिकरणे विशेषणेऽपि प्रतियोगितावच्छेदकतावच्छेदकसंबंधप्रतियोगितावच्छेदकयोरभावेनैव लाघवात् । अ
कतो । अन्योन्याभावगर्भलक्षणे प्रतियोगिभिन्नत्वं हेत्वधिकरणस्य प्रतियोग्यनिरूपितत्वं वा हेत्वधिकरणवृत्तित्वविशेषणं तु शब्दोक्तं गौरवात्
न्याकातं ताभागे वैयर्थ्यमपि स्यादिति वा लाघवमिति भावः । अत्र केचित् । अन्योन्याभावगर्भव्यापकताघटितव्याप्तिज्ञानमपि नानुमितिहेतुः किंतु सा
ध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानमेवानुमितिहेतुरिति लाघवात् ततोऽरुचिप्रकारस्तु वागेवर्द्धमानः । केवलान्वयिनि भ्रमरूपव्याप्तिज्ञानादेव सर्वत्रा
नुमितिः स च हेतोऽन्यत्रभिन्नव्याप्तिज्ञानादेवानुमितिरिति नियमे च मानाभावः भ्रमजनकदोषरहितस्य केवलान्वयिनोऽनुमितिरसिद्धेरेव एवं
द्रव्यं विशिष्टसत्त्वादित्यादावपि भ्रमरूपव्याप्तिज्ञानादेवानुमितिः । न च साध्याभाववदवृत्तित्वज्ञानस्यैव सर्वत्रानुमितिहेतुत्वे हृदादिव्याप्तिमर
भेदः हृदे धूमाभाववत्तापर्वतसिद्धसाध्यकानुमितिर्न स्यात् साध्यस्याप्रसिद्धत्वात् तद्भाववदवृत्तित्वज्ञानस्यासंभवादिति वाच्यं । तत्र पृथिवी
तरत्वधूमादेरेव साध्याभाववत्पृथिवीतरावृत्तित्वधूमवत्त्ववदवृत्तित्वज्ञानस्यैव सर्वत्रानुमितिहेतुत्वात् । अन्यथा तत्राऽपि साध्यस्याप्रसिद्ध्या
साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्य तत्रासंभवात् । ननु साध्याभाववदवृत्तित्वज्ञानस्यैवानुमितिहेतुत्वे वाच्य
त्वादौ वह्न्यादौ वा केवलान्वयित्वग्रहदशायामनुमितिर्न स्यात् तद्विरोधदर्शनसत्त्वे नाभावे साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकाव

वि.टी. छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यवत्त्वज्ञानासंभवात् व्यापकसामानाधिकरण्यज्ञानस्यैवानुमितिहेतुत्वे तु तदानीमप्यनुमित्युत्पा
९५ दात् न च केवलान्वयित्वग्रहे तोर्मं भवतु साध्याभाववान् अभाववृत्त्याकारकोऽभावत्वावच्छेदेनाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व
८६ संबंधावच्छिन्नस्य साध्याभावस्य निर्णयः तादृशनिर्णयः निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानवदनाहार्यमा[illegible]नरूपत्वेनाप्रतिबंधकत्वात् न चापि तादृशाभावकोऽभा
धि ववत्सामाना[illegible]करण्येन साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नस्य साध्याभावस्य नि
र्णयः तत्सत्त्वेपि अभाववत्सामानाधिकरण्येनाभावे साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यप्रकारकस्य सा
ध्याभाववद्वृत्तित्वज्ञानस्योत्पत्तौ बाधकाभावात् अंशतो बाधस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशेषणासिद्धावविरोधित्वादिति वाच्यं साध्यात्यं
ताभाववत् उत्ताकर्षकस्याभावत्वावच्छेदेनाभावे तादृशसंबंधावच्छिन्नसाध्यात्यंताभाववन्निर्णयरूपस्य साध्यवद्वृत्त्योऽभाववृत्त्याकारकस्याभावत्वावच्छे
देनाभावे साध्यवद्वृत्त्यत्वाभाववन्निर्णयरूपस्य च केवलान्वयित्वग्रहदशायामनाहार्यस्यापि संभवात् अत्यंताभावत्वान्योन्याभावत्वादेरखंडधर्मविशेषरूपत्वेनाभाव
घटितत्वात् वाच्यत्वाभाववान् अभाववृत्त्याकारकस्यासंभवेपि तादृशाकारस्याभावत्वावच्छेदेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्न
वाच्यत्वत्वावच्छिन्नप्रतियोगिताकवाच्यत्वत्वाभाववज्ज्ञानस्यानाहार्यस्यासंभवाद्धेतिचेन्न तादृशाकेवलान्वयित्वग्रहदशायामनुमितेरप्रसिद्धेः
अत्यन्तान्योन्याभावत्वावच्छेदेन हेतुसामानाधिकरण्याभावग्रहदशायामनुमित्यनुत्पादस्य त्वयापि वक्तव्यत्वेन क्वचित् फलापलापस्याविशेषात् वस्तुतस्तु साध्या रा.म.
भाववद्वृत्तित्वरूपव्याप्तिवत्त्वं न निविष्टं गौरवात् प्रयोजनाभावाच्च किंतु साध्याभाववद्वृत्तित्वज्ञानमेव हेतुः न च यथोक्तकेवलान्वयित्वग्रहदशायामपि ८६

हं भवति साध्यांशे निर्धर्मितावच्छेदकत्वात्। ननु तथापि साध्याभाववद्वृत्तित्वज्ञानस्यैवानुमितिहेतुत्वे घटो द्रव्यमित्यादिस्वरूपतो द्रव्यत्वादिविधेयकानुमि
तिः कदाचिदपि न स्यात् साध्याभाववद्वृत्तित्वस्य द्रव्यत्वत्वादिरूपसाध्यतावच्छेदकघटितत्वेन द्रव्यत्वत्वाद्यवच्छिन्नविधेयकानुमितिः कदाचिदपि न स्यात् सा
ध्याभाववद्वृत्तित्वस्य द्रव्यत्वत्वादिरूपसाध्यतावच्छेदकघटितत्वेन द्रव्यत्वत्वाद्यवच्छिन्नविधेयकानुमितित्वस्यैव तद्धेतुः कार्यतावच्छेदकत्वात्तथाऽति
प्रसंगात् द्रव्यत्वत्वाद्यतिरिक्तानवच्छिन्नद्रव्यत्वादिविधेयकानुमितित्वस्य कार्यतावच्छेदकत्वे द्रव्यत्वाद्यनुमितेर्नियमतो द्विविधविषयत्वप्रसंगात्। न च यत्र सा
ध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहे साध्यतावच्छेदकसंबंधेन साध्यद्रव्यत्वादेः स्वरूपतोऽभावप्रकारकत्वं तत्र स्वरूपतो द्रव्यत्वादिविधेयकानुमितिः य
त्र च भेदग्रहे तादात्म्यसंबंधेन द्रव्यत्वत्वादिरूपेण साध्यस्य द्रव्यत्वादेः प्रकारत्वं तत्र तद्द्रव्यत्वत्वाद्यवच्छिन्नविधेयिकेति कार्यकारणभावभेदान्न नियमतो द्वि
विधविषयत्वमिति वाच्यं अभावप्रत्यये हि प्रतियोगिनि तद्धर्मवैशिष्ट्यमवगाहमानं एव तद्धर्मस्यावच्छेदकत्वमवगाहते। ननु तद्याद्वेति नियमात् द्रव्य
त्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधेन स्वरूपतो द्रव्यत्वादेरभावप्रकारतासंभवादिति चेन्न। स्वरूपतो द्रव्यत्वादिविधेयकानुमितेरसिद्धेः अभावप्रत्यये
हीति नियमस्यैवासिद्धेः। यदि च तादृशानुमितिरपि प्रामाणिकी तत्र विषये मापि च प्रामाणिकः तदाऽस्मन्मते साध्याभाववद्वृत्तित्वज्ञानमेव हेतुस्तादृशानुमितौ
येद्व्याप्यवृत्तित्वादिरूपव्याप्तिज्ञानं हेतुरिति प्राहुः। अन्ये तु अन्योन्याभावगर्भव्याप्तिज्ञानस्यैवानुमितिहेतुत्वे ऽनौपाधिकत्वज्ञानमनुमितिहेतुरिति प्रामाणि
कप्रवादविरोधः स्यात् अनौपाधिकत्वं तिति। तल्लक्षणमिति। लिंगविधया ऽन्योन्याभावगर्भव्याप्तिज्ञापकमित्यर्थः। तथा च प्रामाणिकप्रवादे हेतु
पदं प्रयोजकपरमिति भावः। ननु पक्षेऽनौपाधिकत्वं व्याप्तिज्ञानविषयतया ऽनुमितिकारणतावच्छेदकं स्यात् तदा तदभावे उपाधिरसिद्धावेव प्रविशेत् अ

५ अनौपाधिकज्ञानमिति उपाधिमत्त्वज्ञानाभाव इत्यर्थः। येनोपाधिज्ञानं व्यभिचारज्ञानवत्स्वतः प्रतिबंधकं स्यादिति भावः। ननु किं उपाधिर्दूषणमेव
६ नेत्यत आह तथा चेति उपसंहरति एवं चेति परमुखनिरीक्षकतयेति। अनुमितिकारणपरामर्शान्यतरप्रतिबंधकज्ञानविषयेत्यर्थः। सिद्धसा
धनवदिति। पक्षविशेष्यकसाध्यनिश्चयवदित्यर्थः। हेत्वाभास ल्लोभावेनेति ज्ञेषः। नदूषक। नदूषक हेत्वाभासः अन्यथा अनौपाधिकत्व
 नुमितिजनकतावच्छेदकव्याप्त्यभावस्य व्याप्यत्वासिद्धत्वात् परिशेषेवनेता उपाधि हेत्वाभासान्तरं स्यादिति शंकते नचैवमिति एवं अनौपाधिकत्वरूपव्या
 प्तिज्ञानस्यानुमितिहेतुत्वे अस्मिन्मते उपजीव्यत्वेनेति। व्याप्तिनिर्णायकप्रयोजकज्ञानविषयत्वेनेत्यर्थः। इदं हेत्वाभासत्वे हेतुः न तु हेत्वाभासान्तरत्वे हेत्वाभासान्तरं स्यात्
व्याप्यत्वासिद्धिभिन्नहेत्वाभासः स्यात् व्याप्त्यभावत्वेनानुमितिहेतुज्ञानविषयतावच्छेदकव्याप्त्यभावत्वेन असिद्धिः व्याप्यत्वासिद्धिः। उपजीव्यमयीति। परंप
रया व्याप्ति निर्णायोपजीव्यमयीत्यर्थः। स्वतो दूषकमिति अनुमितिनकारणपरामर्शान्यतरं प्रतिसाक्षात्प्रतिबंधकमित्यर्थः। तयोरन्यतरं प्रतिसाक्षात्प्रतिबं
धकं यज्ज्ञानं तद्विषय एव च हेत्वाभास इति भावः। एतदेव स्पष्टयति नह्यन्यसेति। हेतुत्वात् व्याप्तिधीविरोधित्वात् तद्धीः व्यभिचारधीः। तथा स्वतः प्रतिबंधिकां च
नौपाधिकत्वस्य पारिभाषिकस्यैव निर्वचनात् उपाधेस्तदभावत्वाभावेन व्याप्यत्वासिद्धावंतर्भावासंभवादिति भावः। सिद्धसाधनवदिति च हेत्वाभासत्वाभा
वे दृष्टांतः नतु परमुखनिरीक्षकतायां तत्र यथोक्तपरमुखनिरीक्षकत्वाभावादिति ध्येयं। किंचितेति अत्र व्यभिचारत्वमनुपपन्नमेतेनानयोरिति साध्याभाव
व वृत्तित्वस्य समानाधिकरणाभावाप्रतियोगिसाध्यसामानाधिकरण्ययोरित्यर्थः॥ व्याप्तिग्रहोपायपरहस्यं। प्रसंगसंगतसामान्यलक्षणायाः प्रमाणता
तां व्यवस्थापयितुमाह। व्याप्तिग्रहश्चेति महानसादौ जायमानो धूमत्वरूपेण सन्निकृष्टधूमे वह्नित्वरूपेण सन्निकृष्टवह्नौ व्याप्तिसाक्षात्कारश्चेत्यर्थः। सा
मान्यलक्षणाप्रत्यासत्त्येति। धूमत्ववह्नित्वसामानाधिकरण्यत्वरूपसामान्यप्रत्यासत्त्येत्यर्थः। सकलधूमादीति। आदिपदात् सकलवह्निधूम इति सक
लतत्सामानाधिकरण्ययोः परिग्रहः। कथमन्यथेति। अन्यथा। तस्य सकलधूमाविषयकत्वे पर्वतीयधूम इति। यद्यपि धूमत्वरूपेण पर्वतीयधूमवत्ता
निश्चयस्य पर्वतीयधूमे व्याप्तिप्रकारकत्वासंभव इत्यर्थः। विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्य हेतुतया व्याप्तिप्रकार

त्वात् अनुमितिहेतुत्वप्रसक्तेश्च उपाधेर्हेत्वाभासत्वं॥ सवस

५ शाब्दबोधस्मृत्यादितः सकलधूमादिगोचरो मानसो बोधो न स्यात् मनोजन्यज्ञानविरहादिति वाच्यं शाब्दादेरपि मनोजन्यत्वात् न च तथापि धूमत्वादिप्रकारक
शाब्दबोधादितो निखिलधूमादिगोचरचाक्षुषादिर्न स्यादिति वाच्यं इष्टत्वात् प्राचीनैः तत्तत्प्रकारक ५

णापर्वतीयधूमज्ञाने विनापर्वते व्याप्तिविशिष्टधूमवैशिष्ट्यज्ञानासंभवादिति भावः। तस्मादनुमितिरिति। पर्वते धूमत्वरूपेण तज्ज्ञाननिश्चयादनुमितिरित्यर्थः। व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयस्यैव लाघवादनुमितिहेतुत्वादिति भावः। ननु सा किं संयोगादिलक्षणा बोध्या प्रत्यासत्त्यन्तर्गता तदतिरिक्ता वेत्यत आह। सा चेति। इन्द्रियसंबद्धेति। स्वजन्यज्ञानप्रकारत्वरूपेन्द्रियसंबंधाश्रयस्य सामान्यस्य व्यक्तिषु धर्मितारूपस्वरूपसंबंधसत्त्वादित्यर्थः। स्वमिन्द्रियं तथा च सामान्यलक्षणां निरूपकं यस्या इति धूमत्वा चक्षुरादिजन्यज्ञानप्रकारीभूतधूमत्वादिसामान्यनिरूपिता धर्मितारूपविशेषणतैव सामान्यलक्षणा सा चाभावादिग्राहकचक्षुःसंयुक्तविशेषणता वह्निविशेषणतावत् सा सत्यन्तर्गतैव न चैवं धूमत्वादिप्रकारकं चाक्षुषादि तत एवं सकलतदाश्रयचाक्षुषाद्यनुपगमादिति भावः। अत्र धूमत्वादिसामान्यनिरूपितधर्मितामात्रस्य प्रत्यासत्तित्वे धूमत्वादेर्ज्ञानदशायां विशेष्यतया तज्ज्ञानादिदशायां च तत्प्रकारेण तदाश्रयप्रत्यक्षापत्तिः समवायाद्येकसंबंधेन धूमत्वादिप्रकारकज्ञानदशायां कालिकादिसकलसंबंधेन तदाश्रयस्य साक्षात्कारापत्तिश्चातो भूतां तां सामान्यविशेषणतां एवं च यत्संबंधेन तस्य ज्ञाने प्रकारत्वं तत्संबंधावच्छिन्नातदीयधर्मितात्संबंधेन तदाश्रयस्य प्रत्यक्षे हेतुरिति नोक्तातिप्रसंगः। एतेनस्त्वलौकिकसंनिकर्षाश्रयवृत्तित्वमेवेन्द्रियसंबंधीति भिधीयतामित्यपि निरस्तं यद्योर्जगतिप्रसंगानां दुर्वारत्वापत्तेः। धूमादौ धूमत्वादिप्रकारकज्ञानानन्तरं सकलधूमादिगोचरमानसप्रत्यक्षानुदयापत्तेश्च। धूमत्वादेर्मनोलौकिकसंनिकर्षाश्रयवृत्तित्वात्। चक्षुरादिसंनिकृष्टे धूलीपटले धूमत्वभ्रमे सकलधूमसाक्षात्कारानुदयापत्तेश्च। धूमत्वस्येन्द्रियसंनिकर्षवृत्तित्वात्। धूमत्वादिप्रकारकस्मरणादितोपि चक्षुरादिबहिरिन्द्रियजन्यसकलतदाश्रयसाक्षात्कारवारणाय तादृशापरंपरया इन्द्रियसंबंधत्वसंपादनाय चक्षुरादिजन्येतिज्ञानविशेषणं। तच्च न कार्यकारणभावघटितं

निर्विकल्पकतज्ज्ञानदशायां

चि-टी चक्षुरादिबहिरिंद्रियस्थले चक्षुरादिजन्यत्वनियतचाक्षुषत्वादिजातेर्मानसस्थले तु जन्यज्ञानमात्रस्य मनोजन्यतया ज्ञानत्वमात्रस्य कारणतावच्छे
८८ दकघटकत्वात् । लाघवात् । तथाच बहिरिंद्रियस्थले तत्पुरुषीयचाक्षुषविशिष्टधूमत्वविशिष्टधर्मितात्वेन कारणता तत्पुरुषीयधूमत्वप्रकारक
धूमत्वाश्रयमुख्यविशेष्यकचाक्षुषत्वेन कार्यतेत्यादिक्रमेण मानसस्थले तु तत्पुरुषीयज्ञानविशिष्टधूमत्वविशिष्टधर्मितात्वेन कारणता तत्पुरुषीयधू
मत्वप्रकारकधूमत्वाश्रयमुख्यविशेष्यकमानसत्वेन कार्यतेत्यादिक्रमेण कार्यकारणभावः प्रथमे वैशिष्ट्यं प्रकारतासंबंधेन द्वितीये वैशिष्ट्यं च निरू
पितत्वसंबंधेन । विशिष्टपूर्वसत्वस्यापेक्षितत्वान्नकालांतरीयचाक्षुषादिकमादायातिप्रसंगः । कालिकसामानाधिकरण्यमात्रं च प्रत्यासत्तिः । न
तु विशेष्यत्वाश्रयत्वघटितदैशिकसामानाधिकरण्यमपि धूमत्वादिप्रकारकज्ञानानंतरं निरुक्तधर्मितारूपसामान्यलक्षणाप्रत्यासत्त्याऽतीतानागतधूमा
दौ कदाचिदनुभूतानंतरं नविधपाधूलीपटलादौ धूमत्वादिप्रकारकसंशयोत्पादानंतरं च तत्तदानींतनादृशधर्मिताविरहाद्व्यभिचारापत्तेः । न च यावत्त्वस्य कार्यतावच्छेदककोटिघटकतया क
तादृशधर्मितारूपसामान्यलक्षणाप्रत्यासत्त्या कुतोऽतीतानागतसकलधूमाश्रयप्रत्यक्षमिति वाच्यं यावत्त्वस्य कार्यतावच्छेदककोटिघटकत्वेऽपि विनिगमनावि
रहेण सकलधूमत्वाश्रयभानादिति निगर्वः । नच यत्र विनश्यदवस्थचक्षुःसंयोगेन यत्किंचिद्धूमे धूमत्वप्रकारकचाक्षुषोत्पत्तिकाल एव चक्षुषो निमीलनं त त्र
तदनंतरं निमीलितनयनस्यापि तादृशधर्मिताप्रत्यासत्त्या धूमत्वप्रकारकनिखिलधूमत्वाश्रयचाक्षुषापत्तिः । एवं यत्र धूमत्वप्रकारकप्रमाविषयं किं य
चिद्धूमव्यक्तिचाक्षुषोत्पत्तिकाले धूमत्वप्रकारकलौकिकचाक्षुषप्रतिबंधकदोषोपस्थितिस्तदनंतरं दोषसत्वेऽपि तादृशधर्मितासंनिकर्षेण धूमत्वप्रकारकनि राम
य खिलधूमत्वाश्रयचाक्षुषापत्तिः विनश्यदवस्थालोकसमवधानजन्यधूमत्वप्रकारक किंचिद्धूमचाक्षुषानंतरं तमस्यपि तादृशधर्मिताप्रत्यासत्त्या धूमत्वप्रका ८८

रकतिविलनधूमत्वाद्युपायतिस्र इति वाच्यं। बहिरिंद्रियजनितसामान्यलक्षणाजनितसाक्षात्कारस्य सामान्यांशे विशेषणीभूतयत्किंचिद्धर्मांशेऽलौ
२ किकत्वनियमाहतिरिंद्रियेणाताहशसाक्षात्कारजनने सामान्याश्रयेतरनाश्रयेवायत्किंचिद्धर्मि णि लौकिकविशेष्यतया सामान्यप्रकारकतरिंद्रि
यके रााकप्रत्यक्षो मंत्रिसामग्र्या अपि सहकारित्वस्य न असकलतांत्रिकसिद्धत्वात् अन्यथा वस्तुमाराकल्पेनापि क्वानिस्तारादिति निगर्वः ॥ नन्वे
वं ज्ञानप्रकारीभूते तन्निरूपितधर्मितायास्तत्प्रकारकत्वराश्रयप्रत्यक्षे एव हेतुतया घटत्वरूपेण एकव्यक्तिघटमात्रप्रकारकानंतरं घटत्वावच्छि
न्नघटत्वरूपप्रकारेण घटांतराश्रयप्रत्यक्षं न स्यात् घटांतराश्रयस्य ज्ञानप्रकारीभूततन्निरूपितधर्मितायास्तत्प्रकारकत्वराश्रयप्रत्यक्ष एव हेतुतया
घटत्वरूपेण एकव्यक्तिमात्रप्रकारकानंतरं घटत्वावच्छिन्नघटत्वप्रकारेण घटांतराश्रयप्रत्यक्षं न स्यात् घटांतराश्रयज्ञानप्रकारीभूतघटव्यक्तिरूपाश्रय री
त्वाभावात् न च सामान्यतः तत्तुरूपीयचाक्षुषविशिष्टघटविशिष्टधर्मितात्वेन तत्तुरूपीयघटप्रकारकघटाश्रयचाक्षुषविशिष्टधर्मितात्वेन तत्तुरूपी
यघटप्रकारकघटाश्रयचाक्षुषत्वेन कालिकसामानाधिकरण्यमात्रप्रत्यासत्त्या कार्यकारणभावात् ज्ञानप्रकारीभूतयत्किंचिद्घटव्यक्तिनिरूपितध
र्मितैव स्वानधिकरणीभूतघटांतराश्रयप्रत्यक्षेपि हेतुरिति वाच्यं। तथा सति तद्व्यक्तित्वरूपेणैकव्यक्तिघटमात्रप्रकारकज्ञानानंतरमपि घटप्रकारकघटां
तराश्रयप्रत्यक्षापत्तेरिति। मैवं। घटत्वावच्छिन्नघटप्रकार कतत्तुरूपीयघटाश्रयचाक्षुषं प्रति घटत्वावच्छिन्नप्रकारतासंबंधेन तत्तुरूपीयचाक्षुषविशि
ष्टे यत्किंचिद्घटे न विशिष्टपाद्यधर्मितायाः एव हेतुत्वात् तत्तद्व्यक्तित्वरूपेण तद्व्यक्तिप्रकारकज्ञानस्य तत्तद्व्यक्तित्वावच्छिन्नतद्व्यक्तिप्रकारकतद्व्यक्त्या
श्रयप्रत्य क्षं प्रत्येव हेतुत्वात् एवमेव सर्वत्र सखंडसामान्यलक्षणे बोध्यं सामान्यभेदेन कार्यकारणभावभेदात्। नन्वनेन धर्मि नात्र विशेषो व्यर्थः। माह

दृश्यविशिष्टधूमत्वत्वादिनैव हेतुत्वसंभवत्वात् किंचैवं यत्रातीतमनागतं वा सामान्यं तत्र तन्निरूपितधर्मिताया अपि स्वातीतानागतत्वपातत्सामान्यत्तानानं
तरं तत्सामान्यप्रकारकनिखिलतत्सामान्यप्रकारकनिखिलतत्सामान्याश्रयसाक्षात्कारो न स्यात् त्तानप्रकारीभूततत्सामान्यस्य तन्निरूपितधर्मितायाश्च
व्यवहितत्वसंभावात्। अथातीतानागतसामान्यप्रकारकत्तानानंतरं ताहृशसामान्यप्रकारकत्ताहृशसामान्याश्रयसाक्षात्कारोऽस्तु हि कार्यकारणभा
वस्याव्यभिचारायत्तत्वात् तथैव कल्पना न किंतु नत्रातीतानागतसामान्यप्रकारकत्ताने भासमानं साक्षात्परंपरया तत्सामान्यनिष्ठमवश्यं नित्यंधर्मितरमसि
परंपरासंबंधावच्छिन्नताहृशनित्यधर्मनिरूपितधर्मिताप्रत्यासत्त्या परंपरासंबंधेन ताहृशनित्यधर्मप्रकारकमेव तत्सामान्यप्रकारकतत्सामान्याश्र
यप्रत्यक्षं जायते न ताहृशनित्यधर्मस्य परंपरासंबंधेन त्तानेप्रकारतया कथं तन्निरूपितधर्मिताप्रत्यासत्त्या परंपरासंबंधेन ताहृशनित्यधर्मप्रकारकं
नत्सामान्याश्रयप्रत्यक्षमिति वाच्यं यत्किंचिद्विशेष्ये यतीतानागतसामान्यप्रकारकत्ताने ह्यायां अतीतो निर्धर्मितावच्छेदकस्यापि तस्मिन्नविशेष्ये पर
परासंबंधेन तत्सामान्यवृत्तिताहृशनित्यधर्मप्रकारकप्रत्यक्षस्य संभवात् यत्र शाब्दबोधादिरूपातीतानागतसामान्यप्रकारकत्तानं तत्रापि तदुत्तरं
परंपरासंबंधेन तद्वृत्तिताहृशधर्मप्रकारकमानसबोधकल्पनादिति चेन्न। अनुभवापलापात् अतीतानागतसामान्यप्रकारकत्तानानंतरं अती
तानागतसामान्यप्रकारकस्यापि निखिलतदाश्रयसाक्षात्कारस्य सकल नैयायिकानुभवसिद्धत्वात्। अन्यथातीतानागतसामान्यप्रकारक
त्तानंतरं निखिलतदाश्र परंपरासंबंधेनातीतानागतसामान्यप्रकारकवृत्तिधर्मत्तानं विनापि अतीतानागतसामान्यप्रकारकशाब्दादित्त
सकलतदाश्रयसाक्षात्कारस्य सकलनैयायिकैरनुभवसिद्धस्य साक्षात्कारस्य वापलप्यतां किमेतावत्कुसृष्ट्यापि। चक्षुरादिजन्यत्तानप्रकारीभूतसा

मान्यनिरूपितधर्मितायास्तादृशसामान्यस्य वा प्रत्यासत्तित्वेऽर्थं इन्द्रियभेदेन च कार्यकारणभावप्रसंगः कारणतावच्छेदकशरीरगौरवं चेत्यस्वरसादाह
अतिरिक्तैव वेति। संयोगादिलक्षणप्रत्यासत्तिघटकादतिरिक्तैवेत्यर्थः। तद्व्यतिरिक्तं धूमत्वादिरूपसामान्यप्रकारकज्ञानमात्रं। योगपरिगणनं
तु लौकिकसंनिकर्षाभिप्रायं। सामान्यलक्षणापदस्य च सामान्यं लक्षणं विषयतानिरूपकं यस्याः सा सामान्यलक्षणेति व्युत्पत्तिः। धूमत्वादिप्रकारकज्ञानाद्
स्मरणादितोपि मानससकलधूमादिसाक्षात्कारवच्चक्षुरादिबहिरिन्द्रियजन्यनिखिलधूमादिसाक्षात्कारोपीष्यत एवेनातो बहिरिन्द्रियादिस्थले चाक्षु
षादिभेदेन कार्यकारणभावभेदः। समवायसंबन्धेनात्मनिष्ठतया हेतुतया च न पुरुषभेदेन कार्यकारणभावभेद इति भावः। अत्र सामान्यमात्रस्य प्रत्या
सत्तित्वेऽतीतानागतसामान्यप्रकारकज्ञानानन्तरं तत्प्रकारकनिखिलतदाश्रयसाक्षात्कारानुपपत्तिः। कारणत्वेनाभिमतस्य सामान्यस्याव्यवहितपूर्वमभा
वात् अतो ज्ञानप्रवेशः। न चैतावतानित्यसामान्यस्थले घटत्वादिनित्यतानं प्रत्यासत्तिरस्तु घटत्वत्वादिना कारणत्वकल्पनामपेक्ष्य घटत्वादिना न त्वे
नैव तु लाघवात् परममहत्त्वादिनित्यगुणाद्यात्मकसामान्यस्थले घटात्यन्ताभावादिनित्याभावात्मकसामान्यस्थले च कथं ज्ञानान्तर्भावः सामान्य
भेदेन कार्यकारणभावभेदात् तत्तत्स्वरूपसत्परममहत्त्वादेरेव लाघवेन प्रत्यासत्तित्वौचित्यात्। न चैवं परममहत्त्वादिज्ञानदशायामपि तत्प्रत्यासत्त्या नि दे
खिलतदाश्रयसाक्षात्कारापत्तिरिति वाच्यं। परममहत्त्वादिप्रकारकपरममहत्त्वाश्रयप्रत्यक्षत्वस्य कार्यतावच्छेदकतया विशेषणतानरूपविशि
ष्टबुद्धिसामान्यकारणभावादेव तन्न कार्याभावादिति चेन्न। परममहत्त्वादिनिर्विकल्पकानन्तरं स्वाश्रयविशिष्टज्ञानोत्पत्तिसमये स्वपरमम

द्रत्वादिनिर्विकल्पतद्वाश्रयसाक्षात्कारयोः।परममहत्त्वादिविशेष्यकज्ञानादपि महत्तराश्रयसाक्षात्कारापत्तेश्चानवेक्षापत्तिरनुभवविरोधात्।एवं समवायादि
चिं॰टी॰ यत्किंचित्संबंधेन परममहत्त्वादिप्रकारकज्ञानेन तत्त्वाभासत्याजगतएवप्रत्यक्षापत्तिश्च जगतएव येनकेनचित्संबंधेन परममहत्त्वाद्याश्रयत्वात् विनाका
९० द्रके रणतावच्छेदकप्रकारताप्रवेशसंबंधभेदेमाद्यानस्यानुगतत्वात् न चेष्टापत्तिरनुभवविरोधात् परममहत्त्वादेर्नित्यतया तदभावेन कार्याभावस्यकाप्यसत्त्वा
त्तत्स्वरूपसत्त्वस्यकारणत्वेमानाभावाच्च न च तथापि लाघवादिद्रव्यत्वादिसाधारणसामान्यप्रकारकमेवप्रत्यासत्तिरस्तु तद्विज्ञानत्वान्तर्भावेनेतिवाच्यं।
घटत्वादिनिर्विकल्पकात्मकस्य घटत्वादिविशेष्यकज्ञानात्मकस्यवाविनाशेनज्ञानस्यसत्त्वेघटत्वादिप्रकारेद्वावदितोघटत्वादिप्रकारकानुद्बु
द्धसंस्कारात्तन्निखिलघटत्वाद्याश्रयसाक्षात्कारापत्तेः।नचसामान्यप्रकारकज्ञानस्यैव सामान्यलक्षणात्वेन ज्ञानलक्षणसामान्यलक्षणयोः
कार्यकारणभावेकोभेदइतिवाच्यं।कारणतावच्छेदकभेदेन कार्यतावच्छेदकभेदेनचभेदात्सामान्यलक्षणायाः कार्यकारणभावस्तु तत्तत्संबंधा
वच्छिन्नघटत्वादिप्रकारितानिरूपितज्ञानत्वेन स्वरूपतस्तत्तत्संबंधावच्छिन्नघटत्वादिप्रकारिताकतत्तत्संबंधावच्छिन्नघटत्वाद्याश्रयतानिरूपितमुख्यविशेष्य
कप्रत्यक्षत्वेन यावत्वस्यकार्यतावच्छेदकाघटककत्वेपिविनिगमनाविरहेण सकलघटमाने।समवायसंबंधेन घटत्वप्रकारकज्ञानानन्तरं कालिका
दिसंबंधेन घटत्वप्रकारकनिखिलघटविषयकप्रत्यक्षस्य समवायसंबंधेन घटत्वप्रकारेण घटत्ववतः कालादेः प्रत्यक्षस्य चवारणाय संबंधान्तर्भावः।
घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिसामान्यलक्षणया जायमाने द्रव्यत्वादिप्रकारकघटादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छे राम॰
दके घटत्वादिप्रकारिताकेतिः प्रकारित्वं चालौकिकं ग्राह्यं तेन घटत्वप्रकारकज्ञानं विनापि द्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वनिर्विकल्पकोत्तरं द्रव्यत्वसामान्य ९०

लक्षणयाजायमानेयावद्घटमुख्यविशेष्यकप्रत्यक्षेलौकिकसंनिकर्षमर्यादयाघटत्वप्रकारकेनव्यभिचारः।नचतथापिकालिकादिसंबंधेनस्वरूपतोघट
त्वादिप्रकारकवृक्षात्मकगवादिविशेष्यकसमवायसंसर्गकघटत्वादिप्रकारकस्मरणोत्तरंद्रव्यत्वसामान्यलक्षणयाजायमानेयावद्घटमुख्यविशेष्यक
प्रत्यक्षेउपनयमर्यादयासमवायसंबंधेनस्वरूपतोघटत्वप्रकारकेव्यभिचारइतिवाच्यं।यथोक्तकार्यकारणभावस्यैवबाधकत्वेनतत्रसमवायसंबंधेन
घटत्वस्यापिप्रकारत्वात् घटत्वप्रकारकज्ञानंविनापिजातित्वरूपेणगोत्वादिज्ञानंतत्प्रकारकज्ञानाज्जायमानेजातित्वरूपेणघटत्वादिनिखिलजातिप्रका
रकनिखिलजात्याश्रयप्रत्यक्षेव्यभिचारवारणायस्वरूपतइति।घटत्वादिप्रकारिताविशेषणं यथोक्तकार्यकारणभावस्यैवबाधकत्वेनतत्रकथंचिदपि
स्वरूपतोघटत्वादेःप्रकारत्वात्कालिकादिसंबंधेनस्वरूपतोघटत्वादिप्रकारकस्मरणादितोजायमानेविशेष्येविशेषणमितिरीत्यासमवायसंबंधेनघटत्वा
दिप्रकारकेघटवदितिस्मृत्युपनीतभानेव्यभिचारवारणायमुख्यविशेष्यत्वप्रवेशः।उपनीतभानेचघटेनमुख्यविशेष्यः वह्निरिन्द्रियासंबद्धत्वेनउप[illegible]नीतंविशेष
लि णंतथैवभासतइतिनियमात्मुख्यविशेष्यत्वमप्यलौकिकरूपंयथाश्रुतेनकालिकादिसंबंधेनस्वरूपतोघटत्वस्मरणात्लौकिकसंनिकर्षाभ्यांजायमाने
समवायसंबंधावच्छिन्नलौकिकालौकिकोभयघटत्वप्रकारिताशालि[illegible]यंघटइतिघटमुख्यकलौकिकप्रत्यक्षेनव्यभिचारः।अथयथापिकालिकादिसं क २
बंधेनघटत्वादिप्रकारकघटविशेष्यकस्मरणाज्जायमानेसमवायसंबंधेनघटत्वप्रकारकघटमुख्यविशेष्यकमानसोपनीतभानेव्यभिचारः।मान
सेउपनीतंविशेषणंतथैवभासतइतिनियमाभावात्तत्रकालिकादिसंबंधेनैवघटत्वप्रकारेणैवघटप्रत्यक्षंनतुसमवायसंबंधेनमुख्यत्वेऽपि घटवदितिस्म
रणोत्तरंजायमानेपरंपरासंबंधेनैवघटत्वप्रकारकमानसोपनीतभानेव्यभिचारोदुर्वारः।नचनत्रप्रामेनाहत्यास्मरणोत्तरमपिनिखिलघटाश्रयसाक्षात्का

रानुपपत्तिः द्रव्यप्रकारकज्ञानस्याप्रमात्वापत्तिरिति चेन्न लाघवात्पूर्वोक्तरूपेण सामान्यलक्षणायाः कार्यकारणभावकल्पने यथोक्तमानसे घटादि
र्मुख्यविशेष्यः किंतु चक्षुःसंयुक्तवत् घटत्वादिघटितवानवभासते इत्येवकल्पने यथोक्तकार्यकारणभावस्यैव बाधकत्वात् तन्न दं तैंपनीभानानामव्यवे शे
गौरवात् सर्वत्रैव मानसोपनीतभाने उपनीतमेव स्वरूपमुख्यविशेष्यतया भासत इति नियमे मानाभावात् असति बाधके एवमानसोपनीतभाने उपनी
तस्य प्रकारत्वमुख्यविशेष्यत्वलक्षणाद्विविधविषयत्वाभ्युपगमात् न च तथापि यो गजविशिष्टज्ञाने विशेषणज्ञानस्याहेतुत्वनये सामान्यज्ञाने वि
नापि ज्ञायमाने सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचारः। यो गजविशिष्टज्ञानं प्रत्यपि विशेषणज्ञानस्य हेतुत्वनये यथियो गज
धर्मेण सामान्यतश्चाश्रयोभयनिर्विकल्पकं जनयित्वा जनिते सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचार इति वाच्यं। यो गजधर्मज
न्यतावच्छेदकतज्ज्ञानावच्छिन्नान्यत्वेन प्रत्यक्षविशेषणात्। नाहं गायो गजज्ञानेऽपि सामान्याश्रयस्य मुख्यविशेष्यतयाभा ने मानाभावाद्वा। अपि तु चक्षु
ष्टह्रवत्त्वप्रकारीभूते सामान्ये प्रकारीभूयैवभासते लाघवात् तथैव कल्पनात्। अत एव कालिकादिसंबंधेन स्वरूपतो घटत्वप्रकारकस्मरणोत्तरं
विशेष्ये विशेषणमिति रीत्या कालिकादिसंबंधेनैव घटत्वप्रकारकघटवदिदमित्युपनीतभानं जायते न तु समवायसंबंधेन घटत्वप्रकारकमित्युक्तावेव
व्यभिचारवारणासंभवात्। किंच सादिसामान्यलक्षणायाः कार्यतावच्छेदके स्वरूपतः प्रकारतावच्छिन्नमुख्यविशेष्यत्वप्रवेशेन च तथाप्यत्र घटत्वमि न
ति समवायसंबंधेन घटत्वविशेष्यकस्मरणोत्तरं ज्ञायमाने विशेष्ये विशेषणमिति रीत्या घटत्वप्रकारकघटवदिदमित्युपनीतभाने व्यभिचारवा णम
रणाय तद्वत्त्वं निवेशनीयमिति वाच्यं। स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो विशेषणीभूतघटत्वविषयकज्ञानस्य हेतुतया तादृशस्मरणोत्तरं ९१

हृद्योपनीतभानासंभवात्। घटत्वघटकेतयेवत्वरूपतो घटत्वेभानाभ्युपगमेव्यभिचारस्यापि विरहादित्यस्मात्पूर्वपक्षापीति [illegible]ः। घटवदितिस्मरणो न
रंजायमाने परंपरासंबंधेन घटत्वप्रकारकमानसोपनीतभानेपयोन्क्रीसायोगजधर्मजन्ये घटत्वप्रकारकघटविशेष्यकप्रत्यक्षे व्यभिचारवारणायतत्वद्वेश्य
स्यावश्यकत्वात् एतेनाभावत्वाघटं ज्ञेयाधिरूपसामान्यलक्षणायाश्चपि कार्यकारणभावोव्याख्यातः। ज्ञानस्वंज्ञेयाधातिरिक्तपदार्थज्ञानं चपं [illegible] सति ता
रंवनेतिसामान्यपदार्थनिष्कृष्टवस्वप्रतियार्दृंनानन्वेवंरूपेणाकार्यकारणभावेजातित्वरूपेणौवजातिव्यक्तिमात्रप्रकारकज्ञानभानानंतरंजातित्वा
वच्छिन्नजातिमत्वप्रकारेणानिखिलजात्याश्रयप्रत्यक्षं कथस्यातजात्वेनाश्रयस्य तान्नप्रकारीभूतजातिव्यक्तेराश्रयत्वाभावात्तद्रूपतो घटत्वादि
प्रकारकत्वस्यकार्यतावच्छेदकत्वाद्वेति [illegible] जातित्वरूपेणाजातिप्रकारकलौकिकप्रत्यक्षदशायामनंतरंतेनानिरूढर्मिनावच्छेदकस्यापि परंपरासंबंधेनजा
के तित्वघटनिसत्वादिप्रकारीभूतसत्वाघत्वंज्ञेयाधिप्रकारकज्ञानस्यादवपकतया [illegible] तत्र सामान्यज्ञानाज्जातित्वाच्छिन्नजातिमत्वरूपेणानिखिल
जात्याश्रयस्यसाक्षात्कारातज्जातेनाश्रयस्यापि परंपरासंबंधेनतदाश्रयसत्वाघत्रजातिरूपेणायत्किंचिज्जातिमात्रप्रकारकज्ञानस्यदूपसाद्धीलत्वा
पिसाध्ये परंपरासंबंधेनध्वंसत्वादिप्रकारकमानसोपनीतभानानंतरमेवजातिमतः सर्वस्यप्रत्यक्षाभ्युपगमात्तक्षणाविलंबेक्षतिविरहात्। [illegible] परं
परासंबंधेनध्वंसत्वादिप्रकारकज्ञानस्यैवतत्रप्रत्यासत्तित्वेध्वंसत्वादिरेवतत्रफलंस्यात्नतुजातिमदिति सामान्यप्रकारकज्ञानस्यविशेष्य
सामर्थ्यप्रकारकज्ञानजनकत्वनियमादितियावत्। विशेषणज्ञानार्थ्यजातित्वघटकसामान्यलक्षणायामध्येसकलजातिमुख्यविशेष्यकज्ञानस्या
वश्यकत्वेनज्ञानलक्षणायैवजातिमदितिफलस्यापिसंभवात्। द्विविधविषयत्वस्यचेष्टत्वात् एवं तद्व्यक्तित्वरूपेणघटत्वादिप्रकारकज्ञानानंतरंज्ञा

श्रय अत्रशोधपत्रं द्रष्टव्यं २

चि-टी पमानेतद्व्यक्तित्वरूपेणाघटत्वादिप्रकारकतयाग्रहप्रत्यक्षेपरंपरासंबंधेन तत्प्रकारकत्वानमेयप्रमात्वनिरूपितोघटत्वादिसामान्यलक्षणायाः कार्य-
९२ दिशि तत्संग्रहेऽपि नव्यनयायेति भट्टाचार्यानुयायिनः। संभवत्याद्यविरलत्वस्वरूपोघटत्वादिप्रकारकं प्रत्यक्षत्वं घटत्वादिज्ञानं विनापि जायमानसामान्यलक्षणा-
जन्यप्रत्यक्षत्वं घटत्वादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय विषयित्वमपहाय प्रकारितापर्यवेशः प्रकारिता चालौकिकी ग्राह्या तेन निर्विकल्पकजन्यप्रा-
थमिकतद्विशिष्टलौकिकप्रत्यक्षे न व्यभिचारः। न चैवं प्रत्यक्षज्ञानलक्षणासंनिकर्षजलौकिकसंनिकर्षजन्यमेव वर्जितेनत्वं कीदृक्तत्तानं स्यादिति वाच्यं।
तत्र लौकिकालौकिकोभयतत्प्रकारिताकस्यैव प्रत्यक्षस्यैवोपनतेः विषयितायाः सांकार्यसमाहोपत्वात्। न च तत्प्रकारकादिज्ञानं विनापि जायमाने योग-
जधर्मजन्यतत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यं। योगजधर्मजन्यतावच्छेदकतत्तद्व्यक्तित्वावच्छिन्नान्यत्वेन विशेषणात्। तानचैवं तत्प्रकारकप्र-
ज त्यक्ष एव तज्ज्ञानस्य हेतुत्वपात इदं रजतमिति शुक्तिमुख्यविशेष्यकमानसभ्रमे शुक्तिताज्ञानस्य हेतुतया शुक्तिताज्ञानं विनापि तादृशभ्रमापत्तिरिति
त वाच्यं। इदं रजतमिति शुक्तिमुख्यविशेष्यकमानसभ्रमस्यापि शुक्तितानात्मकशुक्तिविशिष्टधीकारणत्वे नयत्र कुत्रचिदपि शिरोऽग्र शुक्तिप्रकार-
कत्वनियमात् शुक्तिज्ञानविरहस्थले शुक्तिप्रकारकत्वानसामान्यकारणाविरहादेव तदभावात्। विशेषसामग्रीसहितायाएव सामान्यसामग्र्या
फलोपधायकत्वात्। न चैवं रजतमिति शुक्तिमुख्यविशेष्यकतादृशमानसभ्रमस्थले तादृशदोषेमानाभावात् लाघवाद्यथोक्तरूपेणतानलक्ष-
णायाः कार्यकारणभावकल्पने केवलेन न चैव कल्पनात् न चैवं मानसोपनीतभाने उपनीतस्य मुख्यविशेष्यकतया भाने मानाभावः। मुख्यवि-
शेष्यत्वस्य कार्यतावच्छेदकतया सामग्र्यास्तत्र मानसत्वात् न वा दिवाच्यं। मुख्यविशेष्यत्वस्य कारणानियम्यत्वपाबाध कत्वस्य मुख्यविशेष्यतया भानाव- एम० ९२
३ मानसभ्रमस्य न शुक्तिप्रकारकत्वनियमः शुक्तिप्रकारकज्ञानप्रतिबंधकदोषसत्त्वे तत्र तस्याप्रकारत्वादिति वाच्यं शुक्तिमुख्यविशेष्यक

ष्यकत्वात्। नचैवं मानसोपनीतभानवद्बहिरिंद्रियोपनीतभानेप्युपनीतस्य प्रकारत्वं मुख्यविशेष्यत्वलक्षणाद्विविषयत्वापत्तिरिति वाच्यं। सामान्यलक्षणा

लौकिकसंनिकर्षाजन्यातिरिक्तस्य बहिरिंद्रियजन्यस्य मुख्यविशेष्यकप्रत्यक्षस्यानुभवसिद्धत्वेनालीकतया यौक्तिकविशेषसामग्रीबाधादेव तदभावात् मानसस्य तु व

तदतिरिक्तस्यापि इदं रजतमित्याद्युपनीतभानविशेष्यकभ्रमसोपनीतरूप्यत्वादिमुख्यविशेष्यकत्वमनुभवसिद्धमत्तो नालि[illegible]कत्वं न च तथापि घट

दे घटत्वादिनिर्विकल्पकोत्तरं जायमाने अयं घट इत्याकारविशिष्टप्रत्यक्षे घटत्वादेर्मुख्यविशेष्यत्वापत्तिः लौकिकसंनिकर्षरूपविशेषसामग्र्य[illegible]सत्त्वादिति वाच्यं श्री

तत्राप्यसति बाधके घटांशे घटत्वादेर्मुख्यविशेष्यत्वे पीष्टत्वादिति। वाच्यं तु। संसर्गावच्छिन्नतद्विषयिताशालितानत्वेन कारणतापेक्षधर्मसामा

न्यधर्मासमानजन्यतद्विषयकप्रत्यक्षत्वेन कार्यता तद्विषयितानाम लौकिकीया स्वात्तेन लौकिकप्रत्यक्षे न व्यभिचारः। तथा च तद्विषयकप्रत्यक्षमात्रस

कार्यता व[illegible]न पाउदं रजमिति प्र[illegible]क्तिमुख्यविशेष्यकमानसभ्रमोपि नप्रयुक्तितानं विना बहिरिंद्रियजोपनीतभानं मुनीतस्य मुख्यविशेष्य

त्व[illegible]रसप्रलौकिकभ्रमेरीत्सा[illegible]रिति संक्षेपः। विस्तरस्तु अस्मत्कृतसिद्धांतरहस्येनुसंधेयः। ननु महानसादौ वह्निधूमव्याप्तिप्रत्यक्षदशायां महानसीय

धूमादेर्निष्ठलौकिकसंनिकर्षाद्विषयवर्तीपधूमांशेपि लौकिकसाक्षात्कारात्मको व्याप्तिग्रहः स्यात् किं सामान्यलक्षणायाः प्रत्यासत्तित्वेनेत्यत आ

ह [illegible]ताद्विशेष्यकप्रत्यक्षं इति तल्लौकिकप्रत्यक्षे इत्यर्थः। तदिंद्रियसंनिकर्षेणेति। तन्निष्ठलौकिकसंनिकर्षस्येत्यर्थः। अनागतादि[illegible]। अनागतादि

[illegible]वर्तीपधूमेत्यर्थः। व्याप्तिपदाद्य वह्नितादातीतपरिग्रहः। संयोगादेः महानसीपधूमादिनिष्ठचक्षुःसंयोगादेः। व्याप्तिपदात्तत्प्रकसमवायादेः परिग्रहः

[illegible]भावात् लौकिकप्रत्यक्षजनकत्वासंभवात् तथा च लौकिकसंनिकर्षस्य विषयघटितसामानाधिकरण्यप्रत्यास[illegible] त्याहेत्वत्पाऽन्यनिष्ठलौकिकसंनिक

चि॰दी॰ ऽर्वतो न पर्वतो यद्धूमत्वलौकिकप्रत्यक्षसंभव इति भावः । इति वदंतीति । इति नैय्यायिका वदंतीत्यर्थः । तन्मते नैयायिकवचनं · अपरे मीमांसकाः । तन्मतं ते प्रमाण
९३ त्वेन न मन्यंते तथा हीति तन्मते हीत्यर्थः । धूमत्वावच्छिन्नसामानाधिकरण्यसंबंधेन धूमत्वविशिष्टा धूमनिष्ठेति यावत् । व्याप्तिः वह्निव्याप्तिः धूमादिनिष्ठवह्निव्या
प्तिः संनिकृष्टधूमे प्रत्यक्षाभ्युपगमे ऽन्यथाख्यात्यापत्तिरिति तत्त्वावच्छेदाय धूमनिष्ठा धूमनिष्ठेति यावत् । व्याप्तिः वह्निव्याप्तिः धूमादिनिष्ठवह्निव्याप्तिः सं
निकृष्टधूमे प्रत्यक्षाभ्युपगमे ऽन्यथाख्यात्यापत्तिरिति तत्त्वावच्छेदाय धूमनिष्ठेत्युक्तं संनिकृष्टधूमविषया इति संनिकृष्टस्य एव विशेष्ये त्यर्थः । धूमत्वेन
धूमत्वप्रकारेणानंतरं स्मृतासेति धूमत्वरूपेण संनिकृष्टधूम एव स्मृतासेत्यर्थः । तृतीयलिंगपरामर्शेति । पक्षविशेष्यकव्याप्तिविशिष्ट
वैशिष्ट्यावगाहिप्रत्यक्षेत्यर्थः तस्य संनिकृष्टधूमविशेष्यकव्याप्तिप्रत्य[illegible]क्षापेक्षयात्वतीयत्वात् पक्षनिष्ठधूमस्य निश्चयान्यायत इति लौकिकसं
निकर्षमर्यादया प्रत्यक्षविशेषणत्वेन भासमानस्य पक्षनिष्ठधूमस्य विशेषणतया भासनम् इत्यर्थः । विशेषणतावच्छेदकांशे सधर्मितावच्छेदकवि
शिष्टवैशिष्ट्यबोधं प्रतितद्धर्मितावच्छेदकप्रकारेणायत्किंचिद्धर्मिणो विशेषणतावच्छेदकप्रकारकनिश्चयस्य एव हेतुः ननु तद्धर्मितावच्छेदकप्रकारेणावि शे
षणीभूतव्यक्तौ विशेषणतावच्छेदकप्रकारकनिश्चयस्य एव सर्वत्र हेतुः गौरवादिति भावः पक्षधर्मतापि व्याप्तेः सामानाधिकरण्यरूपतया तस्य च प्रतिव्यक्ति
भिन्नतया संनिकृष्टधूमे साक्षात्कृतव्याप्तेः कथं पक्षवृत्तिधूमे भानं न स्यात्तत्र बाधितत्वात् । अन्यथा ख्यातिप्रसंगात्त्वं तद्व्याप्तिव्याप्तेः सामानाधिकरण्यरू
पत्वेपि मिह्वांतल्लक्षणोक्तयुक्त्या व्याप्यतावच्छेदकीभूतधूमत्वादिसंबंधेनैव तत्प्रकारकं ज्ञानमनुमितिहेतुः ननु साक्षात्संबंधेन तथा च महानसीयधूमव[illegible] रामम॰
[redacted] ९३

[redacted] त्तिसामानाधिकरण्यस्यापि धूमत्व
संबंधेन पक्षनिष्ठधूमे सत्वान्नबाधइत्यभिप्रायः लाघवात्साध्यवदन्यावृत्तित्वमेव व्याप्तिः सा च सर्वधूमसाधारणी एकैवेत्यभिप्रायो वा नानुमीमांसकेत्य
व नीतभानानभ्युपगमादुक्तरूपेणातन्नेप्रत्यक्षतो विशिष्टपरामर्शासंभवउत्पतत्र्याह तद्नभ्युपगमेपीति उक्तरूपेण प्रत्यक्षतो विशिष्टपरामर्शानभ्युप
गमेपीत्यर्थः तथैव धूमत्वरूपेणासंनिकृष्टधूमएव पक्षवृत्तिधूमज्ञानात्पक्षविशेष्यकधूमत्ताज्ञानान्नव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानस्यैवा
नुमितिहेतुत्वात्कथंनादृशज्ञानद्वयाद्नुमितिरित्यतआह व्याप्त्यनुभवेति व्याप्त्यनुभवनतत्स्मरणानुभवसाधारणव्याप्तिज्ञानसामान्येत्यर्थः। यथा
श्रुते स्मृतिजनकीभूतस्य व्याप्त्यनुभवस्य हेतुत्वपाठ्यकृतहृती नेनानौचित्यात् इति ध्येयं। एकप्रकारकत्वेनेति यद्धर्मावच्छिन्नविशे
ष्यकव्याप्तिज्ञानं तद्धर्मप्रकारेणाहेतोः पक्षधर्मताज्ञानस्यैवानुमितिहेतुत्वादित्यर्थः ननु नियमतो विशिष्टवैशिष्ट्यावगाहिज्ञानमेव कार
णमिति भावः ननु सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमे गोत्वरूपेणासंनिकृष्टगोव्यक्तिं पक्षयित्वा व्यवहारविषयत्वेन हेतुना शक्तिसंबंधे
न गोपदस्य ज्ञानासाधनेव्यक्त्यंतरेण संनिकर्षाभावेन परामर्शाभावादनुमित्यनुत्पादाद्गोपदश्रवणानंतरं व्यक्त्यंतरे अन्वयबोधो न स्यात् न च शक्तिसंबंधेन गो
पदवत्ताज्ञानाभावात् न च परामर्शानुमित्योः समानप्रकारकत्वेनैव कार्यकारणाभावाद्गोत्वरूपेणासंनिकृष्टगोव्यक्तिविशेष्यकपरामर्शाद्
व्यक्त्यंतरेष्वप्यनुमितिरिति वाच्यं तथा सति द्रव्यत्वरूपेण पर्वते वह्निव्याप्यवत्ताज्ञानेपि निर्धूमानुमित्यापत्ते .. अन्यथाख्यात्यापत्तेः किंच

चि॰टी॰ सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमे पक्षे पुरुषस्यानुमानादिना गोत्वरूपेण सकलगवानुभवतत्प्रयुक्तसंस्कारस्य गोपदश्रवणानंतरं संस्कृतीनां गवा
९५ देरन्वयबोधो न स्यात् तद्गोचरसंस्काराभावेन गोपदात्तस्य स्मरणासंभवात् सामान्यलक्षणाभ्युपगमे तु संनिकृष्टगोव्यक्तिघटितोपस्थितिविशिष्टप्रत्यक्षस्या
प्यामेव गोत्वसामान्यलक्षणाप्रत्यासत्त्या सकलगवानुभवेन सकलगोचरसंस्कारसंभवस्ततः आह गवादिपदे स्वपीति गवादिपदोच्चारणोत्तरमपीत्यर्थः ज्ञा
यमानानामिति शेषः ज्ञानानुभवेति शक्तिज्ञाने इत्यर्थः ननु मरणेनित ... स्मारणमिति तु न त्वात्तज्जन्यपदार्थस्मरणोत्पत्त्यर्थः यथाक्रमेणानुभ
वशक्तिस्मरणयोः पृथक्कार्यहेतुतापाटवपृथक्कृतत्वं तुल्यजन्यसामग्रीत्वापत्तेः स्मरणानुभवयोरपि समानप्रकारकत्वेनैव हेतुहेतुमद्भावं समर्थनेऽप्यत इति
याहितेन प्रामाण्यापत्तेः एकप्रकारकत्वेनेति गवादिपदस्य जातावेकशक्त्या गोपदविशेष्यकशक्तिसंसर्गकगोत्वप्रकारकगोविशेष्यकसमवा
यसंसर्गक स्मरणे हेतुः समवायसंसर्गकगोत्वप्रकारकस्मरणं समवायसंसर्गकगोत्वप्रकारकशाब्दबोधे हेतुरिति क्रमेण हेतुहेतुमद्भावः ननु गोत्व
प्रकारकतद्व्यक्तिविशेष्यकगोपदशक्तिज्ञानं गोत्वप्रकारकतद्व्यक्तिविशेष्यकस्मरणे हेतुर्गोत्वप्रकारकतद्व्यक्तिविशेष्यकस्मरणं गोत्वप्रकारक
तद्व्यक्तिविशेष्यकशाब्दबोधे हेतुरिति समानविशेष्यकत्वसमानप्रकारकत्वोभयान्तर्भावेन कार्यकारणभावे इत्यर्थः तथा चाव्युत्पन्नं नरं गोपदश्र
वणानुमितसभावेऽपि गोपदविशेष्यकगोत्वशक्तिज्ञानादेव संनिकृष्टव्यक्तिवन्नव्युत्पन्नं नरस्यापि शाब्दबोधः एवं द्वीपान्तरस्थगवादेः संस्काराभावेन स्मरणा
संभवेऽपि गोत्वप्रकारेण संनिकृष्टव्यक्तीनां स्मरणाद्द्वीपान्तरीयगवादीनामपि शाब्दबोध इति भावः अत्र पूर्वं विकल्पनं इति इत्यत्र विनिगमकमप्यु राम॰
र्वापरे विकल्पनं इत्यर्थः लाघवात् समानप्रकारकत्वस्यावश्यकत्वाच्चेति भावः इदमुपलक्षणं गवादिपदस्य गोत्वादिजातावेव शक्तिः न तु व्यक्तौ शक्तिरिति ९५

ण शक्तिज्ञानस्य समानविशेष्यकत्वेन हेतुत्वासंभवात् केचित्तु एकप्रकारकत्वेन हेतुहेतुमद्भाव इत्यस्य गोत्वावच्छिन्नविशेष्यकशक्तिज्ञानं गोत्वप्रका
रकगोविशेष्यकसमवायसंसर्गकस्मरणे हेतुः समवायसंसर्गकगोत्वप्रकारकस्मरणं समवायसंसर्गकगोत्वप्रकारकगोविशेष्यकशाब्दबोधे हेतु
हेतु रिति क्रमेण हेतुहेतुमद्भावेन तु यथोक्तक्रमेण समानविशेष्यकत्वस्याप्यन्तर्भाव इत्यर्थ इत्याहुः तन्न एवमप्युक्तोपपत्त्यभ्युपगमे जातिशक्तिवादवि
रोधः तदनभ्युपगमे चानुपस्थितस्यापि गोत्वावच्छिन्नविशेष्यकशक्तिज्ञानस्यैवासंभवात् कथं तादृशशक्तिज्ञानस्य हेतुत्वाभ्युपगमः अनुभवस्यैवासंगततया
पत्तेः । न च पुरस्तथैव जातावुक्तौ च शक्तिः परं तु गोत्वजातिप्रकारेणापत्तिं च विशिष्टव्यक्तिनिष्ठशक्तिज्ञानादेव्यन्तरस्यापि स्मरणमनुभवसिद्धमेव जातिवा
क्तिवादार्थ इति वाच्यं लाघवाद्गवादिपदस्य गोत्वादिजातावेवानिरवच्छिन्नशक्तिः शक्तिसंबंधेन स्वरूपतो गोत्वादिविशेष्यकज्ञानमेव गोत्वादिजाति
प्रकारकव्यक्तिस्मरणे तादृशस्मरणानुभवे च हेतुरित्यस्यैव जातिशक्तिवादार्थत्वे शब्दपरिच्छेदे अभिधानादिति ननु पदात् तदुपस्थितपदार्थस्य शाब्दबोधविषय
त्वमिति नियमात् स्मृतत्वान्यक्तेः कथं शाब्दबोधभानमित्यत आह तत्रेति गवादिपदजन्यशाब्दबोध इत्यर्थः योग्यतादिवैशिष्ट्यादिति आदिपदात् तात्पर्यपरि २हा
ग्रहः अन्यत्र व्यक्तेरिति पदजन्यानुपस्थितायामपि व्यक्तेर्भानमित्यर्थः अनुमानेऽपीति उक्तार्थपूर्ण्याव्यापकतावच्छेदकत्वेनागृहीतधर्मस्यानानु
मितिविधेयतावच्छेदकत्वं तथा हि पूर्वोक्तनियमं परिभूय पदानुपस्थितस्यापि शाब्दबोधविषयत्वमित्यर्थः ननु महानसादौ वह्निधूमव्याप्तिग्रहदशा
यां सर्वधूमो वह्निव्याप्य इत्यनुभवो जायते अतः सर्वधूमभानार्थं अवश्यं धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वं स्वीकरणीयमित्यत आह धूम इति सर्वभा म

सि॰टी॰ ९५

नार्थं एवं धूमवानार्थं तत्स्वीकारः धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वस्वीकारः धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वे मानमाशंकते वह्निमानितीति विशेषण
ज्ञानसाध्या पर्वतीयवह्निज्ञानसाध्यापत्त्याऽन्यथा पक्षसाध्यतावच्छेदकज्ञानजन्यतया सिद्धसाधनापत्तेः साध्यत्वं चाव्यवहितोत्तरत्वनित्वं तेन ज्ञानत्वादिना कार्यता
वच्छिन्नं प्रतिस्वरूपयोग्यत्वमादाय नार्थान्तरं पर्वतीयवह्निज्ञानत्वावच्छिन्नकारणतायाः साध्यत्वे अप्रसिद्ध्यापत्तेः पर्वतीयवह्निलिंगकानुमितिं प्रत्यपि पर्वतीयवह्निवि
षयव्याप्तिज्ञानत्वेन ज्ञानत्वेनैव वा हेतुत्वादिति ध्येयं विशिष्टज्ञानत्वात् पर्वतीयवह्निविशिष्टज्ञानत्वात् पर्वतीयवह्निमानयमित्यनुमितिर्दृष्टांतः तत्कल्पनमिति वह्नित्व
ज्ञानस्य सामान्यतः सामान्यलक्षणात्वेन प्रत्यासत्तित्वकल्पनेत्यर्थः। तथा धूमत्वज्ञानस्याप्रत्यासत्तित्वे अनुगततया अपि सामान्यलक्षणात्वेन प्रत्यासत्तिता
वच्छेदकं सामान्याश्रयत्वस्य केवलान्वयितया एकस्य सामान्यज्ञाने जगत एव प्रत्यक्षापत्तेः तथा च वह्नित्वसामान्यलक्षणायाः प्रत्यासत्तित्वसिद्धावपि धूमत्वसा
मान्यलक्षणायाः प्रत्यासत्तित्वे मानाभाव इत्यत आह क्वचिदिति व्यापकत्वात् साध्यत्वात् तथा च पर्वतो धूमवानित्यसंनिकृष्टधूमसाध्यकानुमितेर्विशेषण
ज्ञानजन्यत्वानुरोधेन धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वमावश्यकमिति भावः विशिष्टवैशिष्ट्येति वह्नित्वधूमत्वविशिष्टवैशिष्ट्यज्ञानेव वह्नित्वधूमत्वप्र
कारकज्ञानस्यैवेत्यर्थः विशेषणज्ञानमपि पर्वतीयवह्निपर्वतीयधूमज्ञानमपि तथा पर्वतीयवह्निपर्वतीयधूमविशिष्टबुद्धौ हेतुः गौरवादिति तथा चोक्तानुमा
नमप्रयोजकमिति भावः ननु गौरवात् पर्वतो वह्निमानित्यनुमितेः पर्वतीयवह्निज्ञानजन्यत्वानभ्युपगमे गौरवमिति विशिष्टप्रत्यक्षेऽपि गोत्वज्ञानस्याहेतुत्वाप
त्तिस्तथा च नायातं निर्विकल्पके तत्प्रत्यक्षापत्तिमाह गौरवमितीति मानाभावात् मुख्ये निर्विकल्पके मानाभावात् लाघविलंबस्याप्यनिर्णयित्वादिति भा
वः इन्द्रियांके गौरवमस्कंतैवतटस्थः शंकते विशिष्टज्ञानत्वमेवेति गोत्वविशिष्टज्ञानत्वमेवेत्यर्थः मानं निर्विकल्पके मानं गौरवबुद्धिमिति प्राथमिकविशिष्टधीर्गोत्व

ज्ञानत्वावच्छिन्नकारणताप्रतियोगिनी गोत्वविशिष्टज्ञानत्वादित्यनुमानात्प्राथमिकविशिष्टज्ञानात्पूर्वं गोत्वज्ञानं सिद्ध्यत् पक्षधर्मताबलान्निर्विकल्प
करूपमेव सिद्ध्यति तत्पूर्वमपि विशेषणज्ञानाभावेन विशिष्टबुद्ध्यात्मकस्य तस्यासंभवादिति भावः दृष्टांताभावादिति द्वितीयविशिष्टज्ञानेपि तज्ज्ञानस्य हेतु
त्वासिद्धेः गोत्वलिंगकगोत्वसाध्यकानुमितावपि गोत्वविषयकव्याप्तिज्ञानत्वेन ज्ञानत्वेनैव वा कारणता न पुनस्तत्रापि गोत्वज्ञानत्वेन हेतुत्वासिद्धेश्च तथा च सा
ध्याप्रसिद्धिरिति भावः ननु यद्विशिष्टज्ञानं तत्तज्ज्ञा नत्वावच्छिन्नकारणताप्रतियोगीति सामान्यतो व्याप्त्या दंडी पुरुष इति ज्ञानं दृष्टांतस्यात्तत्राह दंडी पु
रुष इति विशेषणाधीति दंडत्वादिज्ञानत्वेन कारणत्वानभ्युपगमादित्यर्थः विशिष्टवैशिष्ट्येति दंडत्वविशिष्टवैशिष्ट्यज्ञानत्वादित्यर्थः नच गोत्वज्ञानाव्यव
हितोत्तरवर्त्तित्वमेव साध्यं तथा च गोत्वसाध्यकानुमितिरेव दृष्टांत इति वाच्यं तथाप्यप्रयोजकत्वात् गोत्वविशिष्टबुद्धौ गोत्वज्ञानत्वेन हेतुत्वस्य गौरवेणामाना
भावेन व्याप्तिग्रहत्वादिति भावः सामान्यलक्षणायाः प्रत्यासत्तित्वे साधकाभावमुक्त्वा बाधकमप्याह क्वापि चेति प्रमेयत्वेनेति संयोगादिसंबंधेन प्रमेयहेतु
केपर्वतकपि संयोगाभाववान् प्रमेयत्वादित्यादौ मज्ञानसादृश्युतंनिकृष्टप्रमेये प्रमेयत्वरूपेण व्याप्तिप्रत्यक्षदशायां प्रमेयत्वसामान्यलक्षणाप्रत्यासत्त्या
पक्षवृत्तिप्रमेयेपि व्याप्तिं गृह्णन् पुरुष इत्यर्थः सर्वज्ञः स्यादिति सद्वृत्तिसकलधर्मप्रकारेण सर्वेषां पदार्थानां ज्ञानवान्स्यादित्यर्थः मेयत्वसामान्यलक्ष
णाप्रत्यासत्त्या पक्षवृत्तिप्रमेयत्वसामान्यलक्षणाप्रत्यासत्त्या पक्षवृत्तिप्रमेयेपि व्याप्तिविशेष्यकत्ववत् सद्वृत्तिसकलधर्मप्रकारकोपनीतभाने बाधकाभावादिति
भावः नन्वन्वक्तसर्वज्ञत्वं किं नः छिन्नमित्यत आह तथा चेति परकीयज्ञानविषये विशिष्य स्वज्ञानविषयेत्वस्य स्वरूपतो घटत्वप्रकारकत्वं उक्तधर्मितावच्छेद
कज्ञानविषय इत्यावत् तत्पुरुषस्य तद्व्यक्तेरपि घटत्वतदभावयोरन्यतरनिश्चयादित्यर्थः एतद्वृत्तसमानविषयकनिर्णयमात्रस्यैव विरोधित्वमिति भावमा

चि॰टी॰ नेनन्नांकतेप्रमेयत्वेनेनितरहज्ञानेनेतिघटत्वाद्यानेनेत्यर्थः॥ सामान्यलक्षणापूर्वपक्षरहस्यं प्रतीति सामान्यलक्षणासामान्यलक्षणायाः प्रत्यासत्तिता अनुकूलतर्कीरि
९६ कंविनेतिव्यभिचारज्ञानघटितप्रतिबंधकतर्काद्यभावदशायामित्यर्थः व्यभिचारसंशयं धूमो वह्निव्यभिचारी न वेत्याकारिव्यभिचारसंशयः प्रसिद्धधूमे सकललौकिकसं
निकृष्टधूमे वह्निसंबंधज्ञानात् वह्निव्याप्यत्वनिश्चयात् मानाभावेन संनिकर्षाभावेन अज्ञातानामिति संशयेपि विशेष्यतयाभानादित्यर्थः परनयेन नव्यनैयायिकानये
स्वधर्मिज्ञानस्य संशयाहेतुत्वेपि संशयस्य धर्मिज्ञानरूपतया धर्मीन्द्रियसंनिकर्षस्यावश्यंहेतुत्वादितिभावः सामान्येनानुधूमत्वसामान्यलक्षणसंनिकर्षेणा
तुः सकलधूमोपस्थितौ सकलधूमप्रत्यक्षस्वीकारे धूमांतरे कालांतरीयदेशांतरीयधूमे विशेषणदर्शनेन व्याप्यत्वानिश्चयेन संशयानन्तरं प्रसिद्धधूमे धूम
त्वेन व्याप्तिनिश्चयः तत्तद्धूमत्वेनवा आद्ये सामान्यलक्षणास्वीकारेपि संशयोऽसिद्ध एव सामान्यधर्मितावच्छेदकभिन्नधर्मिकनिश्चयस्यापि प्रतिबंधकत्वात् द्विती
ये धूमत्वप्रकारेण तन्नैव संशयः स्यात् समानप्रकारकनिश्चयस्यैव संशयविरोधित्वात्। नन्वमास्तु संशयस्यानुपपत्त्या सामान्यलक्षणायाः प्रत्यासत्तित्व
स्वीकारस्तथापि यत्किंचिद्धूमादौ धूमत्वादिप्रकारकज्ञानानंतरं धूमत्वप्रकारेण सकलधूमविषयकप्रत्यक्षमनुभवसिद्धमिति तदनुरोधादवश्यं सामान्यलक्षणास्वी
करणीयेति वाच्यं तादृशानुभवस्यैवासिद्धेः तादृशानुभवस्य प्रामाणिकत्वे विवादस्यैवपर्यवसानमिति संक्षेपः चिंतामणिमतसिद्धांतरहस्येनु एवं बोध्यः ली
लावतीकारमतमाश्रित्य कनेयत्त्विति सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमेतिशेषः पाकादौ चिकीर्षेति पाकादिविशेष्यकवर्तमानकृतिसाध्यत्वप्र
कारकेच्छेत्यर्थः सुखत्वादावपि इच्छेति सुखत्वादिविशेष्यकसुखत्वादिप्रकारकेच्छेत्यर्थः उक्तविरहानुपपत्तेः इच्छोत्पादकाभावात् असिद्धस्यातानामिति तद्विषयके राम॰
च्छायां तद्विषयकज्ञानस्य हेतुतया तज्ज्ञानं विना इच्छाया असंभवादिति भावः सुखत्वादिना सुखत्वादिज्ञानरूपसामान्यलक्षणाप्रत्यासत्त्या इच्छाप्रवृत्तिसाभा

वारिति इच्छाप्रवृत्तित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेनैव कारणत्वादित्यर्थः अतिप्रसंगः घटत्वप्रकारकघटज्ञानात् पटत्वप्रकारकेच्छाप्रवृत्तिप्रसंग इ
त्यर्थः समानप्रकारकत्वेन समानप्रकारकत्वसंबंधेन ननु समानप्रकारकत्वं संबंधः समानविशेष्यकत्वं चेत्तत्र विनिगमकाभावेन द्वयोरेव संबंधत्वाद
सिद्धस्यापाकज्ञानेन कथमसिद्धेच्छेत्यत आह ननु समानविषयकत्वेनापीति ननु समानविशेष्यत्वसंबंधेनापीत्यर्थः ननु स्वजाकल्पनेपि ह्रस्वत्वादिप्रकार
कह्रस्वत्वादिज्ञानात् ह्रस्वत्वादिप्रकारकह्रस्वादीच्छोत्पत्तिस्थले एव विनिगमकाभावात्तस्य संबंधत्वं कल्पनीयमित्यत आह समानविषयत्वेपीति इच्छाद्वयोर
भावादिति गुरुत्वादिप्रकारकह्रस्वादिज्ञानात् ह्रस्वत्वादिप्रकारकह्रस्वादिगोचरेच्छाद्वयोरभावादित्यर्थः न च घटत्वप्रकारकयत्किंचित् घटज्ञानात् घटत्व
प्रकारेण घटांतरेच्छोत्पादवारणाय समानविशेष्यकत्वमप्यावश्यकमिति वाच्यं प्रकृते तदनुपयोगित्वात् न च तथापि पाकत्व प्रकारकसिद्धपाकज्ञा
नात् कथमसिद्धपाके चिकीर्षा वर्तमानत्वकृतिसाध्यत्वस्यासिद्धपाके बाधितत्वेनान्यथाख्यात्यापत्त्या तत्प्रकारकज्ञानासंभवादसिद्धपाके सन्निकर्षाभा
वेन तत्प्रकारकज्ञानासंभवादिति वाच्यं पाकादौ वर्तमानत्वकृतिसाध्यताप्रकारकज्ञानं हि नेंद्रियेण तस्यातींद्रियत्वात् किंतु अनुमानेन तथा च पाकत्वप्र
कारकासिद्धपाकज्ञानादिव पाकत्वप्रकारेणासिद्धपाके यथा कथंचित्त्वसिद्धस्य वर्तमानत्वकृतिसाध्यत्वस्यानुमानं पक्षज्ञानानुमित्योरपि समानप्रका
रकत्वेनैव संभवात् न च वर्तमानमात्रकृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिरूपस्य वर्तमानत्वकृतिसाध्यत्वानुमापकलिंगस्यासिद्धपाके बाधादस
सिद्धपाके च विना सामान्यलक्षणां तदनुमज्ञानात् परामर्शासंभवेन कथमनुमितिरिति वाच्यं स्वाश्रयवृत्तिपाकत्वात्मकपरंपरासंबंधेन पाकत्वप्र
कारेणासिद्धपाक एव तादृशलिंगवत्तापरामर्शसंभवात् परामर्शानुमित्योरपि समानविशेष्यतावच्छेदकत्वेनैव कार्यकारणभावात् तेन संबंधेन व्याप्यता

चि॰टी॰ १८

ग्रहस्तेनैव संबंधेन हेतुमत्ताज्ञानमनुमितिहेतुरिति नियमः परेषामसिद्धः। किंतु येन संबंधेन व्याप्यताग्रहस्तेनैव संबंधेन हेतुमत्ताज्ञानमिति येन संबंधेन व्याप्य
ताग्रहस्तेन संबंधेन यत्स्वाधिकरणांतर्वृत्तिपक्षतावच्छेदकसंबंधेन हेतुमत्ताज्ञानमप्यनुमितिहेतुः स्वपदं हेतुपरं नैवं संयोगादिसंबंधेन वह्निव्याप्यतयावगृही
तस्य धूमादेः स्वाश्रयवृत्तिद्रव्यत्वसंबंधेन द्रव्यत्वरूपेण ह्रदादौ परामर्शात्तादृशधूमादेः संयोगसंबंधेन द्रव्यत्वरूपेण पर्वतपरामर्शाच्च द्रव्यत्वरूपेण ह्रदादौ व
ह्न्यनुमित्यापत्त्या सार्वान्योरव्याप्त्यापत्तिः परामर्शानुमित्योः समानविशेष्यतावच्छेदकत्वे नैककार्यकारणभावादिति वाच्यं न्यायनये प्रमाणमात्रं प्रति जनकस्य
विषयबोधस्य परनये लाघवाद्विशिष्टबोधं प्रत्येव जनकतया ह्रदादौ वह्न्याद्यनुमित्यनुत्पादात् अत एव परनये साध्यतावच्छेदकरूपेण पक्षे किंचित्साध्यव्याप्ति
ज्ञानादेव साध्यत्वावच्छेदकरूपेण प्रसिद्धसाध्यस्यापि भानाभ्युपगमेन वह्निव्याप्यधूमवान्पर्वत इति परामर्शान्न वह्नित्वरूपेण पर्वते महानसीयवह्न्यादेर्भानं कार्यका
रणभावकल्पनमतद्रूपएव ज्ञानत्वेन तद्बाधाभाववत्त्वेन न्यायनये यत्र तद्धर्मनिष्ठविशेष्यतासंबंधेन ज्ञानोत्पत्तिस्तत्र विशेषणताविशेषसंबंधेन तद्बाधाभाव इति विशे नो
ष्यघटितसामानाधिकरण्यं प्रत्यासत्तिः। परनये च यत्र धर्मिविशेष्यकप्रकारतानिरूपितविशेष्यतासंबंधेन ज्ञानोत्पत्तिः तत्र विशेषणताविशेषसंबंधेन तद्बाधाभाव इ
ति विशेष्यघटितसामानाधिकरण्यमेव प्रत्यासत्तिर्लाघवात्। अन्यथानभ्युपगमेन व्यभिचारविरहात् नातो विषयाबाधस्य परनयेऽपि गुणत्वं न तु तन्निष्ठ विशेष्य
तासंबंधावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वस्यैव गुणत्वरूपत्वात् ननु न्यायनये परनये वा कार्यविषयबाधाभावस्य विषयरूपस्य निरुक्तविशेष्यघटितसा
मानाधिकरण्यप्रत्यासत्त्या जनकत्वं पाकरक्तघटादौ श्यामादिभ्रमापत्तिरप्यनीतभानानुमित्यादिरूपायां व्यभिचारादिति वाच्यं विषयबाधस्य हि निरवच्छिन्नाधार ताम०
तासंबंधेनाभावो न विषयरूपः किंत्वतिरिक्तः विषयस्यातीतत्वादिदशायामपि विषयवत्तितत्त्वान्न च तथापि केवलान्वयिधर्मप्रमायां विषयबाधस्याप्रसिद्धतया

तद्भावस्याजनकत्वासंभव इति वाच्यं तत्र तस्याजनकत्वेपि सत्तिविरहात् तद्भाववतोऽप्रसिद्धत्वेनापत्तिविरहात् त्वाविषयाबाधस्याविषयबाधाभावत्वे
न जनकत्वमपि तु सामान्यतोऽभावत्वेन पक्षतद्वन्निष्ठविशेष्यतासंबंधेन पन्निष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन वा ज्ञानोत्पत्तिः तत्र तद्वन्निष्ठाविशेष
णतासंबंधेनाभाव इति सामानाधिकरण्यप्रत्यासत्तिः न चाभावत्वमादायविनिगमनाविरहः भावत्वस्याभावभिन्नत्वादिरूपतया गुरुत्वात् न च संयोगसमा
वायादिसंबंधे नघटादिप्रमायां द्रव्यत्वगुणत्वादिकमादायविनिगमनाविरह इति वाच्यं अतीतानागताधिकरणेषु संयोगादिसंबंधेन घटादिप्रमायां व्यभिचा
रात् अतीतत्वादिदशायां अतीताधिकरणे द्रव्यादिमत्वविरहात् अभावत्वस्य तु तदानीमपि सत्वात् न च तथाप्यधिकरणतात्वप्रतियोगित्वादेरखंडोपाधित्व
पदार्थत्वनये तमादायविनिगमनाविरह इति वाच्यं तस्याखंडजातिरूपपदार्थत्वनयेनापि लघुतया कारणतावच्छेदकत्वान्नच भ्रमस्य चतुष्टयानामेव तावद्भ्रमाणां सं
ते भवेनानैकार्यकारणाभावाभावात् तन्न्यायनये प्रमासामान्यं प्रति तात्सामान्यमेव गुणः तद्वन्निष्ठ इति विषयतासंबंधेन सामानाधिकरण्यप्र
त्यासत्तिः वक्तृपरिहितज्ञानवक्तृमात्रविषयकशाब्दबोधे वक्तृत्वादिप्रकारकवक्तृमात्रविषयकस्मरणादिरूपस्य पद्किंचित्तानस्य नं तत्संसारेऽवतत्र
कस्यचित्पुरुषस्य सर्वत्र सर्वदा विषयतासंबंधेन सत्वेनानंतोत्तानस्यैवतेन संबंधेन सर्वदा सत्वेन च व्यभिचाराभावात् तद्देव च लाघवात् परन्तु पिपिलिप्सि
प्सुद्धि सामान्यं प्रति हेतुः पक्ष तन्निष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन ज्ञानोत्पत्तिः तत्र तद्वन्निष्ठविशेष्यतासंबंधेन ज्ञानमिति सामानाधिकरण्य
प्रत्यासत्तिः भ्रमानभ्युपगमेन तत्र व्यभिचारविरहात् भ्रमस्याभ्युपगमेपि संस्कारस्यनादित्वात् यात् सर्वदैव सर्वत्र विशेष्यतासंबंधेनावश्यंकस्यचित्पुरुषस्य
वक्तृपरिहितज्ञानवक्तृत्वादिप्रकारकवक्तृमात्रविषयकशाब्दबोधादिसत्त्वेन प्रमाणामपि व्यभिचारविरहाच्च न च तथापि परत्वे समानप्रकारकत्वेन तानेव

१६

वि॰टी॰ सु

यो॰ कार्यकारणभावे रजतत्वादिप्रकारकसिद्धरजतत्वज्ञानादनुपस्थितसिद्धरजतत्वादाविवादनुपस्थितेऽपि इतरार्थान्तरेऽपि रजतत्वादिप्रकारकेच्छोत्पत्तिः नच पदार्थान्तरे र
जतत्वावच्छिन्नसंसर्गायत्वासमत्वान्तत्रेच्छेति वाच्यं उपस्थितेः संसर्गांशे हस्ते तरांशत्वात् नच तत्प्रकारकज्ञानत्वेन तत्प्रकारकतद्विषयविषयकेच्छात्वेन कार्यकारणभावो
न तु समानप्रकारकत्वं प्रत्यासत्तिरिति वाच्यं रजतत्वादिप्रकारकज्ञानात् भ्रमस्थले रङ्गादौ रजतत्वादिप्रकारकेच्छानुपपत्तेः नच परासत्तेष्टापत्तिरिति वा
च्यं रङ्गो रजतत्व विप्रवृत्त्यनुरोधेन तेनापि तदङ्गीकारात् नस्मात्पस्थिते स्वभेस्य हारिच्छेति परेणाभ्युपेयं अत एवेदं रजतमिति उपस्थिते रङ्गादौ रजतत्वेनेच्छा तथा
च भावि निर्विषयेच्छा न एवेच्छेति तद्वर्यमवश्यं सामान्यलक्षणास्वीकरणीयेति चेन्न समानप्रकारकत्वप्रत्यासत्त्या ज्ञानत्वेनेच्छात्वेन समवायघटितसामानाधिक
रण्यप्रत्यासत्त्या तत्प्रकारकज्ञानत्वेन तत्प्रकारकेच्छात्वेनैव सामान्यकार्यकारणभावः विशेषतस्तु रजतेतरत्वप्रकारकेच्छायां यादोषाभावात् अरजतेन रजतत्व
प्रकारकेच्छायां च अनेन संगृहीतभेदस्य रजतस्य ज्ञानं हेतुरिति परसिद्धान्तात् नच तथापि परसिद्धान्तो नोपपद्यते तथा तत्स्वमनन्यपेक्ष्य लाघवात् द्धि घ
शेष्यकत्वप्रकारकज्ञानस्य न हि शेष्यकतत्प्रकारकेच्छां प्रति हेतुत्वपारदत्वादि रूपेणासिद्धहारदादविच्छिन्नानुरोधेन सामान्यलक्षणावश्यकीति वाच्यं
स्वमतेऽपि रजतत्वादिरूपेणासिद्धरजतादावेवेच्छोत्पद्यते असिद्धरूपेणासिद्धरजते इच्छानुत्पादे विशेषणातिचिरत्वात् एवं चिकीर्षापि पाकत्वादिरूपेणावच्छिन्नमात्र
स्व हानि साध्यत्व भ्रमात् असिद्धपाकावच्छिन्नविषयकेनासिद्धपाके चिकीर्षाया अप्रयोजकत्वेऽपि क्षतिविरहात् तस्मात्कालरूपेणैव विशेषणस्य न समन्वेऽपि अन्तोऽस्मत्ना
वपि बाधकाभावाच्चेत्यस्य स्ववचनत्वात् न तत्र सिद्धत्वज्ञानविरोधीति वाच्यं तद्वच्छेन सिद्धत्वज्ञानस्यैव तत्प्रकारेणेच्छां प्रति विरोधित्वात् नच रजतत्वावच्छे १५०
दे नासिद्धत्वज्ञानं प्रकृते तत्तत्वेनेच्छोत्पत्तेः केनाप्यनङ्गीकारात् एवं तत्सामान्यलक्षणां विनापि अपेक्षालः स्वलोत्पादकालीनध्वंसप्रतियोगित्वविशिष्टकालत्वा

रित्याद्यनुमानपक्षधर्मताज्ञानबलेनासिद्धहस्त्यादेरसिद्धपाकादेश्च ज्ञानसंभवः सामान्यलक्षणानभ्युपगमेविशिष्टबुद्धिसामान्यं प्रतिविशेषणज्ञानस्यापिहे
तुत्वानभ्युपगमेनपक्षधर्मताबललभ्यासिद्धहस्त्यादेस्तत्रविरहेपिक्षतिविरहात् ज्ञातेचासिद्धपाकेज्ञानलक्षणाप्रत्यासत्त्यैवतत्त्वंबलमतेमतमितिवर्त्तमान
स्वकृतिसाध्यत्वज्ञानासंभवेनचिकीर्षासंभवात् सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमेपिज्ञानलक्षणायाः तन्मतेप्रत्यासत्तित्वावश्यकत्वादि ब
त्याशंकाविस्तरः ७ नचेतिसामान्यलक्षणायाः प्रत्यासत्तित्वास्वीकारइतिशेषः संशयविरोधीति घटोनवेतिसंशयविरोधीत्यर्थः समानाकारोहि
निश्चयः संशयविरोधी अतस्तवजातिमानित्यादिनिश्चयेपिघटोनवेत्यादिसंशयः अस्मन्मतेतुघटोनवेतिसंशयकोटितावच्छेदकघटत्वांशेनिष्प्रकारक
प्रमेयोनवेतिसामान्यलक्षणाजन्यप्रत्यासत्तिजन्यज्ञानतच्चेतिभावः स्वसामग्रीविरहादिति घटत्वांशेनिर्विकल्पकात्मकघटत्वविशिष्टज्ञानंप्रतिघट
त्वांशेनिर्विकल्पकात्मकंज्ञानमेवहेतुः अन्यथाजातित्वादिरूपेणघटत्व प्रकारकघटज्ञानेपिभूतलंघटवदितिघटत्वांशेऽन्यप्रकारकघटत्व २
प्रकारकघटविशिष्टबुद्ध्यापत्तेः जातित्वरूपेणघटत्वज्ञानेप्ययंघटइतिविशिष्टबुद्ध्यापत्तेश्च तादृशविलक्षणाविषयतायाभूतलंघटाभाववदितिबाधनि
श्चयाभावस्यायंनघटइतिभेदग्रहाभावस्यचकार्यतावच्छेदकत्वेनसामग्रीमर्यादयैवतदुपच्छिन्नोत्पादनसंभवात् नचतदानींघटत्वांशेजातित्वप्रकार
कज्ञानस्यापिसामग्रीसत्वान्नघटइतिघटत्वांशेनिष्प्रकारकज्ञानमितिवाच्यं जातित्वादिप्रकारकज्ञानसामग्र्यास्तादृशविलक्षणाविषयताशालि
ज्ञानंप्रत्यप्रतिबंधकत्वेनतदुत्पादेपिबाधकाभावात् अन्यथाजातिमान्घटइतिद्विविधविषयताशालिज्ञानानुपपत्तेः तदानींजातित्वप्रकारेणज्ञानसा
मग्र्याआवश्यकत्वात् स्वमतेप्रकृतेप्रमेयत्वसामान्यलक्षणाजन्यघटत्वज्ञानस्यघटत्वांशेप्रमेयत्वप्रकारकत्वनियमान्नतोघटइतिसामान्यधीसंभवइतिभा

वदतीतिदिक् ॥ श्री ॥ सामान्यलक्षणरहस्यं ॥ प्रसंगसंगत्यानुपाधिं निरूपयितुं प्रयोजनं दर्शयन् शिष्यावधानाय प्रतिजानीते उपाधीति तथाच
परस्यायन्नायां व्याप्तिनिश्चयप्रतिबंधयोपाधिसत्त्वात् स्वस्यायन्नायां व्याप्तिनिश्चयाय उपाधिर्निरस्यः सचोपाधिज्ञानं विना न संभवतीति तन्निरू
पणमिति भावः ॥ पितृचरणास्तु व्याप्त्यनंतरमुपाधिं निरूपयितुं व्याप्त्या सह एककार्यानुकूलत्वसंगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते
उपाधिज्ञानादिति ॥ परपक्षदूषकत्वे तावदुपाध्युद्भावने उपाधिज्ञानादित्यर्थः ॥ तथाच स्वपक्षस्थापने तौ व्याप्त्युद्भावने व्याप्तिनिश्चयादिजन्यः तथा परपक्षदू
षकत्वे तावदुपाध्युद्भावे उपाधिज्ञानादिजन्य इति विजयजल्पशोकैककार्यानुकूलत्वमेव संगतिरिति भाव इत्याहुः ॥ तत्प्रकरणीयेन निरूपणीयो विषयत्वसं
बंधार्थः ॥ तथाच निरूपणाविषयीभूतत्वमनुपाधिरीदृशो धर्म इत्यन्वयः ॥ साध्यत्वाभिमतेति अत्र मतेत्यंतदलानुपादाने वह्निमान् धूमादित्यादौ धूमव
त्त्वादावतिव्याप्तिरिति तदुपादानं तन्मात्रोपादाने द्रव्यत्वादावतिप्रसंग इति विशेष्यदलं साध्यत्वसाधनत्वे व्यापकत्वव्याप्यत्वे सोपाधौ वक्तुं तौ न
स्त इत्युभयत्राभिमतपदं ननु साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं तच्च साध्ये उपाधिव्याप्तौ गृहीतायामेव ग्राह्यं साचानौपाधिकत्वज्ञानाधीनग्राह्या
नौपाधिकत्वं च प्रकृते साध्यस्याव्यापिव्यापकव्यापकत्वं उपाधिव्यापकेषु पावत्सु साध्यनिष्ठव्याप्तिनिरूपकत्वं पर्यवसितं तथाच साध्ये उपाधिव्याप्तौ गृही
तायामेवोपाधौ साध्यनिष्ठव्याप्तिनिरूपकत्वज्ञानं उपाधिव्यापकपदार्थांतर्गत उपाधौ साध्यनिष्ठव्याप्तिनिरूपकत्वज्ञाने च साध्ये उपाधिव्याप्तिज्ञानं तस्यानौ
पाधिकत्वघटकत्वादन्योन्याश्रयः ॥ नच साध्योपाध्योरन्योन्याभावा... घटकतया गर्भव्याप्तिज्ञानं प्रत्यनौपाधिकत्वाभावादेकतरगर्भव्याप्तिघटितानौपाधिकत्वज्ञानं कारणमतो दानः
नान्योन्याश्रय इति वाच्यं तथा सत्यनवस्थापत्तौ तथाच न्यूनताकत्वादित्यत आह अनौपाधिकत्वेति व्यापकत्वादिघटितपदे न व्याप्तिनिरूपकत्वाभावरूपसाधना

व्यापकत्वपरिग्रहः व्याप्ति निरूपकत्वापेक्षया लाघवादाह यद्वेति तथाच साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वे सति साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वमु
पाधित्वमिति लक्षणं निर्व्यूढं नन्वेवं धूमवान् वह्नेरित्यादौ आर्द्रेन्धनादावव्याप्तिः तत्र तादृशाभावाप्रतियोगित्वस्यैवाप्रसिद्धेः न च तादृशप्रतियोगितानव
च्छेदकधर्मवत्त्वं मतमिति तत्तात्पर्यमिति वाच्यं वह्निमान् धूमादित्यादौ वह्न्यादिसामग्र्यार्द्रेन्धनादौ तादृशप्रमेयत्वादिविशिष्टत्वेन महानसीयत्वादौ चातिव्याप्तेरिति चेन्न
साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकोपि साधनवन्निष्ठाभावप्रतियोगितावच्छेदको धर्मस्तद्वत्त्वं तेन रूपेणोपाधित्वमित्युक्तत्वात् एवं प्रतियोगितयो
पाधितावच्छेदकसंबंधमपि बोध्यं तेन धूमवान् वह्नेरित्यादौ आर्द्रेन्धनत्वादेः समवायादिना धूमवन्नि ष्ठाभावप्रतियोगिता [redacted] वच्छेदकत्वेपि न क्षतिः तथा वह्निमान् धूमादित्यादौ साध्यव्यापक
तावच्छेदकस्य वह्नित्ववह्निसामग्रीत्वादेः समवायेन साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेप्यतिव्याप्तिरिति ध्येयं नन्वेवं द्रव्यं सत्त्वादित्यादावव्याप्यवृ
त्तिसंयोगाद्युपाधावव्याप्तिः तस्य यथोक्तसाध्यव्यापकत्वविरहात् एवं गुणाः सत्त्वादित्यादौ संयोगाभावादावतिव्याप्तिः तस्यापि यथोक्तसाधनाव्यापकत्वादि
त्यत आह प्रतियोगित्वं चेति प्रतियोगिनोः निष्ठताप्रतियोगिनोः साध्यवतः साधनवतोर्विनिवेशनीये इत्यर्थः तदधिकरणेति तदधिकरणप्रतियोगि
तावच्छेदकस्याधिकरणप्रतियोगितावच्छेदकावच्छिन्नेति यावत् तदनधिकरणत्वमित्यर्थः एवं मत्प्रसिद्ध्यादिवारणाय प्रतियोगिपदस्य प्रतियोगितावच्छेदक

चि.टी. परत्वावच्छेदकत्वपात्तछ्छेदेनतस्यैवपरामर्शात्प्रतियोगितावच्छेदकावच्छिन्नेत्युपादाना [redacted]
१०० त्द्रव्यंसत्वादित्यादौविशिष्टसत्वेनाव्याप्तिः यथासत्तावान्जातेरित्यादौविशिष्टसत्वेः तिव्याप्तिरि
तिभावः वस्तुतस्तुवस्तुमात्रस्यैववैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावस्यसाध्यवतिसत्त्वेनतद्वन्निष्ठाभावप्रतियोगित्वसाप्रसिद्ध्यात्मकार्थं त
स्साध्यव्यापकताघटकत्वमतस्त्यात् प्रतियोगित्वंचेति तद्वन्निष्ठाभावप्रतियोगित्वंचैतदर्थः तदधिकरणानधिकरणत्वं तदधिकरणानधिकरणकत्वंस्वा
ध्म नधिकरणतदधिकरणकत्वमितियावत्। तत्पदंसाध्यपरं तत स्वानधिकरणसाध्याधिकरणकंयद्यत्तदन्यत्वंसाध्यव्यापकत्वमितिफलितं एवंसाधन
वन्निष्ठाभावप्रतियोगित्वमपिस्वानधिकरणसाधनाधिकरणकत्वंवक्तव्यं अन्यथावह्निमान्धूमादित्यादावपिसाध्यव्यापकस्यद्रव्यत्वादेः धूमवन्निष्ठ
वैशिष्ट्यावच्छिन्नाभावप्रतियोगित्वादुपाधितापत्तेः नचैवंधूमवान्वह्नेरित्यादावयोगोलकभेदादिरूपैकव्यक्त्युपाधौलक्षणासंभवेप्याद्रेंधनादिरूपे
नानाव्यक्त्युपाधावव्याप्तिः चालनीन्यायेनसर्वासामार्द्रेंधनव्यक्तीनांस्वानधिकरणसाध्याधिकरणकत्वासाध्यव्यापकत्वविरहादितिवाच्यं स्वा
वच्छिन्नानधिकरणसाध्याधिकरणकंयद्यत्तदन्यत्वेसतिस्वावच्छिन्नानधिकरणसाधनाधिकरणकोयोधर्मस्तद्वत्तेनरूपेणोपाधित्वमितिविवक्षितत्वा
तंचयत्रस्वपदमन्यत्वप्रतियोगिपरंद्वितीयंचोपाधितावच्छेदकपरमतः एवद्रव्यंसत्वात् गुणाः एत्वादित्यादौसंयोगतदभावयोरपिनाव्याप्तिव्याप्यवकाशा
द्रस्येवतत्वं तदधिकरणानधिकरणत्वमित्यत्रतत्पदस्याभावपरंतथाचात्रप्रतियोगित्वंनस्वरूपसंबंधविशेषः किंतुतदभावाधिकरणावृत्तित्वं एम०
नेनद्रव्यंसत्वाद्गुणःसत्वादित्यादौसंयोगतदभावयोर्नाव्याप्तिव्याप्यवकाशस्तमाहुः तदसत् एतादृशप्रतियोगित्वंव्यापकतारूपमात्रेविवक्षितेसाधनाव्यापक

त्वस्थलमात्रेवाव्यभपर्त्वं एवं वा आद्ये साध्यवन्निष्ठाभावाधिकरणावृत्तिभिन्नत्वं साध्यव्या पकत्वं फलितं तथा च वह्निमान् धूमादित्यत्र महेनासपि साधनाव्याप
कघटत्वादावतिव्याप्तिः तस्यापि साध्यनिष्ठजलत्वाद्यभावाधिकरणावृत्तितया साध्यव्यापकत्वात् द्वितीये साधनवन्निष्ठाभावाधिकरणावृत्तित्वं साधनाव्यापक
त्वं [illegible]फलितं तथा चासंभवः धूमवान् वह्नेरित्यादावयोगोलकादिसत्त्वादेरपि साधनवन्निष्ठजलत्वाद्यभावाधिकरणावृत्तितया साधनाव्यापकत्वविरहात् अ
त एव न लक्षणतृतीयोपि॥ न च साध्यवन्निष्ठाभावाधिकरणावृत्तित्वघटकं यत्तत् साध्यव्यापकत्वं विवक्षितमिति वाच्यं अव्यापकत्वदले प्रतियोगित्वस्य स्वरूपसंबं [illegible] ध
विशेषरूपत्वे द्रव्यं पृथिवीत्वादित्यादौ संयोगादावतिव्याप्तेः [illegible] किंचित् साधनाव्यापकत्वमपि साधनवन्निष्ठ[illegible]भावाधिकरणावृत्ति तत्तदद्रव्यं सत्त्वादित्यादौ संयो स्वा
गादावव्याप्तेः तस्य सत्तावन्निष्ठस्वाभावाधिकरणद्रव्यवृत्तितया साधनाव्यापकत्वविरहात् न च साध्यव्यापकत्वं साध्यवन्निष्ठाभावाधिकरणावृत्तिभिन्नत्वं साधन
व्यापकत्वं च साधनवन्निष्ठप्रतियो[illegible]गिदभावाधिकरणावृत्तित्वमतो न द्रव्यं सत्त्वादित्यादौ संयोगादावव्याप्तिः द्रव्यं पृथिवीत्वादित्यादौ संयोगादावतिव्याप्तिरिति वा
च्यं तथापि द्रव्यं पृथिवीत्वादित्यादौ तत्तत्संयोगव्यक्तावतिव्याप्तिर्दुर्वारैवेति दिक्॥ पक्षधर्मेति वायुः प्रत्यक्षः प्रत्यक्षविषयताश्रयत्वादित्यादौ पक्षधर्मबहिर्द्रव्य
चो त्वावच्छिन्नप्रत्यक्षत्वव्यापके उद्भूतरूपवत्त्वे काकः श्यामो मित्रा[illegible]तनयत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापके शाकपाकजत्वे चाव्याप्तिरित्यर्थः तस्य साध्यव[illegible]न्नि
ष्ठाभावाप्रतियोगित्वाभावादिति भावः। तयोः पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकयोः दूषकतेति वक्ष्यमाणरीत्या उभयत्रैव व्यभिचारोन्नायकत्वसत्त्वादिति भावः। त
योरुपाधित्वानंगीकारेपि दृष्टान्तविरोधमप्याह मित्रेति काकादेरित्यादिः प्रत्यक्षस्पर्शाश्रयत्वेनेति प्रत्यक्षस्पर्शविषयतारूपः संबंधोपन्नेति प्रत्यक्षविषयता
श्रयत्वेनेत्यर्थः तथा चाद्ये साधनावच्छिन्नसाध्यव्यापकोहि तोपि पक्षधर्मावच्छिन्नसाध्यव्यापकमिति भेदेनोदाहरणद्वयमिति भावः प्रयोजकत्वेन व्यभिचारानुमानप्रयोजकत्वेन

१ पक्षेतर इति। पर्वतो वह्निमान् धूमादित्यादौ पर्वतेतरादावित्यर्थः न च पक्षेतरस्य प्रमेयत्वादेः सर्वत्र सत्त्वेन साधनव्यापकतया क १

वि॰टि॰ यमतिव्याप्तिरितिवाच्यं तादात्म्यसंबंधेनतस्यसाधनाव्यापकत्वात् नन्वेतदपिपक्षेतादात्म्यसंबंधेनसाध्याव्यापकतयाकथमतिव्याप्तिरितिवाच्यं अतिव्याप्तेरुक्तदूषणोपजीवक
१०१ ज्ञानसंभितिप्रसक्तेरित्यर्थात् पक्षातिरिक्तएवसाध्यव्यापकत्वस्यग्राह्यत्वात् अन्यथापक्षेसाध्यसंदेहदशायामनुपाधित्वग्रहःकुत्रापिनस्यादितिभावः नन्वितरशब्दस्यसर्वना
मकार्यापत्तिरितिवाच्यं पक्षःइतरोयस्मादितिबहुव्रीहिसमासान्नबहुव्रीहावित्यनेनसर्वनामकार्यनिषेधात् व्यतिरेकइति साध्यव्यतिरेकेसाध्येइत्यर्थः इत्यत्रेह
व्य तौ इतरान्यत्वस्येति वक्तमात्रस्यैवकिंचिदपेक्षपाउक्तत्वादितिभावः व्यतिरेकेपिविशेषणत्वादिति स्वव्यतिरेकेणासाध्यव्यतिरेकेसाध्येव्यभिचारवारकविशेषणवत्वा
भावादित्यर्थः ननुवर्तितथापियेनरूपेणसाध्यव्यापकतातद्रूपावच्छिन्नसाभाववत्त्वेनहेतुनासाध्याभावसाधनेव्यभिचारवारकविशेषणाग्रहणत्वेसतीतिविशेषणांदे
यमितिभावः बाधोन्नीतस्येति बाधोन्नीतत्वंबाधेनसाध्यव्यापकतयाग्र मितत्वंवह्निरनुष्णाःकृतकत्वादित्यत्रवह्नीतरत्वस्येत्यर्थः नवेष्टापत्तिरितिव्यभिचारवारकवि
शेषणवत्वेनव्यर्थविशेषणतयासत्प्रतिपक्षोव्यापकत्वस्योपाधेर्दूषकताबीजस्यतत्राभावादितिभावः विशेषणांविनेति पक्षादिविशेषणांविनेत्यर्थः व्याप्यग्रहइति
व्याप्तिग्रहासंभवेनेत्यर्थः नत्तार्थकत्वादिति वह्न्यादिविशेषणेतदूषणावहस्यव्याप्तिग्रहानुपयुक्तत्वरूपवैयर्थ्यस्याभावादित्यर्थः नन्वाचोपाधिलक्षणघटकतया
दभिमतस्यवैयर्थ्याभावस्यतत्रासत्त्वेपिदूषणावहस्यवैयर्थ्यस्याभावात् सत्प्रतिपक्षोन्नयनसंभवेनतस्यानुपाधित्वेनदूषणापत्त्यसंभवइतिभावः आशयमविद्वानाशं
कते ननुकगमेतिपर्वतोधूमवान्वह्नेरित्यादौपर्वतेतरस्मिन्नतयेतिभावः भावमुद्घाटयति पक्षातिरिक्तइति सहचारस्थानेनेतिशेषः नत्वतादृशसाध्यव्यापकता
ज्ञानंच नन्वापितिबाधानुन्नीतपक्षेतरत्वेपीत्यर्थइतिसांप्रदायिकाः नव्यास्तुअत्रसाध्यव्यापकत्वंपक्षेतरीयत्वावच्छिन्नसाध्यनिरूपितमुक्तंसाध्यसामान्यनिरूपितंवा राम॰
अवधेपक्षेतरइति इदमुपलक्षणं पक्षमात्रवृत्तिसाध्यव्यापकेऽव्याप्तिरित्यपिद्रष्टव्यं अतएवनाशंकतेवक्तगम्येतीतियोजनेति ननुपक्षेसाध्यसंदेहस्थलेनव्यभिचारसंशयस्त्वात्

पक्षातिरिक्तस्थले सहचारज्ञानमात्रात् साध्यव्यापकत्वग्रहस्तत्र कथं स्यादित्यत आह अन्यथेति अनुपाधित्वइति साध्यव्यापकताया अनिश्चयइत्यर्थः उपा
धिमात्रमिति पक्षे साध्यसंदेहदशायां पक्षावृत्तित्वेन गृहीतस्य उपाधिमात्रस्य साध्यव्यापकत्वानिश्चयप्रसक्तेरित्यर्थः यथाश्रुते पक्षावृत्तित्वेन निश्चितानामेवो त्व
पाधीनां पक्षे साध्यसंदेहसत्त्वेपि साध्यव्यापकतानिश्चयसंभवादसंगतेः तथा च पक्षे साध्यसंदेहस्तदाहितव्यभिचारसंशयो वा न साध्यव्यापकतानिश्चयपरिपंथी
ति त्वयाप्यभ्युपगंतव्यमिति भावः विपक्षाव्यावर्तकेति विपक्षः साध्याभाववान् तद्व्यावर्तकं तन्निष्ठाभावप्रतियोगितावच्छेदकत्वासंपादकं यद्विशेषणं
संबंधसामान्येन तद्धर्मं साध्यव्यापकत्वसाधनाव्यापकतावच्छेदकविशेषणानामित्यर्थः तथा च विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वसंपादकविशेषणानां
न साध्यव्यापकतावच्छेदकधर्मवत्त्वमुपाधित्वमिति भावः संपादकत्वं चात्र एतन्निष्ठाभावप्रतियोगितावच्छेदकत्वमेतदधीनमिति प्रतीतिसिद्धः स्वरूप
संबंधविशेषः विपक्षाव्यावर्तकविशेषणवत्साध्यव्यापकतावच्छेदकत्वे सति साधनाव्यापकतावच्छेदकत्वमित्युक्तौ ह्रदेतरत्वविशिष्टपर्वतेतरत्वपर्वतेत
रत्वविशिष्टह्रदेतरत्वादावतिप्रसंग इत्यतो निषेधद्वयगर्भता बाधोन्नीतेति वह्निरनुष्णः कृतकत्वादित्यत्र वह्नीतरत्वस्य परिग्रह इत्यर्थः पक्षस्यैव विपक्षत्वा
दिति पक्षस्यैव विपक्षतया वह्निविशेषणस्येतरत्वनिष्ठविपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वसंपादकत्वादिति भावः ननु पर्वतेतरत्वादेरिति ननु पर्वतो
वह्निमान्धूमादित्यादौ पर्वतेतरत्वादेः परिग्रह इत्यर्थः तत्र पर्वतविशेषणस्येतरत्वे पर्वतमात्रविष्ठाभावप्रतियोगितावच्छेदकत्वसंपादकत्वेन विपक्षनिष्ठा
त्य भावप्रतियोगितावच्छेदकत्वादिति भावः आदिपदात् पर्वतावयववृत्तित्वे पर्वतेतरद्रव्यत्वह्रदपर्वतसंयोगानाधारत्वह्रदेतरत्वविशिष्टपर्वतेतरत्वपर्वतेतर
त्वविशिष्टह्रदेतरत्वादेः परिग्रहः नहीति वस्तुतस्त्विति प्रथमांतं तद्रूपा[illegible]मित्यन्वयि तत्र विपक्षाव्यावर्तकविशेषणोपादानेनेति स्वघटकीभूतेति विशेषणोइत्यर्थः स्व

३१ २ व्यापकतावच्छेदकसाधनाव्यापकतावच्छेदकं तद्धर्मवत्त्वात् दुष्टविशेषणानवच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगिता या अवच्छेदकं प्र साध्य ३

चिं॰टी परमुपाधितावच्छेदकपरं तथा च स्वघटकीभूतविपक्षाव्यावर्तकविशेषणाभूतं यत् साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदकं तद्वत्त्वमुपाधित्वमिति फलित
१०२ मिति भावः सिद्धासिद्धीति स्वघटकीभूतताद्दृशविशेषणांशसिद्धम [illegible] प्रसिद्धं वा उभयथापि ताद्दृशविशेषणाद्धर्मवत्त्वस्योपाधितावच्छेदकत्वव्याघात इत्यर्थः त
त्ताद्दृशविशेषणाघटितं पत्त्वा [illegible] ध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं चोपाधित्वं विवक्षितमित्यस्वरसादूषणान्तरमाह तथा
पि चेति साध्यव्यापकत्वसाधनाव्यापकत्व इति साध्यव्यापकत्वसाधनाव्यापकत्ववत्तानेदृश तत्पक्षेतरत्वेन साध्यव्यापकत्वघटितज्ञानेन पक्षे हेतुमति पक्षे साध्य र्थः
व्याप्तिः साध्यव्याप्तिनिश्चयः व्यभिचारस्य चेति व्यभिचारज्ञानमेवेत्यर्थः व्यभिचारे चेति व्यभिचारज्ञाने चेत्यर्थः अव्यवस्थमुपाधिरिति अव्यवस्थपक्षेतरउपा
धिः व्यभिचारोन्नायकत्वस्योपाधिदूषकताबीजस्य सत्त्वादित्यर्थः तथा च तत्पापक्षेतरो नोपाधिरितु थैपनरिति [illegible] व्याप्तिग्राहकतावस्तुतो दूषकताबीजस
त्वेन तदुपाधिर्भवत्येवेति [illegible] भवतस्तत्रानुपाधिताभ्युपगमोऽयुक्त इति भावः किंच विशेषणमपि व्यर्थमेवेत्याह पक्षेतरस्येति पक्षेतरस्तत्रोपाधिः स्यादेवेत्यर्थः
अन्तर इति शेषः तावन्मात्रस्येति साध्यव्यापकतामात्रस्येत्यर्थः मात्रपदादूषकीविशेषणाव्यवच्छेदः दूषकत्वाच्चेति दोषोन्नयनोपयोगित्वादित्यर्थः च
कारस्त्व व्यर्थविशेषणाभिमतेनान्तरंयोऽन्यः नन्वनेदृशमेव विशेषणमिति वाच्यं भवतस्तस्यानुपाधिताभ्युपगमेन विशेषणादाने ऽनियामकत्वेनेति
तिभावः अनुमानमात्रेति पक्षेऽनिश्चितसाध्यकानुमानमात्रोच्छेदकत्वमित्यर्थः जातित्वादिति जात्युत्तरकत्वादित्यर्थः उपाधिव्यभिचारेण साध्यव्य
भिचारानुमानेकार्ये पक्षेतरस्योपाधित्वेनोद्भावनीयतया स्वव्याघातकमुत्तरं जातिरिति जातिलक्षणसत्त्वादिति भावः पक्षेतरेत्यादि तथा च विशेषणांसार्थकमे एभ॰
वेति भावः दूषणासमर्थेति दूषणासमर्थमुत्तरं जातिरिति सैव जातिलक्षणात्वात् पक्षेतरस्य व्यभिचारोन्नयनसमर्थत्वेवेति भावः प्रकारान्तरमिति बाधानुमी

तथसे न रभि चारादिकमित्यर्थः उपाधित्वाभावेपीति तथा चोपाधित्वानंगीकारेपीत्यर्थः तथा च तद्धर्ण्यविरोधः स्यादिति भावः दूषकताबीजसत्वे स्वमानस्याउ
पाधिताभ्युपगमस्तत्रापरस्यापविरोधः परस्याक्षेपे चानुचितत्वस्तदेवचनात्सत्यभिप्रायेणाशंकते अथेति सत्प्रतिपक्षत्वोपाधिताभ्युपगमस्तत्रापरस्यापविरोधः परस्या यो
क्षेपे चानुचितत्वस्तदेवचनात्सत्यभिप्रायेणाशंकते अथेति सत्प्रतिपक्षतया साध्याभावसाधकतया असाधारणत्वादिति एवं व्याहतत्वादित्यर्थः ननु
व्यभिचारानुमापकतयानुपाधिर्दोषः तत्र च नासाधारणपक्षिमाशंक्य निराकरोति न चेति उपाध्यव्यापकत्वेपीति उपाधिव्यभिचारित्वेपीत्यर्थः साध्याव्याप्यत्वं
साध्यव्यभिचारित्वं अनुमेयमिति शेषः न साध्यव्यापकत्वमिति साध्यव्यापकत्वाभावेपि सिद्धेरित्यर्थः हेतावुपाधिव्यभिचारित्वे ज्ञायमाने अनुपाधावपि हे
त्वव्यापकत्वज्ञानस्यावश्यकत्वात्तन्मानसंविन्नत्वेवैयर्थ्यादिति भावः ननु हेतावुपधिव्यभिचारित्वग्रहदशायामनुपाधावपि हेत्वव्यापकत्वज्ञानस्यावश्यक
त्वेपि हेतौ व्याप्तिनिश्चयाभावान्नतद्व्यापकत्वेन साध्यव्यापकताज्ञानं उपाधौ तु साध्यव्यापकतानिश्चयसत्वेन तद्व्यभिचारि त्वे व्यभिचारित्वग्रहउपस
स्ता: आह वा नीति यथा साध्यस्य उपाधिव्याप्यताग्राहकव्यभिचारादर्शनसहचारदर्शने तथा हेतावपि साध्यव्याप्यताग्राहके तस्त उभयार्थः नहि तदानीं हे
तौ साध्यव्याप्यव्यभिचारज्ञानमप्यस्ति स्फुटे व्यभिचारे तस्यैव वैयर्थ्यादिति भावः इदमापाततः यदा उपाधौ साध्यव्यापकत्वग्रहेऽनुकूलतर्कावतारादुपा
धौ साध्यव्यापकतानिश्चयो जातः हेतौ तु साध्यव्याप्यताग्रहेऽनुकूलतर्कावताराभावात्तत्र साध्यव्याप्यतानिश्चयो न जातस्तत्रैव व्यभिचारानुमानसंभवः त
स्मादिति न च साध्यव्याप्यहेत्वव्यापकतयोपाधेः साध्याव्यापकत्वहल्लात् कथं व्यतिरेकिणा सत्प्रतिपक्षस्यैव संभव इति वाच्यं सत्प्रतिपक्षोन्नायकत
तया दूषकत्वपक्षे हेतौ उपाधिव्यभिचारज्ञानस्यानपेक्षितत्वेन तुल्यवित्तिवेद्यतया उपाधौ साधनाव्यापकत्वज्ञानस्याप्यनावश्यकत्वात् यदा उपाधौ हे

चि॰ टी॰ १०३

त्वि व्यापकत्वात्तानंन नास्तितदैवसत्प्रतिपक्षसंभवादिति भावः सत्प्रतिपक्षांतरवदिति यथा सत्प्रतिपक्षे सत्प्रतिपक्षांतरं नोद्भावयितुं एकेनापि प्रतिबंधात् सत्प्रतिपक्ष
वातुल्यत्वात् प्रयोगेकत्वात् तथा सत्प्रतिपक्षे उपाध्युद्भावनमपि न स्यात् अभवन्मते उपाधिमुद्भाव्य सत्प्रतिपक्षांतरस्यैव करणीयत्वात् असत्प्रयोजकत्वादिति भा
वः दूषणांतरमाह किंचेति एवं सत्प्रतिपक्षोन्नायकतया दोषत्वे बाधोन्नीतोपि निवह्निरनुष्णः कृतकत्वादित्यत्र वह्नौ न तरोपीत्यर्थः व्यतिरेके साधारणपारि
ति साध्याभावसाधनेन व्यतिरेकस्यासाधारण्यात् इत्यर्थः पक्षमात्रवृत्तिहेतुरसाधारण इत्यभिमानेनेदं ननु मा [illegible] वाधोन्नीतपक्षे तत्रोप्युपाधिरित्याशयेना
शंकते नन्विति नोपाधिनियम इति न पक्षेतरोपाधिनियम इत्यर्थः यथाश्रुतेनाहशसामान्यनियमसत्वेपि पक्षेतरस्योपाधित्वात् व्यर्थकत्वान्निरा
करणासानुपयुक्तत्वप्रसंगात् अत एव बाध्ये पक्षे तत्रोपाधिनियमदर्शनमपि संगच्छते हेतुमतीति साध्यसमानाधिकरणहेतुमतीत्यर्थः तेन समवा
यादिसंबंधेन गगनादिसाध्यके घटो गगनवान् द्रव्यत्वादित्यादौ न व्यभिचारः न चाव्याप्यवृत्तिसाध्यके सद्धेतौ व्यभिचार इति वाच्यं निरवच्छिन्नसाध्याभा
वाधिकरणत्वस्य वाधपदार्थत्वात् न च तथापि उत्पन्नद्रव्यं प्रागभावकाले निर्गंधो गंधवान् पृथिवीत्वादित्यादाव सं[illegible]कीर्णबाधस्थले व्यभिचारः तत्र
पक्षतावच्छेदक एतद्द्रव्यप्रागभावकालावच्छिन्नत्वविशिष्टसमवायसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्य निरवच्छिन्नाधिकरणत्वस्यापि
पक्षे सत्वादिति वाच्यं तेन संबंधेन साध्यत्वे तत्रापि पक्षेतरस्योपाधित्वादिति भावः । ताहृशनियममनुपेत्याह अत एव पक्षेतरत्वमित्यत्र तेजस्त्वादेरिति धर्मिपरो
निर्देशः तेजः सामान्येन रासादिरूपपक्षे व पक्षेतरस्येत्यर्थः न व्यतिरेकस्य साध्याभावसाधने साधारण्याभावात् सपक्षे सौरालोकादावपि वृत्तेरिति भावः न एम॰
साध्यवद्वृत्तित्वेन वह्नीतरस्योपाधित्वेपि ताहृशनियमो नानुपपन्न इति हृदयं हेतुमतीत्यादिनियमाभ्युपगमेनैव दूषयति नेत्यादि नेत्यादिना इत्यर्थः त्यं

कृतकत्वादित्यत्रेत्यर्थः । अतेजस्त्वं विनेति धर्मिपदेनिर्देशः तेजः सामान्येतरादिकं विनेत्यर्थः । आदिना भास्वररूपवद्भिन्नत्वादेः परिग्रहः । अन्यस्येति प
क्षेतरस्येति शेषः । तेजःसामान्येतरादिव्यतिरेकस्तु साध्याभावसाधनयोः साधारणं दूष्येतरादिकं च न साध्यव्यापकमिति भावः । अन्यस्योपाधेरभावादिति यथाश्रु
तं तु न संगच्छते व्यतिरेके साधारण्याभाववतोपि गुरुत्वादेरूपवत्त्वावच्छिन्नसाध्यव्याप्यतयोपाधित्वात् ॥ महाचार्यास्तु अतेजस्त्वं अतेजस्त्वसमनियतं विनान्य
साधारणव्यतिरेकप्रतियोगिनं विनेति यावत् तेन भास्वररूपवद्भिन्नत्वादेर्परिग्रहः । अन्यस्योपाधेरभावादिति अन्यस्य पक्षसाध्यव्यापकस्योपाधेरभा
वादित्यर्थः । तेन विशिष्टसाध्यव्यापकस्योपाधेरभावेपि न क्षतिरिति तत्त्वम् ॥ ननु पक्षमात्रवृत्तित्वेनासाधारण्यं किं तु यावत्सपक्षव्यावृत्तत्वं तेजः सामान्येतरादि
व्यतिरेकस्तु अनुष्णत्वाभावे साध्ये न तथा पक्षे साध्यस्या सिद्धौ सपक्षाभावात् सिद्धौ तु तत्रैव सपक्षे वर्त्तमानत्वादित्यत आह किं चेति हृदेति हृदसंयो
गिपर्वतेत्यत्र चवृत्तिः साध्यते तत्राप्युपाधिर्बोध्यः । हृदपर्वतान्यत्वादिकं हृदेतरत्वादिविशिष्टपर्वतेतरत्वादिकमित्यर्थः व्यतिरेक इति उक्तोपाधीनां व्यति
रेकस्य पर्वतावयववृत्तिगुणादौ द्रव्यान्यपदार्थमात्रे हृदे च सपक्षे यथाक्रमं वृत्तेः तथा च बाधानुन्नीतपक्षेतरवारणाय विपक्षाव्यावर्त्तकत्वादिविशेषणा
दानेनत्रैवाव्याप्तिरिति भावः । हेतोः सपक्षविपक्षव्यावृत्तत्वमसाधारण्यं तत्र सपक्षव्यावृत्तत्वांशज्ञानेन हेतौ साध्यव्यतिरेकसहचारज्ञानरूपतया हेतौ
साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्यव्यतिरेकव्याप्तिज्ञानजनकं तथा चासाधारण्यज्ञानं साध्यतदभावोभयव्याप्यप्रकृतहेतुमत्तापरामर्श
रूपसत्प्रतिपक्षद्वारानुमितिप्रतिबन्धकमिति स्वमतेन दूषणान्तरमाह व्यतिरेकिणेति व्यतिरेकिणा पर्वतेतरादिना व्यतिरेकप्रतियोगिनापि पर्वतेतर
त्वादिनेति शेषः । न चासाधारण्यमिति सत्प्रतिपक्षप्रतिबन्धकमिति शेषः तस्यापि सपक्ष विपक्षव्यावृत्तत्वरूपासाधारण्यज्ञानस्यापि सत्प्रतिपक्षोत्थाप

अत्रसंशोधग्रंथः उत्तरपत्रे निरंकपृष्ठे प्रथमपंक्तौ ज्ञेयः २

म॰प्र॰ कतयेतिसाध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्याभावव्यतिरेकव्याप्तिःसाध्याभावव्यापकीभूताभावप्रतियोगित्वरूपसाध्यव्यतिरेकव्याप्त्योर्ग्रहह्रासाध्यतदभावोभय
१०४ व्याप्यप्रकृतहेतुमत्रापरामर्शरूपतत्प्रतिपक्षजनकतयेत्यर्थः दोषत्वादितिअनुमितावित्यप्रतिबंधकत्वादित्यर्थः तथाचासाधारणेपिसत्प्रतिपक्षसंभवात्पक्षेतदोष्य
पाधिरेवेतितस्यानुपाधितास्युपगमोवाराणापतस्यविशेषणवैयर्थ्यापादनंचदूषणमप्युक्तमिति [redacted] सत्ताने
ति वदूषणांतरमाह दूषकतेविषमव्याप्तस्यापीतितथाचतत्राव्याप्तिरितिभावः तथादूषकतायामितिस्वव्यभिचारेणसाध्यव्यभिचारोन्नायकतयास्वव्यतिरेके
ह णसाध्यव्यतिरेकोन्नायकतयावादूषकतायामित्यर्थः साध्यव्यापकता अस्यानुकूलतर्कविधयैवोपयोगादितिभावः अव्याप्तिनिरासायविषमव्याप्तस्यालक्ष्यत्वे
विनिगमकमाह अयेनिसाध्यप्रयोजकोधर्मः साध्यप्रयोजकीभूतधर्मएवशास्त्रीयोपाधिव्यवहारविषयः साध्यप्रयोजकधर्मत्वंशास्त्रीयोपाधिव्यवहारवि
षयत्वाव्यापकमितिभावः लक्षणापक्षेसद्धेतावपिसाध्यसमव्याप्तेऽतिव्याप्त्यापत्तेः प्रयोजकत्वंचेतिसाध्यान्वयव्यतिरेकोन्नायकान्वयव्यतिरेकप्रतियो [redacted]
गित्वस्यप्रयोजकताप
हार्थत्वादितिभावः अभवतः असतः भवतः सतः तत्प्रयोजकत्वादितितदन्वयव्यतिरेकोन्नायकान्वयव्यतिरेकप्रतियोगित्वादित्यर्थः तथाचविषमव्याप्तेदूषकता
ते वीजसत्त्वेपिशास्त्रीयोपाधिव्यवहाराभावान्नलक्ष्यत्वमितिभावः अन्यथेतिन्यूनाधिकदेश हेरपिप्रयोजकत्वेइत्यर्थः प्रयोजकंप्रयोजकत्वंनन्यूनाधिकंननुव्याप्यत्वप
र्येतंव्याप्यत्वादितिनचैवंपक्षेतरेऽतिप्रसंगः तवापिपक्षेतरसाध्यवत्त्वाद्यावृत्तिप्रसंगादितिभावः विषमव्याप्तस्यालक्ष्यत्वेविनिगमकांतरंशंकतेनन्वितिनिर्वचनेभवितु राम॰
योभवतिनुपसमीपस्थेआदधातिस्वनिष्ठधर्मंसंक्रामयतीत्युपाधिपदव्युत्पत्तेरितिभावः स्फटिकलौहित्यंमनिलौहित्यधर्मविषयीभूतस्फटिकइत्यर्थः व्याप्यत्वेसाध्या

प्यत्वं चकास्तित्वमविषयो भवति अस्तावुपाधिः असावेव उपाधिपदवाच्यः साध्यव्याप्य एवोपाधिपदवाच्य इति यावत् नन्वेवं धूमवा × तिभावः केचित्तु व्यति
रेकिणां व्यतिरेकव्याप्त्या प्रवर्तते तदाभ्यत्वादिनापीति शेषः नचासाधारणमिति व्यतिरेकव्याप्त्या साध्यप्रतिपक्षेपि मतिबंधकमिति शेषः तस्यापि असाधार
णज्ञानस्यापि सत्प्रतिपक्षोत्थापकतयेति अन्वयसहचारग्रहप्रतिबंधकतया वेति शेषः दोषत्वादिति अनुमितावन्यव्याप्तिग्रहे प्रतिबंधकत्वादित्यर्थः
पदिग्धपक्षे वियक्षव्यावृत्तत्वमसाधारणं तदा तज्ज्ञानमुक्तक्रमेण सत्प्रतिपक्षजनकतया अनुमितावेव प्रतिबंधकं यदि चहेतोः साध्यवद्वृत्तित्वमसाधा
रणं तदा तज्ज्ञानमन्वयसहचारग्रहप्रतिबंधद्वारा अन्वयव्याप्तिग्रहप्रतिबंधकं ननु कदाचिदपि व्यतिरेकव्याप्त्या सत्प्रतिपक्षे प्रतिबंधकमिति भावः अति
व्याप्तकः ननु व्यभिचारोन्नायकतया दूषणत्वं प्रागेवमया दूषितं पदि सत्प्रतिपक्षतया दोषत्वमपि त्वया दूषितं तदा पत्रहेतुः मा व्योव्याप्तिग्राहकसा
साध्य म्यं तत्र कथमुपाधिर्दोष इत्यत आह तस्मादिति उभयोः साधनयोः साध्योपाध्योः विरोधादिति विरोधः साध्यव्याप्यत्वसाध्याव्यापकव्याप्यत्वयोः साध्य
व्यापकत्वसाध्यव्याप्याव्यापकत्वयोश्चेत्यर्थः उपाधेर्व्यभिचारशंकाधायकत्वेन दोषत्वे आचार्यसंवादमाह तदुक्तमिति उपाधेरेवेत्येवकारोभिन्नक्रमेण उपा
धेर्व्यभिचारशंकैवेत्यर्थः पक्षेतरोभयधर्मव्याप्तिग्राहकसाम्यं तत्रैवेत्याह सकलानुमानोच्छेदापत्तिभयेन परस्योपाधित्वं परैर्निरस्तातत्तदनुपेतसत्त्वपक्षाहव्य
तेवेति तव्यापीति न च विपक्षाव्यावर्तकविशेषणानवच्छिन्नेति विशेषणादानादेव नातिव्याप्तिरिति वाच्यं तथापि जन्यापारावः सकर्तृकाः कार्यत्वादित्याद
वणभिन्नत्वादेपक्षेतरः इति व्याप्तेः तत्रापि विशेषणे न विपक्षपरमाणोरपि व्यावर्त्तनादिति भावः आचार्यलक्षणं दूषयति नापीति पक्षेतरत्वं साध्यविषम

अत्र संशोधः एतत् पूर्वपत्रे सांकपृष्ठे तृतीयपंक्तौ ज्ञेयः १

चि॰टी॰ व्यापकत्वान्नोपाधिरिति भावः अवच्छिन्नसाध्यव्यापकोपाधावव्याप्तौ + नव्यहेरित्यादौ महानसत्वादेरप्युपाधिपदवाच्यत्वापत्तिरित्यत आह नचेति इष्यत
१०५ इति हृदयमर्थं तत्रपेष्यत इत्यर्थः समव्याप्त एवोपाधिरिति समव्याप्त एवोपाधिपदवाच्य इत्यर्थः उपाधिपदस्य योगरूढत्वेन तथाविधसमव्याप्तिरूढ्यर्थसत्वेऽपि योगार्थाभावा
ख दिति भावः पर्यवसितनिष्ठभ्रमविषयीभूतधर्माश्रयत्वमात्रमुपाधिपदप्रवृत्तिनिमित्तं न तु व्याप्तिरूपसंक्रामकत्वं जपाकुसुमादावभावात् तत्र विषमव्याप्तेऽपि संभवति
स्वनिष्ठसाध्यव्याप्यत्वासंक्रामकत्वेऽपि दोषवज्ज्ञातस्वनिष्ठधर्मान्तरसंक्रामकत्वसंभवात् तथाप्युपाधिपदस्य सामान्यतोऽन्यनिष्ठभ्रमविषयीभूतधर्माश्रयत्वरू
पं नैकं प्रवृत्तिनिमित्तं तादृशेन तत्र व्यापनात् परं तु विशिष्य स्फटिकनिष्ठभ्रमविषयीभूतलौहित्याश्रयत्वं साधननिष्ठभ्रमविषयीभूतसाध्यव्याप्याश्रयत्वादिरूपं
नानैव प्रवृत्तिनिमित्तं पक्षधर्मे वाचकस्तत्रत्यं तत्पदसमभिव्याहारविशेषेणोपाधिपदं प्रयु ज्यते तद्धर्मसंक्रामकत्वमेव बोधयतीति समभिव्याहारस्य प्रतीतौ नैति या
मकः॥ स्फटिकस्य लौहित्ये जपाकुसुममुपाधिरिति वाक्याल्लौहित्यरूपधर्मसंक्रामकत्वमेव प्रतीयते न तु साधनस्य साध्यव्याप्यत्वमुपाधिरित्यत्रापि स्व क
निष्ठव्याप्तिरूपसंक्रामकत्वमेव लभ्यत इति तथा च विषमव्याप्तस्य स्वनिष्ठधर्मान्तरसंक्रामकत्वेऽपि तादृशधर्मसंक्रामकत्वमादाय कुत्राप्युपाधिपदाप्रयोगात्ता
दृशधर्मान्तरसंक्रामकत्वस्योपाधिपदप्रवृत्तिनिमित्तत्वाद्विषमव्याप्तो नोपाधिपदवाच्य इत्याचार्याणामाशयः प्रवृत्तिनिमित्ताभावादिति यौगिकप्रवृत्तिनिमि
त्ताभावादित्यर्थः समव्याप्त इति स्वनिष्ठव्याप्तिसंक्रामक इत्यर्थः स्वधर्मप्रतिबिम्बेति स्वनिष्ठधर्मान्तरप्रतिबिम्बजनक एवेत्यर्थः तदभावादपीति न त्वप्युपाधि
पदस्य योगसत्वादित्यर्थः तथा च पर्यवसितयोगार्थेन रूपेण उपाधिपदवाच्यत्वं तथाविधव्यापकेऽपि केवलरूढ्यर्थमादायोपाधिपदवाच्यत्वसंभवः नहि राम॰
योगार्थविशिष्टो रूढ्यर्थः प्रवृत्तिनिमित्तिति हृदयं लौकिकव्यवहारगोचरीभूतलौकिकानामुपाधित्वरूपज्ञानार्थमित्यर्थः नुपाधिपदव्युत्पादनमिति परोक्तानुमानदूष १०५

गाधत्वादेऽत्राप्रसुपाधिरित्युपाधिपदप्रयोग इत्यर्थः अनुमानदूषकतार्थमिति उपाधित्वेन उपाधिज्ञानं हेत्वाव्याप्तिज्ञानप्रतिबंधार्थमित्यर्थः नवेति अनुमानदूष

कोपयिकरूपं चेत्यर्थः तेनैव साध्यव्यापकत्वसाधनाव्यापकत्वमात्रेणैव विषमव्याप्तस्याल्पदेशवृत्तेर्विनिगमकांतरमादायांकनेऽव्याप्तिविनिगमनाभावः घटत्वावच्छिन्ना ध्या

प्यत्व [illegible] संबंधावच्छिन्नप्रतियोगिताकाभावः साध्यव्यभिचारविरोधी साध्यव्यभिचाराभावसमनियतः साध्यव्यभिचारवृत्तिमत्ता साध्यव्यभिचाराभावव्या

पक इति यावत् स उपाधिः तद्रूपेण स उपाधिरित्यर्थः भवति चार्द्रेंधनप्रभववह्न्यादेः साध्यसमव्याप्तस्याव्याप्यतासंबंधावच्छिन्नप्रतियोगिताकाभावः आर्द्रें

धनप्रभववह्न्यादिव्याप्यमात्रनिष्ठत्वपाधूमादिव्यभिचाराभावसमनियतः आर्द्रेंधनादेः साध्यविषमव्याप्तस्याव्याप्यतासंबंधावच्छिन्नाभावत्वेन तथात्वमार्द्रेंधनाद्य

वपि सत्त्वेन तत्र साध्यव्यभिचाराभावासत्त्वादिति भावः अत्र पदाभावस्य उपाधितावच्छेदकसंबंधावच्छिन्नयदभावपरत्वे आर्द्रेंधनप्रभववह्न्यादावव्याप्तिः सा

मान्यतो घटाभावस्य द्रव्यं पृथिवीत्वात् सत्त्वादित्यादौ स्वरूपसंबंधेन साध्यव्यभिचारित्वादेरुपाधितापत्तिः स्वरूपसंबंधेन तदभावस्यापि साध्यव्यभिचारविरो

ध्य धित्वात् तः प्रतियोगिताकांतेऽभावविशेषणं साध्यव्यभिचारविरोधित्वपदेन च साध्यव्यभिचारवृत्तित्वमात्रोक्तौ वह्निमान् धूमादित्यादौ महानसत्वादावति

व्याप्तिः अव्याप्यत्वसंबंधावच्छिन्नमहानसत्वाभावस्य महानसत्वव्याप्यमात्रनिष्ठस्य वह्निव्यभिचारवृत्तित्वात् साध्यव्यभिचाराभावव्यापकत्वमात्रोक्तौ धू

मवान् वह्नेरित्यादौ विषमव्यापके आर्द्रेंधनादावतिव्याप्तिः साध्यव्यभिचाराभाववह्नौ तुक्तावपि तथा वह्निमान् धूमादित्यादौ महानसत्वादावतिव्याप्तिरत अ

तः साध्यव्यभिचारित्वाभावसमनियतत्वपर्यंतं घटत्वावच्छिन्नाव्याप्यत्वं साध्यव्यभिचारित्वं च विशेषणताविशेषसंबंधेन बोध्यं नन्वविशेषणताविशेषसंबंधे

न घटत्वावच्छिन्नवद् [illegible] न्यवृत्तित्वं साध्यतावच्छेदकावच्छिन्नसाध्याभाववति विशेषणताविशेषेणावर्तमानत्वे च न तु हेतुतावच्छेदकसंबंधेन वक्तव्यं धूमवान् वह्ने

चि·टी·
१०६

रित्यादौ धूमवत्सामान्यान्यतरत्वादौ विषमव्यापकेऽतिव्याप्त्यापत्तेः धूमवत्सामान्यान्यतरत्वा संयुक्तत्वस्यापि असंयुक्तधूमवन्मात्रसंयुक्तोभयमात्रनिष्ठान्यताधूमा
भावयुक्तसंयुक्तत्वाभावसमनियतत्वात् न च तथापि वह्निमान्धूमादित्यादौ वह्निसामान्यादौ साधनव्यापकेऽतिव्याप्तिः अव्याप्यत्वसंबंधेन तदभावस्यापि वह्निव्यभि
चाराभावसमनियतत्वात् न च साधनाधिकरणवृत्तित्वेन यदभावो विशेषणीय इति वाच्यं धूमवान्वह्नेरित्यादावार्द्रेन्धनप्रभववह्न्यादावव्याप्तेः विशेषणतानविशेषसं
बंधेनार्द्रेन्धनप्रभववह्निमदन्यवृत्तित्वरूपस्यार्द्रेन्धनप्रभववह्न्यव्याप्यत्वस्यासत्त्वे न तत्संबंधावच्छिन्नार्द्रेन्धनप्रभववह्न्यभावस्य साधनीभूतवह्निवृत्तित्वात् यदिव्या
व्याप्यत्वं व्याप्यताभावोऽव्याप्यत्वं च विशेषणतानविशेषेणान्यदन्यावृत्तित्वमिति विशेषणतानविशेषेणान्यवृत्तित्वेन तत्संबंधावच्छिन्नार्द्रेन्धनप्रभववह्न्यभाव स्य
न वह्निवृत्तित्वमिति च नैवं सति वह्निसामग्र्यादावतिव्याप्तिर्दुर्वारा तादृशाव्याप्यत्वसंबंधावच्छिन्नवह्निसामग्र्यभावस्यापि साधनीभूतधूमावृत्तित्वादिति येन साधनाधि
करणा वृत्तित्वेन यदभावविशेषणादिति संक्षेपः अभावः अव्याप्यत्वसंबंधावच्छिन्नाभावः तस्याभावे यदीति तस्या व्याप्यतासंबंधेनाभावसत्त्वेऽपीत्यर्थः।
व्यभिचारान्न साध्यव्यभिचारसत्त्वात् एतदेव व्याचष्टे अनित्यो गुणत्वादित्यादौ विषमव्यापके प्रमेयत्वे याह यतीति व्यापकेति भवतीत्यर्थः अनित्यत्व
व्यापकं अनित्यत्वविषमव्यापकं प्रमेयत्वं अनित्यगुणवृत्तिप्रमाविशेष्यत्वं तद्व्याप्यं चेति अव्याप्यतासंबंधेन तदभाववत्त्वेत्यर्थः। न चानित्यत्वगुण
त्वयोरिति न च गुणत्वेऽनित्यत्वव्यभिचाराभावोऽस्तीत्यर्थः प्रमेयत्वमिति यथाश्रुतं तु न संगच्छते नहि दृश्यावृत्तित्वस्यैव लाघवादनुगतत्वाच्चावघटकत्
याकेवलान्वयिनः प्रमेयत्वस्य तदप्रसिद्धेः न च तथापि न च गुणत्वेऽनित्यत्वव्यभिचाराभावोऽस्तीत्यसंगतं विशेषणतानविशेषसंबंधेन साध्यव्यभिचारस्यै
वत्वस्याघटकतया गुणत्वजातौ तादृशानित्यत्वव्यभिचाराभावसत्त्वादिति वाच्यं गुणान्यदस्य गुणपदवाच्यत्वपरत्वादिति ध्येयं व्यतिरेकः अव्याप्यतासं

राम

वंधावच्छिन्नप्रतियोगिताकव्यतिरेकः तथासाध्याव्यभिचाराभावएमनिपतः। साध्यव्यापकेति। साध्यव्यापकं सधनं साध्यव्याप्यभूतं न स। साध्यस
व्याप्तस्येतियावत् व्याप्यं अव्याप्यतासंबंधेनाभाववत् ननुयदिसाध्यसमव्याप्तस्यैवोपाधित्वं तदाव्य चारेचावश्यमुपाधिरितिभज्येतनहिसर्वत्रव्यभि
चारिणिसाध्यसमव्याप्तेन स्थातव्यमित्यतआह व्यभिचारेचेति अंततनत्त्वमनेन साध्यसामग्र्यादीनां बहूनामेवोपाधित्वं संभवतीतिसूचितं ननुखलि ना
नस्वव्यापकत्वाभावात् कथं साध्यस्योपाधित्वमित्यतआह। अभेदेपीति। साध्यव्यभिचारविरोधित्वं साध्यव्यभिचाराभावव्याप्यत्वमात्रमितियथाश्रुता
भिप्रायेण साध्याव्यापकेमहानसत्वादावतिव्याप्तिमाह। तथापीति। अव्यभिचाराभावेषु ह्यर्थेषु समेषु। साध्यव्याप्यस्य महानसत्वादेः व्याप्यतासंबंधे
नाभावोपीत्यर्थः तद्व्याप्यं व्यावर्तकत्वादिति साध्यव्याप्यस्य महानसत्वादेः व्याप्यतासंबंधेनाभाववति साध्यव्यभिचाराभावस्यावर्तकत्वादित्यर्थः व्या
प्यवावृत्तेति अर्थविशेषणानारहितत्वादित्यर्थः। इदं च वक्ष्यमाणविशेषणानास्थले व्याप्तिरेव न तिष्ठतीति प्राचीनमतानुरोधेन साध्यव्यापकव्याप्यत्वमपीति। अव्या
प्यतासंबंधेन साध्यव्यापकस्याभाववदित्यर्थः। दर्शितत्वादिति। अस्तिहीत्यादिना दर्शितत्वादित्यर्थः तथा च भवन्मतेविश मव्यापकेऽतिव्याप्तिविरहेपि महा
नसत्वादावतिव्याप्तिः स्फुटैवेतिभावः ननु भवतु साध्याव्यापकोपि महानसत्वादिकमुपाधिः को दोषः तर्हि सद्धेतावपि सोपाधित्वापत्तिरिति चेन्नहि
यत्किंचिदुपाधिमत्त्वेनैव सोपाधिता किंतु यत्किंचित्साध्यव्याप्यत्वमेवानौपाधिकत्वं इति साध्यव्याप्यव्याप्यत्वसामान्याभावएव सोपाधित्वमित्यतआह
नचेति साध्यव्याप्यत्वं यत्किंचित्साध्यव्याप्यव्याप्यत्वं तथा च यथाश्रुतमनौपाधिकत्वं तदा उक्तस्वरूपं सोपाधित्वं स्यात् नचैवमितिभावः साध्यव्यापकव्या
मितस्यहीति साध्यव्याप्तिग्राहकमितिशेषः नन्वेवमनौपाधिकत्वं व्याप्तिग्रहेतत्रैतेमेवनस्यात् नतिसाध्यव्यापकव्याप्यत्वं तत्र अतिप्रसंगादित्यतआह यन्नो

चि-टी
१०८

पाधिकत्वमितिव्याप्तिलक्षणेव्याप्तिग्राहके साध्यव्यापकत्वे साध्यव्यापके क्वचिन्नपेयेवपाठः [illegible]नौपाधिकत्वज्ञानं न व्याप्तिधीहेतुर्येनानवस्था स्यात् किंच साध्य
व्यभिचाराभावसमनियतत्वमेव विवक्षितमिति नातिव्याप्तिरित्यस्वरसादाह। किंचेति यस्मिन्सतीति यद्धर्मविशिष्टे यस्मिन्सतीत्यर्थः अनुमितिर्नभव
तीति साधनेऽनुमितिप्रयोजकं रूपं व्याप्तिपक्षधर्मतान्यतरन्नतिष्ठतीत्यर्थः तदेव दूषणमिति। तद्वृत्तित्वेव दूषकताबीजमित्यर्थः तथाच साध्यव्यापक
ताविशिष्टे साधनाव्यापकत्वसत्त्वेपि हेतौ साध्यव्याप्यसत्त्वात् साध्यव्यापकत्वविशिष्टे साधनाव्यापकत्वस्यापि दूषकताबीजाक्रान्तत्वेन न ह्यादुष्टत्वान्न्ने
दं लक्षणमिति भावः ननु यद्धर्मविशिष्टे य व्यतिरेकेणाहेतौ व्याप्तिपक्षधर्मतान्यतरन्नतिष्ठति तद्धर्मविशिष्टेन द्धर्मवत्त्वमेव दूषकताबीजं एवंच साध्यस
मव्याप्तत्वविशिष्टे साधनाव्यापकत्वव्यतिरेके साधने साध्यव्याप्तेरावश्यकत्वात् साध्यसमव्याप्ते साधनाव्यापकत्वं दूषणं न तु साध्यव्यापकत्वविशिष्टे सा
धनाव्यापकत्वं साध्यव्यापकत्वविशिष्टे क्वचित्साधनाव्यापकविरहेपि हेतौ व्याप्यसत्त्वान्नङ्गत आह नत्विति यद्व्यतिरेके यद्धर्मविशिष्टे यद्व्यतिरेके
भवतेव हेतौ व्याप्तिपक्षधर्मतान्यतरन्निष्ठत्येवं यत्तद्धर्ममिति दूषकताबीजसत्त्वे नियामकमिति शेषः। विरुद्धत्वादेरिति हेतुतावच्छेदकविशिष्टे साध्या
सामानाधिकरण्यादेरित्यर्थः साध्यासामानाधिकरण्याभावस्य व्यभिचारिण्यपि सत्त्वादिति भावः आदिना सपक्षविपक्षगामित्वपरिग्रहः। साधनाव
च्छिन्नेति। काकः श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तेरित्यर्थः ननु सः श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वे ध्वंसो विनाशी
जन्यत्वादित्यत्र भावत्वे चाव्याप्तिः तत्र साधनस्यापि पक्षधर्मतयाऽव्याप्यभावात् [illegible]मुपलक्षणं पर्वतो वह्निमान् धूमादित्यादौ पर्वतीयवह्न्यादावतिव्याप्तिर रामः
त्यपि द्रष्टव्यं। ज्ञानातिव्याप्तिमाह। शब्द इति उपाधित्वापाताच्चेति। उपाधित्वेन ज्ञानापाताच्चेत्यर्थः पक्षे साध्याव्यापकत्वापातन्निर्णेनिरसाबात् तदेव आह यतिः आ

धर्मत्वं तितयत्रूपावच्छिन्नत्वमितिशेषः व्यापकोऽव्यापकत्वेननिश्चितं अव्यापकं अव्यापकत्वेननिश्चितं नचपक्षेव्यभिचारज्ञानसत्त्वेनकथंतद्रूपावच्छे
साध्यव्यापकत्वनिश्चयइतिवाच्यं संदिग्धसाध्यकपक्षस्थानुपाधिमात्रस्यसाध्यव्यापकत्वमात्रोच्छेदापत्त्यापक्षीयसाध्यसंदेहादितव्यभिचारसंदेहस्यसा
ध्यव्यापकतानिश्चयाप्रतिबंधित्वादितिभावः ननुतथाज्ञानेऽनैशायांतस्यापिदोषत्वमस्त्वेवेतितस्यतथाज्ञानंनदोषायेत्यस्वरसादाह आर्द्रेंधनेति य
द्यपितत्रापिद्रव्यत्वपर्वतत्वादिरेवतादृशोधर्मः संभवति नचविशेषणतयाद्रव्यत्वादिकंनधूमादिनिष्ठार्द्रेंधनादिव्याप्यतावच्छेदकमितिवाच्यंतस्य
व्याप्यतावच्छेदकत्वेपितद्विशिष्टसाध्यसमानाधिकरणात्यंताभावप्रतियोगित्वरूपव्यापकतायाआर्द्रेंधनादावनपायात्तेनव्याप्तिपक्षनिष्ठतत्तादृशधर्मा
भावात् आर्द्रेंधनादौव्यवह्निसाध्यव्यापकताग्रहकालेतद्रूपपक्षधर्मविशिष्टव्यापकाग्रहोभवतितादृशपक्षवृत्तिधर्माभावादित्यर्थः तथाचयदार्द्रेंधनादोपक्षवृत्तिध
र्मावच्छिन्नसाध्यव्यापकताग्रहोनास्तिशुद्धसाध्यव्यापकताग्रहमात्रंवर्तते तदापिव्याप्तिग्रहप्रतिबंधानज्ञानाव्याप्तिरितिभावः। केचित्तुतत्रपक्षधर्मपदेनप
क्षवृत्तिधर्ममात्रमुक्तं किंवापक्षमात्रवृत्तिधर्मः आद्येज्ञानातिव्याप्तिमाहशब्देति अंत्येवस्तुव्याप्तिमाह आर्द्रेति हृदोधूमवान्वह्नेरित्यादौआर्द्रेंधनाद
व्याप्तिरित्यर्थः आदिनावायुःप्रत्यक्षउत्पन्नोद्भूतरूपादिपरिग्रहः अतएवपक्षनिर्णीतेतु ... नचेदंसर्वकलशेषुपृथ्वीधिः संभवति जन्यत्वस्यापि
पक्षधर्मत्वादित्याह श्यामत्वउत्पत्त्यादिमित्रातनयत्वेनकाकादौश्यामत्वसाधनेउत्पर्थः विरुद्धस्थलीयोपाधावव्याप्तिसत्त्वेपिस्फुटत्वान्नदुपेक्ष्यपक्षधर्मान्तर
व माह पक्षधर्मेतिवायुःप्रत्यक्षः प्रमेयत्वादित्यादावुद्भूतरूपवत्त्वादौव्याप्तिरित्यर्थः ननुवायुःप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावुद्भूतरूपवत्त्वादाविमर्षः
तत्रसाधनीभूतप्रत्यक्षस्पर्शाश्रयत्वावच्छिन्नसाध्यव्यापकत्वस्यापिसत्त्वेनाव्याप्त्यभावादितिद्रष्टव्यं। इदंचज्ञानातिव्याप्तिमाह ... मिति ... धित्वप्रसंगे
ल

चि.टी. पाधित्वतानवसंगात् पक्षे साध्याव्यापकतया वस्तुतिव्याप्तेरभावात् ननु अत्रापि तथात्वानदृत्नायां न स्यापि दोषत्वमस्त्येवेति तत्र स्पष्टतया ज्ञानेन दोषायेत्यत आह सोपाधि
त्वादिति वह्निमत्त्वं धूमासाधकं सोपाधित्वादित्यत्रासाधकत्वानुमाने इत्यर्थः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वरूपेण वह्न्यवच्छिन्नधूमव्यापकव्यभिचारि
रा त्वरूपे सोपाधित्वे हेताविस्यर्थः साधनावच्छिन्नेत्यस्येति वह्न्यवच्छिन्नधूमव्यापकव्यभिचारित्वं वह्न्यवच्छिन्नधूमव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिता
काभाववद्वृत्तित्वं वह्न्यवच्छिन्नसधूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वमिति यावत् तत्र वह्न्यवच्छिन्न
का धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावयोर्भेदाभावे। न वह्न्यवच्छिन्नेत्यस्य वैयर्थ्यप्रसंगात् इत्यर्थः ननु तादृशाभावयोर्भे
दाभावेपि यथासंनिवेशेन वैयर्थ्य [illegible] मान वापि साध्यव्यापकव्यभिचारित्वादित्यत्र साध्यव्यापकेति व्यर्थं साध्यव्यभिचारित्वमात्रस्यैव सम्यक्त्वात् साधना
वच्छेदकावच्छिन्नप्रतियोगिताकाभावस्यापि साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावतया तस्यापि व्यापकव्यभिचारित्वघटकत्वात् [illegible]।
आर्द्रेन्धनाव्याप्यत्वादित्यादेर्प्रातिस्विकरूपेणैवासाधकत्वं साध्यते ननु सामान्यतः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेनैतिह्यवैयर्थ्यसंभावः नात्र स
स्वरसादाह किं चेति [illegible] ह्यपीति तल्लक्षणाद्वयेपीत्यर्थः। साधकत्वेति उपाधिव्यभिचारेण वा साध्यघित्वेत्यर्थः। साधनीयस्तितिविशेषणाव्यभि
चारित्वे सति विशिष्टसाध्यव्यभिचारित्वेन विशेषणाभावत्वे सति विशिष्टसाध्याभाववत्त्वेन वा हेतु [illegible] नासाधनीयइत्यर्थः। उपाधेः शुद्धसाध्यव्यापकतात्वाना
भावेन तद्व्यभिचारेण तदभावेन वा शुद्धसाध्यव्यभिचारस्य शुद्धसाध्यव्यतिरेकस्य वा साधनासंभवात् अनुकूलतर्कविरहादिति भावः। परंपरया अनुकूलतोपयो रा.म.
गि नार्थान्तरमित्याशंकते अथेति 'अव्याप्तकालत्वादिति पृथगसविशिष्टसाध्यव्यभिचारस्याभिधानादित्यर्थः प्रभाकरोपाध्यायमतं शंकते। प्रथमेति उद्भाव्यः विशेष

९८ णाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारित्वेन साधनीयः । तत्रासिद्धिर्विनि । तत्र विशिष्टसाध्यव्यभिचारोऽसिद्धः पुनरुद्भाविताया तत्सिद्धये उपाधिरुद्भाव्य इत्यर्थः ।
प्रकृतेति प्रकृतानुमानविरोधिविरुद्धसाध्यव्यभिचारसाधकत्वादिति भावः । ननु विशिष्टसाध्यव्यापकत्वज्ञानेनापि विशेषणावति उपाधिव्यभिचारित्वेन हेतुना
रुद्धसाध्यव्यभिचारानुमानं संभवति विशेषणावति विशिष्टसाध्यव्यापकव्यभिचारित्वे विशेष्यव्यभिचारित्वस्यावश्यकत्वात् इत्यत आह किं चेति पक्षधर्मे
ति साधनस्याप्युपलक्षणं पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकस्योपाधेर्व्यभिचार एवोपन्यसितुमुचित इत्यर्थः नोपाधिः न केवलोपाधिः न चेष्टापत्तिः कथ
कसंप्रदायविरोधादिह हेतावुपाधिः अयं हेतुः सोपाधिरित्येव सकलनैयायिकैरुद्भावनादिति भावः उक्तं च दूषणं सर्वत्रैव बोध्यं न केवलमिह यद्यपि व्य
भिचारितादिसंबंधे नोपाधिरपि साक्षाद्धेतुः संभवति न व्याप्यस्य समाधानस्य प्रहेति कृत्वा ग्रंथकृतैवाग्रे स्वयं वक्ष्यमाणत्वान्नासंगतिः व्यभिचारितादिसंबंध
स्य दूषणनियामकतया न व्याप्यतावच्छेदकत्वमित्यभिमानेनेदमित्यपि केचित् रत्नकोशकारलक्षणमाशंक्य तन्मते तदिति एतल्लक्षणापेक्षया सत्वेति पक्षोत्रा
पकत्वं दूषकताबीजम् एवं साधनाव्यापकत्वविशिष्टं सत् लक्ष्यतानियामकं न तु व्यभिचारोन्नायकं पक्षधर्मतावलम्बनव्यभिचारस्ताज्ञस्य प्रकृतानुमा
नमूलभूतसाध्यतावच्छेदकावच्छिन्नसाध्यव्याप्तिज्ञानाविरोधितयाऽकिंचित्करत्वादिति ध्येयं अनित्यत्वादिरिति अनित्यत्वातिरिक्तो यः शब्दधर्म
स्तद्व्यतिरिक्तो यो धर्मस्तद्वत्त्वमित्यर्थः एवमपि न घटसाध्यमनित्यत्वमिति अनित्यत्वातिरिक्तो यः शब्दधर्मस्तद्व्यतिरिक्तं विशिष्टाभाववत्त्वानुमयं शब्दत्वम
तिरिक्तं घटत्वादिकमनित्यत्वं च अथवे बाधादनित्यत्वस्यैव पक्षधर्मताबलेन सिद्धत्वादिति भावः न साध्यव्यापकमिति शुद्धसाध्यस्य केवलान्वयितया तद्व्यापक

चि॰टी॰ त्वासंभवादितिभावः नचेदं सदनुमानमेवेतिकथमत्रोपाधिरितिवाच्यं मीमांसकमतेनाभिधानात् तैः शब्दस्यनित्यत्वांगीकारात् [illegible]नावद्य एव पक्षस्त
१०९ परंतथाप्यनावद्यत्वं अनित्यत्वातिरिक्तशब्दत्वधर्मातिरिक्तधर्मवत् प्रमेयत्वादित्यत्रैवेत्यर्थः उदाहरणांतरमाह प्रहरिवेति तथैवेति शब्दत्वं कृतकत्वातिरि-
क्तशब्दधर्मातिरिक्तधर्मवत् प्रमेयत्वादित्यत्रैवेत्यर्थः तदाऽनित्यत्वमिति पक्षधर्मताबललभ्यस्य कृतकत्वव्यापकत्वादितिभावः नचैवं पर्वतो
वह्निमान् धूमादित्यादौ पर्वतीयवह्निव्यापकत्वात् पर्वतत्वं पाषाणमयत्वादावतिव्याप्तिरितिवाच्यं पक्षावृत्तित्वे सतीत्यनेन विशेषणीयत्वादितिहृदयं पक्ष-
ले धर्मताबललभ्यसाध्यव्यापकस्योपाधित्वे शंकासंवादमाह तदुक्तमिति वायुक्तसाध्येति वायुक्तसाध्यसाधनतावच्छेदकावच्छिन्नसाध्यमेवतन्नियमत्युपलक्षितव्याप-
कता[redacted]रहितोपि [illegible]वसितं नियमेप्युपाधिः पक्षधर्मताबललभ्यं व्याप्यीकुर्वन्नुपाधिः कथं केन दूष्यमित्यर्थः उद्भावने हेतु-
माह दूषकतेति एतत्रितयपक्षोन्नायकत्वस्य हेतुतावीजस्यसत्त्वादित्यर्थः एवं हीत्यादिपक्षधर्मताबलेननित्यद्रव्यसमवेतत्वसिद्धये असमवेतत्वद्रव्यासमवेत-
त्वयोर्वैधर्म्यनिराकरणाय सावयवत्वमिति द्रव्यसमवायिकारणत्वेसिद्धेरित्यर्थः जन्यमत्वेति अत्र द्रव्यत्वमात्रस्य हेतुत्वे घटादौ व्यभिचारः तन्नाधिकरणांतं
तावन्मात्रोपादानेरूपादौ व्यभिचार इति द्रव्यत्वोपादानं जन्यानधिकरणद्रव्यत्वस्याप्रसिद्धत्वान्मतत्वेति परमाणुसर्वसिद्धेरणाद्यमाकाशादौ अन्यथाव्याप्तियत्वप-
क्षमेवेति असंभावत्वादत्र नैवेयपक्ष्यमितिशेषं उपाधिः स्यादिति उपाधित्वेनहानतः स्यादित्यर्थः पक्षेपर्यवसितसाध्याव्यापकत्वेन वस्तुतिव्याप्तेरभावात् अत्रै-
समवेतत्वमात्रस्यपक्षावृत्तित्वात् तनिः स्पर्शवद्द्रव्येतिपर्यवसितसाध्यसमव्याप्त एवोपाधिरितिपरिहृत्य अतिव्याप्तिरितिप्रहर्ष नामपरद्रव्येति [illegible]स्यव्यापकमि- १२०
ति पक्षातिरिक्तेतस्यव्यापकत्वपाठे हीनमित्यर्थः ननु भवन्मतेपिस्पर्शवद्समवेतत्वस्योपाधित्वेनहानापत्तिः पक्षातिरिक्तेत्युक्तसाध्यव्यापकताहानसंभवात् पक्षेसा-

धेनाव्यापकत्वात्तानसंभवाच्च यदि चावयवानवस्थाप्रसंगरूपविपक्षबाधकतर्केणाकस्यचिन्निरवयवस्यैवतः सिद्धौ तत्समवेतद्रव्ये साध्याव्यापकत्वं ताना
न्नतथा तहामन्माप्तितुल्यं सिद्धप्रकृतेनित्यद्रव्यसमवेतत्वं पक्षधर्मतावललभ्यमेव न भवतीत्यभावमात्रगतेनानित्यद्रव्यसमवेतत्वाभाववत्त्वेन साध्यतावच्छेदके
ले न चानाक्रांतत्वादित्य स्वरसात्हरिकिं चेति पक्षधर्मतावललभ्येति पक्षधर्मतावललभ्यायाः साध्यव्यक्तेः सिद्धाविसर्थः निष्फल उपाधिरिति निष्फलं उपाधित्वेन ता
नमित्यर्थः कस्य व्यापक इति कस्य व्यापकत्वेनाग्रहीत इत्यर्थः तज्ज्ञानं विनातद्व्यापकत्वग्रहायोगादिति भावः अनुप्रकृतानुमानेन तद्ग्रहीत्वा उपाधौ तद्व्यापक
त्वग्रहो यदि तर्हि वीसिद्ध्यसिद्धि व्याघातः किंतु अनुमानांतरात् प्रमाणांतरेणावा तद्ग्रहीत्वा उपाधौ तद्व्यापकत्वग्रहः स्यादिमत आह नहीति नैवेसर्थः सोपाधौ
सोपाधित्वेन ज्ञाते । यस्य व्यापक इति तथा च सोपाधौ साध्यस्य पक्षधर्मतावललभ्यं त्वमेवासिद्धमिति ... भावः अनुपलक्षणं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्र
यत्वादित्यादावुद्भूतरूपवत्त्वादावव्याप्तिश्च नहि तत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादिकं पक्षधर्मतावललभ्यं । तेन च पक्षधर्मतावललभ्यत्वं यत्किंचित्प
सकस्यचित्पक्षधर्मतावललभ्यत्वं वक्तव्यं ... द्भूतरूपवत्त्वादावपि नाव्याप्तिः विशिष्टे लाघवज्ञानादिसहकारेणा बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादेरपि
कदाचित्पक्षधर्मतावललभ्यत्वं तिष्ठतीति वाच्यं धूमाद्यनुमाने महानसत्वादेरप्युपाधितापत्तेः महानसीयवह्न्यादेरपि कदाचित्पक्षधर्मतावललभ्यत्वेन त
द्व्यापकत्वादिमालां विस्तारः ॥ उपाधिलक्षणाद्यवपक्षरहस्यं ॥ प्रथमतो लक्ष्यतानियामकं लक्ष्यतावच्छेदकं निर्वक्ति पर्यवसितेति अस्य लक्षणरूपत्वे लक्षणांति
तृ व्याप्तिमर्थं व्यासंगतेः यद्व्यभिचारित्वेन सत्त्व महार्थे ... तौ यो साधनस्य साधने समनूमर्थ्ये ... विधानात् साध्यव्यभिचारित्वमिति निर्वर्तत इति दोषः तथा च व्य
व्यभिचारित्वविशिष्टं साध्यव्यभिचारित्वं साधनवृत्तिस्थ उपाधिरिति यथाश्रुतोऽर्थः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् प्रमेयत्वादिसाधो विशिष्टसाध्य

११०

सि.टी.
३१

व्यापकोपाधीनां उद्भूतरूपवत्त्वादीनां व्यभिचारित्वेन विशिष्टसाध्यव्यभिचारित्वमपि साधनवृत्तिमत्त्वमेवेति न तत्राव्याप्तिः वह्निमान् धूमात् द्रव्यं पृथिवी
त्वादित्यादिसद्धेतौ साध्यव्यापके वह्निसामग्रीमत्त्वगुणवत्त्वादावतिव्याप्तिवारणाय साधनवृत्तित्वप्रवेशः साधनपदं च साधनतावच्छेदकावच्छिन्नाधिकरण..त्व
परं तेन द्रव्यं विशिष्टसत्त्वादित्यादौ विशिष्टसत्तानतिरिक्तत्वेपि न गुणवत्त्वादावतिव्याप्तिः वह्निमान् धूमादित्यादौ द्रव्यं पृथिवीत्वादित्यादौ च सद्धेतौ साध्यव्याप्यस
महानसत्वघटत्वादेर्वारणाय साध्यव्यभिचारित्वप्रवेशः । यत्सामानाधिकरण्यविशिष्टं साध्यव्यभिचारित्वमित्युक्तौ धूमवान् वह्नेः रूपवान् द्रव्यत्वादित्यादौ सा
धनव्यापके वह्निसामग्रीमत्त्वद्रव्यत्वादावतिव्याप्तिरतो यद्व्यभिचारित्वविशिष्टमिति यद्व्यभिचारित्वं साध्यव्यभिचारित्वं च साधनतावच्छेदकावच्छिन्नाधिक
रण इतीत्युक्तौ पर्वतो धूमवान् वह्नेरित्यादौ पर्वतेतरत्वमहानसेतरत्वादेरिदं गुरु रूपादित्यादौ पृथिवीत्वाभावघटत्वाभावादेश्च उपाधितापत्तिरतो विशि
ष्टत्वप्रवेशः तेषां व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वं च न कुत्रापि हेतुव्यक्तौ तदधिकरणताव्यक्तौ वेति सुहासः क्लृप्ततत्तद्वह्नित्वतत्तद्रूपत्वाद्यवच्छि
न्नाधिकरणतयैव वह्नित्वरूपत्वाद्यवच्छिन्नाधिकरणतानुपपत्तौ सकलवह्न्यधिकरणरूपाधिकरणसाधारणातिरिक्तैकतदवच्छिन्नाधिकरणा
त्वकल्पने गौरवात् मानाभावाच्च अत एव रूपवान् द्रव्यत्वात् द्रव्यं सत्वादित्यादावपि पृथिवीत्वाभावघटत्वाभावादौ नातिव्याप्तिः हेतौ पृथिवीत्वाभा
वादिव्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वसत्त्वेपि कुत्रापि हेत्वधिकरणताव्यक्तौ तद्विशिष्टसाध्यव्यभिचारित्वविरहात् अत एव एतन्मते पृथिवीत्वजलत्वा
दिविशिष्टद्रव्यत्वसत्तात्वाद्यवच्छिन्नाधिकरणता न घटगुणादिद्वयसाधारणातिरिक्तैकसत्तात्वाद्यवच्छिन्नाधिकरणतायाश्च कल्पने गौरवान्मानाभावाच्च राम
अयं च यद्धर्मावच्छिन्नव्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वाधिकरणं साधनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वं साध्यसमानाधिकरणवृत्तितद्धर्मवत्त्वे

मितिनिष्कर्षः येन धूमवान्वह्नेरित्यादौ आर्द्रेन्धनं न द्रव्यत्वादिरूपेणोपाधिः धूमवान्वह्नेरित्यादौ विरुद्धमजलत्वादेरुपाधितावारणायोक्तं तत्त
द्धर्मविशेषणं साध्याधिकरणानानिष्ठाधारतानिरूपिताधेयतावच्छेदकत्वं तदर्थः तेन द्रव्यत्वप्रमेयत्वादिना द्रव्यानन्तवविशिष्टसत्वं द्रव्यसत्वादिना तद्रूप हे मे
विशिष्टगुणभेदस्यानोपाधिः। यद्धर्मावच्छिन्नव्यभिचारित्वं तद्धर्मावच्छिन्नवस्तुसमवृत्तित्वं। यद्धर्मावच्छिन्नाभावीयानिरवच्छिन्नाधिकरणताववृत्तित्वं
वातेन गंधवान् द्रव्यत्वादित्यादौ साधनव्यापके संयोगादौ नातिव्याप्तिः। द्रव्यत्वाभाववान् सत्वादित्यत्र स्वाभाववद्वृत्तित्वरूपस्वव्यभिचारित्वे न हेतौ साध्यव्य
भिचारानुमानसमर्थोऽपि संयोगाभावादिर्न ग्राह्यः वक्ष्यमाणलक्षणानाक्रान्तत्वादतो नातिव्याप्तिः। न च तथापि धूमवान्वह्नेरित्यादौ साध्यव्याप्यमहा
नसत्वादावतिव्याप्तिः तद्व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वस्यापि हेत्वधिकरणानावृत्तित्वादिति वाच्यं तन्नतत्सत्त्वलक्षणत्वात् महानसीयसंयोगेन का
न्ततरत्वावच्छिन्नधूमव्यापकत्वे सति तदवच्छिन्नवह्न्यव्यापकत्वेन वक्ष्यमाणलक्षणाक्रान्तत्वात् सर्वसाध्यसमानाधिकरणाः सदुपाधयः हे [illegible] का तो
न्येषे यात्साध्यव्यभिचारितेति सिद्धान्तात्। स्वव्यभिचारिता साध्यव्यभिचारिता च एकाश्रये। एकस्मिन्नधिकरणे हेतावित्ति तद्ब्रुवाणार्थः
एकस्मिन्नधिकरणेऽनुपादानात् पर्वतो धूमवान्वह्नेरित्यादौ यत्पर्वतेतरत्वमहानसेतरत्वादौ रद्गुरुरूपादित्यादौ पृथिवीत्वाभावघटत्वाभावादेश्च न सं
ग्रहः न च तत्र तेषामपि संग्राह्यत्वमस्त्विति वाच्यं व्याप्तिपक्षधर्मतयोरेकतरभंगमावश्यकतया तद्व्यभिचारित्वेन विशेषितेन साध्यव्यभिचारानुमानासं
भवात् रूपवान्द्रव्यत्वात् द्रव्यं सत्त्वादित्यादेरपि पृथिवीत्वाभावघटत्वाभावादेर्न संग्राह्यः जलसमवेतत्वादिविशेषितेन तद्व्यभिचारित्वेन तत्र साध्यव्यभिचा
रानुमानसंभवेऽपि तद्व्यभिचारित्वसाध्यव्यभिचारित्वयोरेकस्मिन्नधिकरणे हेतावसंभवात् तत्र उपाधित्वसोपाधित्वयोर्पाधायादिसकलतांत्रिकसंमतत्वाच्चे

१११ २२

सि॰टी॰ तिसर्वं च तु रस्तं केचित्तु हेतोरेकाश्रये हेतुरूपे एकस्मिन्नधिकरणे एकसांहेतुव्यक्तावितियावत् तेन रूपवान्द्रव्यत्वात् द्रव्यं सत्वादित्यादौ पृथिवीत्वाभा

५० वच्छ त्वाभावादिरूपिसंग्राह्यः इदं गुणरूपादि त्यादौ तु न संग्राह्यः एकस्या एव वह्निव्यक्तेरयोगोलकपर्वताद्युभयवृत्तित्वसंभवे धूमवान्वह्नेरित्यादौ पर्वतेतरत्वस

हानमेतरत्वादिरूपिसंग्राह्यः वक्ष्यमाणलक्षणस्य तत्राव्याप्तिरिति वाच्यं तल्लक्षणस्यापि तत्साधारणान्यायाश्रये व्याप्यव्यापकान्तत्वात् कथं तत्रेति वांसं

यांहते श्चाधेयव्यक्तेरेकत्वे प्युक्तपुर्कंऽधिकरणव्यक्तिभेदेनाधिकरणताव्यक्तिभेदात्तद्घटकतल्लक्ष्यतावच्छेदकस्य तत्राव्याप्त्यापत्तिरुक्तयुक्त्या नाद

रूपत्वावच्छिन्नस्याप्युक्तविशेषणस्य कल्रूपाधिकरणसाधारणस्यैकस्यप्रयुक्तत्वादिदं गुणरूपादित्यादौ पृथिवीत्वाभावादावतिव्याप्तिः न च

तद्लक्ष्यतायाः सर्वसंमतत्वादिति वाच्यं यद्व्यभिचारित्वेन यन्निष्ठव्यापकताकत्वेन सहसाधनस्यसाध्यतावच्छेदकावच्छिन्नेसाधने साध्यव्यभिचा

रित्वं साध्यनिष्ठव्यापकताकत्वं वर्तते स उपाधिरित्यर्थः तथा च साधनतावच्छेदकावच्छिन्नयत्साधनव्यक्त्यव्यापकतावच्छेदको यो धर्मः साध्यसमाना

धिकरणवृत्ति तद्धर्मवत्वमुपाधित्वमिति फलितमिति न कोपि दोष इत्याहुः तन्मतं रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेरुपाधित्वसोपाधा

यादिरूपकल्पतान्त्रिकसंमतत्वात् अन्यथा तु यद्धर्मावच्छिन्नवदन्यत्वेन विशिष्टे साधनाधिकरणे साध्यवदन्यत्वं वर्तते तद्धर्मावच्छिन्नत्वमुपाधित्वमित्येव

लक्ष्यतावच्छेदकं लाघवात् तथा च द्रव्यत्वत्वावच्छिन्नाधिकरणत्वसमस्तकत्वाधिकरणत्वसाधारण्यैकत्वमपि रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वा

भावादौ नातिव्याप्तिः नचारूपत्वावच्छिन्नाधिकरणताया एकत्वेपि इदं गुणरूपादित्यादौ तत्राव्याप्तिरेव इत्थं च यद्व्यभिचारित्वे न यद्धर्मावच्छिन्न राम॰

वदन्यत्वेन तत्तीया च सहार्थे साधनस्य तन्नेतरमधिकरणस्येति नो दोषः साध्यव्यभिचारित्वं साध्यव्यभिचारावच्छिन्नत्वं स उपाधिः तद्धर्मावच्छिन्नउपाधिरित्य ५०

…निरुक्तसाध्यसमानाधिकरणवृत्तित्वेन च तद्धर्मो विशेषणीयः तेन साध्यविरुद्धधर्मेण नातिव्याप्तिरिति लक्षणावच्छेदकं परिष्कुर्वन्ति तदसत् उ
द्दशरत्वादिसमासः उक्तलक्षणावच्छेदकस्यैव लक्षणत्वसंभवेपि येन रूपेणाज्ञातस्योपाधेर्दोषत्वं तादृशं लक्षणमाह लक्षणांतरेत्यादिना हि नाप
र्यवसितपदार्थमाह यद्धर्मेति यद्धर्मावच्छेदेनैव यद्धर्मवति साध्यं प्रसिद्धं साध्यं वर्तमानेनच्छिन्नसामानाधिकरण्यसंबंधेन तादृशयत्किंचिद्धर्मविशिष्टमित्य
र्थः यथाग्नेः तेऽवच्छेदकत्वं नात्रात्मनवृत्तित्वं अन्यूनानतिरिक्तवृत्तित्वं वा मित्रातनयत्वादीनां तत्र संभवात् नवा स्वरूपसंबंधविशेषः मित्रात
नयत्वादीनां तथात्वे मानाभावादित्यसंगतं त्वापत्तेः अत्र व्यधिकरणाय त्किंचिद्धर्मविशिष्टस्य साध्यस्य पर्यवसितपदार्थत्वेऽप्रसिद्ध्यापत्तिरतो ध
रगप र्मविशेषपरिचयाय प्रसिद्धानन्तु लक्षणाघटकं लक्षणान्तु समानाधिकरणसंबंधेन यत्किंचिद्धर्मविशिष्टस्य साध्यस्य व्यापकत्वे सति साधनाव्या
पकत्वमेव केचित्तु प्रसिद्धं निष्कृतं एतच्च पर्यवसितपदार्थतया स्वरूपकथनमिति वदन्ति क्वचित्साधनमिति काकः श्यामो मित्रातनयत्वा
दित्यादेरित्यर्थः क्वचित् द्रव्यत्वादीति वायुः बहिरिन्द्रियप्रत्यक्षः प्रमेयत्वादित्यादेरित्यर्थः क्वचिन्महानसत्वादीति धूमवान्वह्नेरित्यादावित्यर्थ
ः न च तत्रेंधनादेः शुद्धसाध्यव्यापकत्वस्यैव संभवात् अवच्छिन्नसाध्यव्यापकत्वं कुतोऽभ्युपेयमिति वाच्यं शुद्धसाध्यव्यापकत्वेपि विशिष्टसाध्य
व्यापकत्वानपायात् परंतु व्यर्थविशेषणतयाविशिष्टव्याप्यतावच्छेदकं भवतु न वेत्यन्यदेतत् ननु सामानाधिकरण्यसंबंधेन यत्किंचिद्धर्मविशि
ष्टस्य साध्यव्यापकत्वे सति साधनाव्यापकत्वे वह्निमान् धूमादित्यादि सद्धेतावपि सपक्षैकदेशवृत्तिधर्मस्य व्यंजनवत्त्वादेरुपाधिताप्रसंगः महानस

त्वावच्छिन्नवृक्षादिव्यापकत्वादिति चेत् अत्रोपाध्यायाः पक्षधर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वस्य विवक्षितत्वात् नचैवं क्वचिन्मह
नसत्वादिति हि मूलत्वमसंगतं तद्विशिष्टसाधनाव्यापकस्यार्द्रेन्धनादेरभावादिति वाच्यं धूमानधिकरणावृत्तिकरणस्यापि महानसस्य सत्वात् तद्विशिष्टत्वं च ल
सामानाधिकरण्यसंबंधेन तेन रूपवान् पृथिवीत्वादित्यादौ तद्घटोत्पत्तिकालीनत्वविशिष्टरूपव्यापकस्य च घटे तद्विशिष्टपृथिवीत्वाव्यापकस्य च य
नन्यत्वस्य नोपाधित्वप्रसंगः साध्यपदं च साध्यतावच्छेदकविशिष्टसाध्यपरं तेन गुणकर्मान्यत्वविशिष्टसत्तावान् प्रमेयत्वादित्यादौ द्रव्यकर्मान्यत्वा
दिविशिष्टसत्ताव्यापके नाद्रव्यप्रमेयत्वाव्यापके च गुणत्वादौ नातिव्याप्तिः साधनपदमपि साधनतावच्छेदकविशिष्टसाधनपरं तेन द्रव्यं गुणान्य
त्वविशिष्टसत्वादित्यादौ द्रव्यगुणान्यतरत्वाभावादिरिव रूपवान् द्रव्यत्वात् महाकालान्यत्वादित्यादावपि पृथिवीत्वाभाववत्त्वं कालभेदादिर्न ३
लक्षणसंगति न तत्राव्याप्तिरिति प्राहुः रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेर्लक्ष्यत्वे तु पक्षधर्मावच्छेदेन इति समीपपक्षधर्मविशिष्टत्वर्थः साधनाधि प्र
ग्र॰ करणाद इति शेषः नञ्शब्दस्य निषेधार्थकः प्रतिहि वर्तमानं तथा च साध्यानधिकरणसाधनाधिकरणावृत्तिधर्मावच्छिन्नसाध्यव्यापकताव
च्छेदकत्वे सति साधनाव्यापकतावच्छेदको यो धर्मस्तद्वत्त्वमुपाधित्वमिति फलितं विशिष्टसाध्यव्यापकोपाधावव्याप्तिवारणाय अवच्छिन्नान्तं साध्य
विशेषणं रूपवान् द्रव्यत्वादित्यादौ साध्यानधिकरणं साधनाधिकरणं वायवादि तद्वृत्तिधर्मो वायुजलान्यतरत्वादि तदवच्छिन्नसाध्यव्यापक
एव पृथिवीत्वाभावादिरिति तत्रापि लक्षणसमन्वयः यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वस्य साधनाधिकरणावृत्तिधर्मावच्छिन्नसाध्यव्याप राम॰
कत्वस्य वा विधाने वह्निमान् धूमादित्यादिसद्धेतावपि साध्यव्याप्यसमनतान सत्वव्यंजनवत्वादेरुपाधितापत्तिरतः साध्यानधिकरणसाधनाधिकर ५१

गावृत्तित्वं धर्मविशेषणं साध्यानधिकरणं साधनाधिकरणं च सद्धेतावप्रसिद्धमतो न तद्दोषतादवस्थ्यं महानसत्वादेरपि मतान्तरे जलह्रदान्यतरत्वा
दिविशिष्टसाध्यव्यापकत्वपातदोषतादवस्थ्यवारणाय साधनाधिकरणत्वप्रवेशः साधनाधिकरणत्वं च साधनतावच्छेदकविशिष्टाधिकरण
त्वं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यत्र साध्यानधिकरणसत्ताधिकरणवृत्तिनिरूपघटान्यतरत्वावच्छिन्नसाध्यव्यापके पृथिवीत्वादौ नाति
व्याप्तिः साध्यानधिकरणसाधनतावच्छेदकविशिष्टसाधनाधिकरणाप्रसिद्धेः साध्यानधिकरणत्वमपि साध्यतावच्छेदकविशिष्टानधिकरण
त्वं तेन गुणान्कर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र सत्तानधिकरणजात्यधिकरणाप्रसिद्धावपि द्रव्यत्वादौ व्याप्तिः नचैवमुपाधिशरीरे एव न
साध्यव्यभिचारभानादुपाधिव्यभिचारेण पुनर्व्य भिचारानुमानमफलं स्यादिति वाच्यं हेतुविशेष्यकसाध्यव्यभिचारप्रकारकत्वानार्थं न
ह्यनुमानस्यावश्यकत्वं तादृशज्ञानस्यैव प्रतिबंधकत्वात् यत्रोपाधित्वज्ञानात्पूर्वं साधनाधिकरणस्य न साध्यानधिकरणत्वज्ञानं तत्र निश्चितो
पाधित्वाभावस्यापीष्टत्वात् साध्यव्यापकत्वमपि साध्यतावच्छेदकविशिष्टसाध्यव्यापकत्वं बोध्यं अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जाते
रित्यत्र द्रव्यत्वादेरव्याप्यापत्तेः तत्र द्रव्यगुणान्यतरत्वद्रव्यकर्मान्यतरत्वादिरूपतादृशधर्मावच्छिन्नविशिष्टसत्ताव्यापकत्वसत्वेपि तादृशाखण्डस
त्ताव्यापकत्वविरहात् न च निरुक्तसाध्यानधिकरणनिरुक्तसाधनाधिकरणवृत्तिधर्मावच्छिन्ननिरुक्तसाध्यसमानाधिकरणधर्मावच्छिन्नत्वेस
तीत्येवास्तु किं व्यापकतावच्छेदकत्वपर्यन्तानुधावनेन तादृशसाध्यसमानाधिकरणवृत्तित्वं च तादृशसाध्याधिकरणनिरूपिताधेयतावच्छेदकत्वं तेन द्र
व्यत्वादिसत्रद्रव्यान्यत्वविशिष्टसत्वे नातिव्याप्तिरिति वाच्यं व्यापकत्वाप्रवेशे उपाधिशरीरभानस्योपाधिव्यभिचारित्वनिष्ठसाध्यव्यभिचारित्वव्याप्ति

चि·टी· यद्वेहोपयोगित्वासंभवात्पृथक्संनिवेशे च वैयर्थ्याभावात् धूमवत्त्वहेतुरित्यादौ साधनव्यापकस्य प्रमेयत्वादेर्वारणाय साधनाव्यापकतावच्छेदकत्वप्रवेशः
४२ साधनपदं च साधनतावच्छेदकावच्छिन्नपरं तेन द्रव्यं गुणान्यत्वविशिष्टसत्त्वादित्यत्र द्रव्यकर्मान्यतरत्वादिरूपतादृशधर्मावच्छिन्नसाध्यव्यापके गुणान्य
त्वे नातिव्याप्तिः न चैवमपि द्रव्यं गुरुत्वरूपादिमत्त्वादित्यत्रापि जलत्वतेजोन्यतरत्वादिरूपतादृशधर्मविशिष्टसाध्यव्यापकतया पृथिवीत्वनिरूपाव्यापकत्वाभावपृ
वी थिवीत्वाभावादेरुपाधितापत्तिः पृथिवीत्वाभावव्यभिचारिरूपव्यक्तेः पृथिवींमात्रनिष्ठतया साध्यव्यभिचारित्वाभावात्तत्र तदनुपाधित्वस्य सर्वसंमत
त्वादिति वाच्यं सर्वदलप्रविष्टायाः साधनव्यक्तेः साधनतावच्छेदकविशिष्टतत्साधनव्यक्त्यव्यापकत्वस्याविवक्षितत्वात् द्रव्यत्वाभाववान्नत्वादित्य
त्र सत्ताभाववद्वृत्तित्वरूप स्वव्यभिचारित्वेन साध्यव्यभिचारानुमानसमर्थोपि संयोगाभावादिर्न संग्राह्यः तेनोपाध्यायमतेऽत्र मते च न तत्राव्याप्तिरि
ति समासः प्रसंगादिदानीमुपाधिव्यभिचारेण साध्यव्यभिचारानुमितिप्रकारं व्युत्पादयति तथाहीति साध्यव्यभिचारः साध्यव्यभिचारग्रहः
स्फुट एव स्फुटतरं संभवत्येव व्यभिचारित्वेन व्यभिचारित्वे नापि साध्यव्यभिचारित्वमेव साधनस्य साध्यव्यभिचारित्वग्रहः संभवत्येव ननु विशिष्ट
साध्यव्यापकव्यभिचारित्वेन विशिष्टसाध्यव्यभिचारग्रह एव साधनस्य साध्यव्यभिचारित्वग्रहः संभवत्येव ननु विशिष्टसाध्यव्यापकव्यभिचारित्वेन
विशिष्टसाध्यव्यभिचारग्रह एव संभवति न तु शुद्धसाध्यव्यभिचारग्रहस्तत्राह विशेष्येति विशेष्यव्यभिचारित्वरूपतानियमादित्यर्थः न च वि
शिष्टाभावविशेष्याभावयोर्भेदेन व्यभिचारभेदात् कथं विशिष्टव्यभिचारो विशेष्यव्यभिचार इति वाच्यं विशिष्टाभावो विशेष्यविशेषणाभावाभ्यां राम
नातिरिक्त इत्यभिप्रायात् विशिष्टाभावस्यातिरिक्तत्वेपि विशेष्याभावाधिकरणस्य विशिष्टाभावाधिकरणत्वनियमेन विशेष्याभावाधिकरणावृत्तित्व ४२

विशिष्टाभावाधिकरणावृत्तित्वरूपत्वाच्च अत एवेति पतो विशेषणाव्यभिचारित्वसाधने विशिष्टसाध्यव्यभिचारो विशेष्यीभूतशुद्धसाध्यव्यभिचा
रत्वरूपः तदेवेत्यर्थः नार्थान्तरमिति वाच्यं प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावुद्भूतरूपवत्त्वव्यभिचारित्वग्रहस्य बाधग्रहस[illegible]कारादित्यर्थः वि
शेषणाव्य[illegible]भिचारित्वसाधने विशिष्टसाध्यव्यभिचारस्य विशेष्यीभूतशुद्धसाध्यव्यभिचाररूपत्वे न वि[illegible]शेष्यीभूतशुद्धसाध्यव्यभिचारस्यापि व्यापक
तावच्छेदकावच्छिन्नत्वादिति भावः न च तस्य व्यापकतावच्छेदकावच्छिन्नत्वेपि अनुमितेर्व्यापकतावच्छेदकप्रकारकत्व[illegible] नियमाद्विशिष्टसा
ध्यव्यभिचारत्वप्रकारकैव धीः स्यात् तथा चार्थान्तरमेव शुद्धसाध्यव्यभिचारत्वप्रकारकबुद्धेरेव कारणीभूतव्याप्तिज्ञानप्रतिबंधकत्वेनोद्देश्यत्वादिति
वाच्यं इतरकोटिबाधग्रहस[illegible]हकारेणाव्यापकतानवच्छेदकरूपेणापि व्यापकतावच्छेदकावच्छिन्नानुमितिस्वीकारात् अन्यथा विशेष्यव्यभिचा
रित्वाविषयकत्वे अपर्यवसानात् अपर्यवसानप्रसंगात् अप्रमात्व[illegible] प्रसंगादिति यावत् विशेषणाव्यभिचारित्वस्य चात्र बाधितत्वादिति भावः
ननु तथापि अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमे पक्षधर्मतावत्त्वादपि शुद्धसाध्यव्यभिचारत्वप्रकारिकाधीर्न संभवतीत्यस्वरसादाह यद्वे
ति द्रव्यप्रत्यक्षत्वेति द्रव्यत्वावच्छिन्नप्रत्यक्षत्वेत्यर्थः महत्त्ववान् चक्षुरादिनिष्ठमहत्त्ववत् तेन घटादिवृत्तिमहत्त्वस्य साध्यसाधनविकलत्वे
पि न क्षतिः उक्तं चानुमानं प्रत्यक्षपरिमाणवत्त्वाद्रूपाद्यभिप्रायेणानुद्भूतरूपवत्त्वोपाद्यभिप्रायेण तस्यात्मनि व्यभिचारेणाद्रव्यत्वावच्छिन्नप्रत्यक्षत्वाव्याप
स्वा कत्वात् तद्व्यभिचारित्वस्य हो[illegible]हौ प्रत्यक्षत्वव्यभिचारित्वव्यभिचाराच्चेति द्रव्यत्वं न च द्रव्यप्रत्यक्षत्वव्यापकं तत्र द्रव्यपदं वैयर्थ्यमिति वाच्यं प्रत्यक्षपरिमाणवत्त्वा

२१४

चि॰टी॰ ४३ ...द्व्यभिचारित्वस्यैव हेतुत्वात् तत्र च प्रमेयत्वस्य व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति ज्ञापनमित्रातनयत्वेऽपि मित्रातनयत्वावच्छिन्नश्यामत्वेऽमर्थः अत्रापि
शाकपाकजत्वव्यभिचारित्वादित्येव हेतुः व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति ध्येयं न्यायघटत्ववदिति निजत्वघटत्वभेदः सत्तु नान्वयेन दृष्टान्तः सत्त्वं तद्विशे
षणाभावेन साधनविकलत्वात् नापि व्यतिरेके गासाध्यसत्त्वसत्त्वादिति चेद् न्नासमत्वं तु चरणाः यथाहि धूमविशिष्टप्रमेयत्वं वह्न्यव्यभिचारि तथा मि
त्रातनयत्वादि विशिष्टं सत् श्यामत्वमपि मित्रातनयत्वाव्यभिचार्येवेति भावः ननु मित्रातनयत्वाव्यभिचारित्वं मित्रातनयत्वाभाववदवृत्तित्वं तच्च मित्रा
तनयत्वविशिष्टेऽघटत्वेऽपि नास्ति विशिष्टस्यानतिरिक्ततया गुणत्वविशिष्टसत्तायां गुणादिवृत्तित्ववन्मित्रातनयत्वादिविशिष्टघटत्वस्यापि मि
त्रातनयभिन्नेस त्वात् वह्न्यभाववदवृत्तित्वरूपवह्न्यव्यभिचारित्वमपि धूमविशिष्टप्रमेयत्वे तथा च साधनविकलो दृष्टान्तः इत्यतो व्यापकत्वरूपमव्यभिचा
रित्वं निर्वक्ति अव्यभिचारश्चेति तत्समानाधिकरणेति। नत मित्रातनयत्वसमानाधिकरणात्यन्ता भावप्र तियोगिपस्येति बहुव्रीहिः स्वसमानाधिकर
णात्यन्ताभावाप्रतियोगिमित्रातनयत्वकत्वमित्यर्थः यथाश्रुते मित्रातनयत्वव्यापकत्वस्यैव फलतो मित्रातनत्वव्यापकत्वे सति वर्तमानत्वादिरूपस्यैव सम्भवा ५
त् अभेदेऽपि विशिष्टस्य केवलादनतिरिक्तत्वेऽपीत्यर्थः विशिष्टस्यानतिरिक्तत्वेऽपि तत्स्वरूपितावारतायाः मित्रातनयत्वेऽभावादिति भावः यद्वेदं श्यामत्वमित्रा
तनयत्वप्रकारकप्रमाविशेष्यत्वाभावाद्देवव्यभिचारः तस्यापि मित्रातनयत्वादिविशिष्टीभूयमित्रातनयत्वाव्यभिचारित्वात् शाकपाकजत्वाभाववदवृत्तित्व
रूपशाकपाकजत्वव्यभिचारित्वाच्च न चापि शाकपाकजत्वव्यभिचारित्वमपि स्वसमानाधिकरणात्यन्ताभावप्रतियोगिशाकपाकजत्वकत्वं तथा च स्वसमा राम॰
नाधिकरणात्यन्ताभावाप्रतियोगिमित्रातनयत्वकत्वे सति स्वसमानाधिकरणात्यन्ताभावप्रतियोगिशाकपाकजत्वकत्वादिति फलितं स्वपक्षदृष्टान्तकधर्मावच्छिन्नत्वे ४३

५ त्रातनयत्वाव्यभिचारित्वरूपतया शाकपाकजत्वव्यभिचारित्वरूपस्य विशेष्यदलस्य वैयर्थ्यापत्तेर्दुर्वारत्वात्· मित्रा ५

धकमतेन कोपि दोषइत्याहुः नयास्तंव्यघटत्वव्यतिरेकेणैवदृष्टांतः मित्रातनयत्वस्यमित्रान्यत्वविशिष्टपुंस्त्वाव्यावयवविशेषरूपसमवेतत्वसंबंधे
नैवव्याप्यानुमानेहेतुकतयासमवेतत्वसंबंधेनश्यामत्वव्यभिचारस्यैवात्रसाध्यत्वेनसाध्याभावस्यापितत्रसत्वात्यदिचमित्रातनयत्वंश्यामत्वेनमित्रान्यताव
च्छेदकधर्मवत्वमात्रंनाधिकंव्यर्थत्वात्तदापितादृशधर्मस्यजातिविशेषरूपतयासमवायसंबंधेनश्यामत्वव्यभिचारस्यैवात्रसाध्यत्वेनसाध्याभावसहचरितत
त्रसत्वादितिभावः। ननुमित्रातनयत्वाव्यभिचारित्वंकुतोमित्रातनयत्वे व्यभिचारस्यमेघगर्भेनत्वादतोहेतुः स्वरूपासिद्धइत्यतआह अव्यभिचारश्चेतितत्स
मानाधिकरणेतिसर्वत्रबहुव्रीहिः तथाचमित्रातनयत्वाभाववद्वृत्तित्वंफलितंयथाश्रुतेहेतावुक्तरीत्याविशेष्यदलघटकश्यामत्वाव्यावृत्तिकजन्याभाववद्वैयर्थ्य
र्थ्यापत्तेः तद्धाभेदेनमेघगर्भत्वादितिभावइतिप्राहुः। मित्रास्तनश्यघटइतिगौरमित्रातनयस्यसंग्राहेः तथागौरमित्रातनयवृत्तिधर्मोऽन्वयेनैवदृष्टांतइत्या
वृ.पृ. हुः। तन्मते अव्यभिचारश्चेत्यादियथाश्रुतमेवमतेयोजनीयः। मध्यमार्गस्तुनन्वघटत्वंघटभेदः सचनान्वयेनदृष्टांतः साधनविकलत्वात् अधिकरणभे
देनघटभेदाभावात् नापिव्यतिरेकेणमित्रातनयत्वंनमित्राजनकत्वावच्छेदकधर्मवत्वमात्रंतस्यतनयत्वाद्यरूपत्वात्। अतएवनमित्राजन्यत्वविशिष्ट
पुंस्त्वाव्याप्यावयवविशेषः प्राचांनयेदृष्टस्यनियामकसंबंधस्यशाकानावच्छेदकतानवच्छेदकतयातस्यापितनयत्वादिपितृमित्राजन्यत्वविशिष्टपुंस्त्वाव्या
प्यावयवविशेषसमवेतत्वंछिन्नलिंगत्वंउपरिरंतुनपुंसकवत्तनयत्वः तथाचस्वरूपसंबंधेनैवतत्रस्थापनानुमानेहेतुतयास्वरूपसंबंधेनश्यामत्वव्यभिचारि
त्वस्यैवात्रसाध्यत्वेनाघटत्वेसाध्याभावविरहादित्याशंकायामेवाह अव्यभिचारश्चेति समानाधिकरणेतिमित्रातनयत्वाधिकरणीभूतयत्किंचिद्व्यक्ति
निष्ठस्यार्थः। तेनमित्रातनयत्वसमानाधिकरणत्वंफलितंयथाश्रुतेहेतावुक्तरीत्यावैयर्थ्यविशेषणत्वापत्तेः। सवेति। अभेदेनेतिघटभेदस्याधिकरणभेदेनभे

दी॰ टी॰ दाभावेपि तत्राप्यस्तीति शेषः। नैवं तत्पानत्वादावेव व्यभिचारः तस्यापि मित्रातनयत्वसमानाधिकरणत्वात् तत्र शाकपाकजत्वव्यभिचारित्वाच्चेति वाच्यं यस्मिन्नधिकरणे
२१५ मित्रातनयत्वसमानाधिकरणं तत्र शाकपाकजत्वव्यभिचारित्वस्य विवक्षितत्वात् मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति फलितार्थ इत्याहुः। नचैवं सा
ध्यव्यभिचारानुमापकत्वेनोपाधिव्यभिचारस्यैव दोषत्वात् तथा सत्येवोपन्यस्तमुचितं नोपाधिरिति प्रागुक्तदोषोद्धार इत्यस्वरसादाह यद्वेति कः साधनव्यभिचारीति।
[illegible]यः साधनव्यभिचारी उपाधिः साध्यव्यभिचारोन्नायकः सत्वधमेव साधने साध्यव्यभिचारोन्नायक इति योजना। स्वरूपसंबंधेन तद्व्यभिचारस्यैव
तस्यापि व्यभिचारितासंबंधेन साध्यवृत्तित्वात् साध्यव्यभिचारव्याप्यत्वाच्च तथा च वह्निधूमव्यभिचारी आर्द्रेन्धनत्वादिः साध्ये व्यभिचारानुमानप्रयोगः। नच
व्यभिचारित्वादिसंबंधस्य वृत्त्यनियामकतया न व्याप्यतावच्छेदकत्वसंभव इति वाच्यं वृत्त्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वानभ्युपगमात् व्यापकता
वच्छेदकत्वासंभवेपि व्याप्यतावच्छेदकत्वे बाधकाभावादित्येतावुपाधिरिति प्रतीत्या व्यभिचारितासंबंधस्यापि वृत्तिनियामकत्वात् इति भावः। करकापृथिवीको
रासंयोगवत्त्वादिसाध्ये साधनव्यापकत्वस्यानुपपत्त्या नीतस्यैवत्वा ह्युपाधेर्विशेषदर्शिनां साधने साध्यव्यभिचारानुमापकत्वात् तेन वा व्यभिचार्यंतमुपाधिविशे
षणं साधनं व्यभिचारि पक्षेति तु मा साधनाव्यापकत्वं न त्वर्थः। नन्वेवेति। विशिष्टसाध्यव्यापकोपाधेस्तत्त्वं चेत्यर्थः। साक्षात्प्रागुक्तरीत्या विशेषणाव्यभि
चारित्वादिविशेषणासहकारेणासाक्षात्त्वं परंपरया वाहत्वं पक्षे ग्रंथोक्तक्रमेणाउद्ग साध्यव्यभिचारानुमा पक विशिष्टसाध्यव्यभिचारानुमितिद्वारैव वा
नार्थांतरमिति ध्वंसो विनाशी जन्यत्वादिसाध्ये विशिष्टसाध्यव्यापकभावत्वाद्युपाध्युद्भावनार्थांतरमित्यर्थः। नच तथापि परंपरयैवेति पक्षेप्यर्थमंतरुद्भावने आ
मकालत्वमत्वेवान्यथा उपाधिसाधनत्वे साधकाभिमतपरापार्श्वपदुद्भावने प्राक्कालत्वं न स्यादिति वाच्यं प्रथममुद्दृष्ट साध्यव्यभिचार एवोद्भाव्यः तत्र कार्यत्वं यत्तद्वे

तुत्वेन विशेषणाव्यभिचारित्वमिति विशिष्टसाध्याव्यभिचारित्वमुद्भाव्यं तन्न विशेष्येऽप्येकथंतयांतद्धेतुत्वेन विशिष्टसाध्यव्यापकोपाधिरुद्भाव्य इत्यत्र प्रका
शत्वविरहात् । न च तथापि साक्षात्स्वस्य साध्याव्यभिचारानुमापकत्वाद्विशिष्टसाध्यव्यापकोपाधेर्दूषकत्वं न स्यादिति वाच्यं । साक्षात्परंपरासाधारण्येन व्यभिचारा
नुमापकत्वस्यैव दूषकतापांतत्रत्वादिति भावः । केचित्तु प्रकारांतरेण लक्षणावच्छेदकं निर्वक्ति यद्धेतुपक्षसाधनव्यभिचारि साधननिष्ठो यद्व्यभिचारः सा
ध्यव्यभिचारोन्नायकः साध्यव्यभिचारानुमितिस्वरूपयोग्यः साध्यव्यभिचारसमानाधिकरण इति यावत् स उपाधिरित्यर्थः द्रव्यं पृथिवीत्वादित्यादिस
द्धेतौ साध्यव्यापकस्य गुणवत्त्वादेः साध्यव्याप्यस्य घटत्वादेश्चोपाधितावारणाय निष्ठांतं व्यभिचारविशेषणं तथा च साधनतावच्छेदकावच्छिन्नसाधनाधि
करणवृत्तित्वविशिष्टयद्धर्मावच्छिन्नव्यभिचारित्वनिरूपिताधिकरणत्वं साध्यव्यभिचारसमानाधिकरणं तद्धर्मवत्त्वमुपाधित्वमिति फलितं तेन द्रव्यं वि
शिष्टसत्त्वादित्यादौ विशिष्टसत्तानतिरिक्तत्वेऽपि गुणवत्त्वादौ नातिव्याप्तिः । न च स्वाश्रयभेदेऽप्येकसंबंधावच्छिन्नव्यभिचारित्वस्यैकत्वनये द्रव्यं पृथि
वीत्वादित्यादौ घटत्वादावतिव्याप्तिस्तदवस्थैव पृथिवीत्वाधिकरणत्वनिष्ठघटत्वव्यभिचारित्वस्य समानाधिकरणवृत्तित्वेऽपि पृथिवीत्वाधिक
रणत्वविशिष्टघटत्वव्यभिचारित्वनिरूपिताधिकरणत्वस्य पृथिवीत्वाधिकरणत्वरूपसत्त्वानानात्वेन साध्यव्यभिचारविरहात् तद्वारणाय व्याप्य
त्वमेव स्वरूपयोग्यत्वं विवक्षणीयमिति वाच्यं विशिष्टसाध्यव्यापकोपाधावव्याप्त्यापत्तेः तद्व्यभिचारस्य साधनाधिकरणत्वनिष्ठत्वेऽपि साध्यव्यभिचा
राव्याप्यत्वात् स्वाश्रयभेदेन व्यभिचारभेदाभावात् द्रव्यं वह्निमत्त्वसाधर्म्यसमानाधिकरणेऽपि नापि तद्धर्मो विशेषणीयः तेन धूमवान्वह्निरित्यादौ
साध्याविषयत्वे जलत्वादौ नातिव्याप्तिः उक्तिवैचित्र्याच्च सर्वस्माद्भेदः रूपवान् द्रव्यत्वादित्यादौ गुरुरूपादिमत्त्वे पृथिवीत्वाभाववद्घटत्वाभावाद्रा

११६

चि॰ टी॰ ५५

वतिव्यभिचारोन्नायकत्वेन। न त्वेवेति। व्यभिचारानुमित्युपधायकत्वं चेत्यर्थः। साक्षात्परंपरया वेति उक्तरूपसाध्यव्यापकत्वस्थले साक्षाद्विशिष्टसाध्यव्यापकत्वस्थले
च पूर्वपक्षोक्तक्रमेणोक्तरूपसाध्यव्यभिचारानुमापकविशिष्टसाध्यव्यभिचारानुमितिद्वारेत्यर्थः। अर्थान्तरमिति ध्वंसो विनाशी जन्यत्वादित्यादौ विशिष्ट
साध्यव्यापकोपाध्युद्भावनेनार्थान्तरमित्यर्थः। एतच्च प्रसंगात्स्वरूपकथनं न तु लक्ष्यतावच्छेदकघटकं तथैव न दूषकताबीजाभिधानं तत्र स्वरूपयोग्यताया एव दू
षकत्वादित्याहुः। अभ्युपगमवादेनाह किंचेति। पुरुषदोषत्वादिति उद्भावकस्य पुरुषस्य निग्रहस्थानमात्रत्वादित्यर्थः। मात्रपदादुपाधिलिंगकव्यभि
चारानुमितिप्रतिबंधकत्वव्यवच्छेदः। आभासानामप्यभिचारानुमितिप्रकारांतरसत्त्वात्तत्र व्यभिचारानुमितिसर्वसत्त्वायां। उपाधिरेवेति ध्वंसो
विनाशी जन्यत्वादित्यादौ भावत्वादिकमुपाधिर्दोष एवेति योजना। तेनापि परंपरया व्यभिचारानुमितिनिर्वाहेन परोक्तसाध्यसिद्धिप्रतिबंधकस्यो
द्भावनस्य निर्वाहादिति भावः। नन्वेवमिति सर्वस्यावच्छिन्नसाध्यव्यापकत्वस्यापि दोषताप्रयोजकत्वे अत्रावगतत्वमिति तत्र पक्षधर्मगुरुत्वावच्छि
न्नसाध्यव्यापकत्वज्ञानासंभवादिति भावः। पृथिवीत्वमिति। पक्षधर्मरसवत्त्वावच्छिन्नसाध्यव्यापकताज्ञानासंभवादिति भावः। उपाधिः स्यात्तद्दोषस्यान
नुगमात् जलयोः विशिष्टव्यापकत्वादिति। पक्षधर्मगुरुत्वावच्छिन्नसाध्यव्यापकत्वादिति भावः। व्याघातकत्वेनेति। उपाधिमात्रस्य दूषकत्वव्याघात
कत्वेनेत्यर्थः। पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसंभवेनानुमानमात्रोच्छेदे व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वासंभवादिति भावः। अ
तिव्याप्तिः उक्तरूपज्ञानस्य दोषतापत्तिः द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वतदवच्छिन्नसाधनाव्यापकत्वज्ञानस्य नापि संभवादिति भावः। साध्यव्याप राम॰
कत्वानिश्चयादिति। यद्धर्मावच्छिन्नसाधनाव्यापकत्वं तद्धर्मावच्छिन्नसाध्यव्यापकत्वनिश्चयादित्यर्थः। यदा तु तन्निश्चयो भवति तदा बाधो भ्रमो न पक्षेतरनिश्च

यद्यवतन्निश्चयो भवत्येवेति नन्हेष इति भावः। संशायकत्वात् व्यभिचारसंशयाधायकत्वात्। अनुकूलतर्कोस्त्येवेति। उपाध्यभाववति पक्षे साध्या
भावनिश्चयस्य व्यभिचारसंशयप्रतिबंधकत्वेनानुकूलतर्कत्वादिति भावः। सोपाधित्वं नोपाधित्वनिश्चयः। पक्षमात्रेति। यद्यपि पर्वतावयवैर्हृदादे व
रपि व्यावर्त्तनात्र पक्षमात्रव्यावर्त्तकविशेषणवत्त्वं न वा तद्वत्त्वं उपाधित्वनिश्चये प्रयोजकं। तथापि तुल्यार्थकत्वनिश्चयप्रयोजकत्वमनपायात् पक्षमात्रव्या
वर्त्तकविशेषणं यत्र पक्षे न तुल्यत्वादित्यर्थः। तथा च तत्र साध्याननुकूलतर्काभावेन तादृशव्यापकतानिश्चयस्तथात्रापीति भावः। अत एवेति। व्यापक
ताग्राहकानुकूलतर्कसत्वादेवेत्यर्थः। उपाधिः। उपाधित्वेन निश्चितः। यथासंख्यमनुकूलतर्कमाह। तदुत्कर्षेणेति। आर्द्रेंधनप्रभववह्न्युत्कर्षेण
धूमोत्कर्षादित्यर्थः। द्वितीये तर्कमाह। अन्यथेति। द्रव्यबहिरिंद्रियप्रत्यक्षसंप्रतिबद्धूतरूपसामान्यस्यासिद्धान्वयव्यतिरेकादित्यर्थः। तृतीये त
र्कमाह। वैद्यकादिति। वैद्यकेन चणामलं प्रतिज्ञाकपाकस्यजनकत्वकथनादिति भावः। कारणतावगमेनेति। आर्द्रेंधनप्रभववह्न्यादीनां धूमादिकं
प्रतिकारणतानिश्चयेनेत्यर्थः। चतुर्थे तर्कमाह। घटेति। ध्वंसस्यापि ध्वंसे प्रतियोगिनो घटस्य पुनः पराहत्तिप्रसंगेनेत्यर्थः ध्वंसप्रागभावानधिकरणका
लस्य प्रतियोग्यधिकरणत्वनियमादिति भावः। इष्टापाततः। प्रतियोगिनो ध्वंसोपि यथा प्रागभावस्य ध्वंसः तथा ध्वंसस्य ध्वंसोपि प्रतियोगिनो ध्वं
स इत्युक्तावेव घटोन्मज्जनप्रसंगवारणासंभवात्। बाधकतर्क अप्रामाणिकानंतध्वंसप्रतियोगिनि एतत्कारणत्वकल्पनापेक्षया ध्वंसानंतत्व
कल्पनैव लघीयसीति लाघवमेवानुकूलतर्क इति तत्त्वं। कार्यकारणयोः कार्यकारणभावग्राहकप्रमाणाविषयीभूतयोः यथाक्रमं तत्त्वकार
णीभूतस्यापि वाकपाकहेत्वादेर्व्यापकत्वकथनात् तर्कानुपपत्तेः। बहुव्याकुलीति। जलत्वादिना द्रव्यत्वाद्यनुमानं न स्यादित्यर्थः। नहृषजीवेति त

११८

चि॰टी॰ ते कार्यकारणाभाववत्त्वानुपजीव्येत्यर्थः। द्रव्यत्वजलत्वादिरूपे लिङ्गे जलत्वं द्रव्यत्वव्यभिचारि स्यात् संयोगव्यभिचारि स्यात् संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिका यो
४६ रणत्वादित्यपि परंपरया संयोगत्वावच्छिन्नद्रव्यत्वावच्छिन्नकार्यकारणाभावग्रहोपजीवी तर्क एव व्याप्तिग्राहक इति भावः। नन्वेवं च हेतुसाध्ययोः साध्योपाधौ व्य
सत्त्वे चाऽदर्शनं व्यभिचाराऽनिश्चयमात्रं व्याप्तिग्राहकं वक्तव्यं तेनानुकूलतर्कः। तत्रोपाधौ साध्यव्यापकत्वानिश्चयात् उपाधित्वज्ञानं हेतोर्न स्यादित्यत आह
दे वेति। नन्वसंदिग्धोपाधित्वमिति तत्र उपाधित्वसंदेहोऽवश्यमित्यर्थः। तदा हेतुत्वमिति। तदा हेतुत्वं हेतौ साध्यव्याप्यत्वं। उपाधित्वं उपाधौ साध्यव्यापकत्वमि
त्यर्थः। यदा हेतौ तर्कावतारस्तदा हेतौ साध्यव्याप्यत्वनिश्चयः यदा साध्ये तर्कावतारस्तदा उपाधौ साध्यव्यापकत्वनिश्चय इति भावः। नन्वेवं पक्षेतर
सोपाधित्वनिर्णयाभावेऽप्युपाधित्वसंदेहे दोषः स्यादित्यत आह पक्षेतरस्येति सव्यभिचारकत्वेन उपाधिमात्रस्य दूषकताव्याघातप्रसंगेनासंदिग्धोपा
न धिरपीत्यर्थः। न सोपाधित्वसंदेहेऽपि न दोषः उद्भावनात् उपाध्यंतरस्य उपाधित्वसंदेहवत् पक्षेतरस्योपाधित्वसंदेहे नापि व्यभिचारसंशयजनने बाधका
भावात् नहि प्रयोजनक्षतिभिया सामग्री कार्यं न जनयति न वा प्रयोजनक्षतिः यदा यस्य कथंचिदनुकूलतर्केण पक्षेतरे साध्यव्यापकत्वं निश्चि
तं तदाऽनुकूलतर्काप्रसरेण तत्त्वव्यभिचारित्वे साध्यव्यभिचारित्वव्याप्यत्वनिश्चयो जातस्तदैव व्यभिचारानुमाने पक्षेतरस्योपाधित्वं म ज्ञायासंभवेन
व्यभिचारानुमानसंभवात् न च पक्षेतरस्योपाधित्वसंदेहादिना व्यभिचारशंकापक्षीयव्यभिचारसंशयवन्न प्रतिबंधिके निवार्यं नहि व्यभिचारज्ञा
नत्वेन प्रतिबंधकता मते पक्षेतरत्वनिष्ठोपाधित्वज्ञानाजन्यत्वं पक्षीयव्यभिचारसंशयाजन्यत्वं वा प्रतिबंधकतावच्छेदकेऽनुप्रविशतीति गौरवात् माना राम०
भावाच्च ... विशेषादर्शनदशायां उपाध्यंतरस्य उपाधित्वसंदेहवत् यदा पक्षेतरस्योपाधित्वसंदेहस्तदापि व्याप्तिग्रहो न भवत्येव परंतु कथकसंप्र ४६

४५

शयानुरोधात् कथाधोमंसंदिग्धोपाधित्वेनोद्भाव्यते इत्येवतन्वं।साध्यव्यापकतापदस्मालंव्यं साध्यव्यापककोटिमालंख्य साध्यव्यापकताकोटिसंदेहविष
यीभूयेतियावत् इष्टशंकास्पदेवेति। यदि महत्त्वगतिर्नानुमरणीयेतिभावः।मत्रोपाधिः यत्रोपाधित्वज्ञानं दोषः साध्यव्याप्येति।साध्यव्याप्याव्या
पकत्वज्ञानेनेत्यर्थः।अनुकूलतर्केणाहेतौ साध्यव्याप्यत्वनिश्चयादितिभावः।नोपाधिः नोपाधित्वज्ञानं नोपाधिदूषणं नोपाधित्वज्ञानं दूषणं
[illegible] कर्तं व्याप्य भावेति।उभयमिति।उपाधिरनुकूलतर्काभावश्चेत्यर्थः।तदभावो न्वयनेन व्याप्यभावोन्वयनेन व्याप्यत्वाभावार्थमिति सा
ध्यव्यापकताज्ञानार्थमित्यर्थः।हेतौ साध्य।व्याप्तिग्राहकानुकूलतर्कसत्वे तत्र साध्यव्यापकत्वनिश्चयात् तद्व्यापकत्वज्ञानेन साध्यव्या
पकत्वज्ञानं न स्यादितिभावः।सोपाधाविति सामानाधिकरण्यसंसर्गेणोपाधिरवच्छेदकं।साध्यतदभावसहचरितसोपाधावित्यर्थः।एकवृ
त्तिन्यवच्छेदकभेदं विनेतिशेषः उपाधिरवच्छेदको वाच्य इति।वाच्य इत्यर्थः।एकव्यक्ति व्यभिचारिहेतुस्थले सामानाधिकरण्यसंसर्गेणो व्य
पाधेरवच्छेदकत्वं विना ऽन्यसावच्छेदकतायाः दुर्वचत्वात् धूमवान् वह्नेरित्यादौ च नैकव्यक्तिः साध्यतदभावसमानाधिकरणा।न च द्रव्यं सत्वादि
त्यादावपि विशिष्टसत्तात्वद्रव्यत्वादिकमेवावच्छेदकं भविष्यतीति वाच्यं।सामानाधिकरण्यसंसर्गेण गुणाद्यन्यत्व द्रव्यत्वावपेक्ष्य यानस्य गु
रुत्वात् न च घटत्वादिकमेव सामानाधिकरण्यसंसर्गेणावच्छेदकं भविष्यतीति वाच्यं सामानाधिकरण्यसंसर्गेण तद्विशिष्टस्य साध्यसमसाध्यन्यू
नवृत्तित्वादितिभावः।आवश्यक इति तद्विना साध्यव्यापकत्वज्ञानासंभवादितिभावः।विनिगमकाभावादिति।इष्टमापाततः साध्यसंबंधिताव
च्छेदकत्वे नोपाधित्वस्वरूपस्यावश्यकत्वेपि न सोपाधित्वज्ञानं कथं दोष स्यात् उपजीव्यत्वेनानुकूलतर्काभावस्यैव दोषत्वसंभवात् [illegible] उपा

दि॰ दी॰ ११८ पाधित्वज्ञानानुकूलतर्काभावयोरुपजीव्योपजीवकभावो न कार्यकारणभावः असंभवात् [illegible]व्याप्यव्यापकभावः तस्य प्रतिबंधकतायामविनिगमकत्वात् तद्वै
तोरेवेति न्यायसकारणतायामेव विनिगमकत्वात् [illegible] परंपरया यथा कथंचित् उपयोगित्वमपि न तथा [illegible] जीव्योपजीवकभावविरहे पि अनुकू
लतर्कस्यावश्यं व्याप्तिग्राहकत्वात् तदभावादेव व्याप्तेरग्रहोपपत्तौ किमुपाधिज्ञानस्य दोषत्वेनेति वाच्यं । अनुकूलतर्कस्य व्याप्तिग्रहं प्रत्यहेतुत्वे नयत्र । नु
कूलतर्क[illegible] स्फूर्तिर्नास्ति प्रकारांतरेण च व्यभिचाराग्रहोपि नास्ति अयोपाधिज्ञानं वक्तव्यं तदापि व्याप्तिग्रहं प्रतिबंधे न तद्दोषतायां अवश्यकत्वादित्येव त
त्वं । [illegible]त्वेनेति वैशिष्ट्यं तृतीयार्थः साधनस्य यत्तरमधिकरणं स्येति तत्करणीयं । तथा च यद्धर्मावच्छिन्नविशिष्टस्य यद्धर्मावच्छिन्नप्रतियोगिताकाभावविशिष्ट
स्य पक्षस्य साधनस्याधिकरणे साध्यं निवर्तते साध्याभावो वर्तते तद्धर्मावच्छिन्नत्वं तत्र हे[illegible]तावुपाधित्वमित्यर्थः । उद्भूतरूपवत्त्वाद्यभावविशिष्टस्य साधन
स्याधिकरणे वाय्वादौ प्रत्यक्षत्वाद्यभावस्य सत्त्वात् न विशिष्टसाध्यव्यापके व्याप्तिः तथा च यद्धर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणीभूतसाधनतावच्छे
दकावच्छिन्नाधिकरणसाध्याभावाधिकरणं तद्धर्मावच्छिन्नत्वमुपाधित्वमिति फलितं तेनेदं व्योर्विशिष्टसत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेपि गुणादावा
नातिव्याप्तिः रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वघटत्वाद्यभाववति जलरूपं तथा महाकालात्मादिगतद्रव्यत्वादौ [illegible] कालभेदादिरूपि न लक्ष्यः वह्निमान्
धूमादित्यादौ महानसत्वाद्यभावाधिकरणस्य जलहृदादौ साध्याभावाधिकरणत्वेपि न तदधिकरणीभूतस्य साधनाधिकरणस्य साध्याभावानधिकरणत्वा
न्महानसत्वादावतिव्या[illegible]प्तिः [illegible]द्रव्यत्वाद्यभाववान् [illegible]मेयत्वादित्यादौ साधनव्यापकसंयोगाभावादावतिव्याप्तिः संयोगाभावाभावसंयोगस्याधिक र स्य
णो द्रव्यत्वाभावाभावस्य सत्त्वादिति वाच्यं । अधिकरणपदेन निरवच्छिन्नाधिकरणताश्रयस्य विवक्षितत्वात् अत्रापि साध्यसमानाधिकरणवृत्तिहेन

तद्धर्मादिर्नोपाधिः तेन धूमवान् वह्नेरित्यादौ हृदत्वाद्यभावाधिकरणेऽयोगोलकादौ धूमाद्यभावसत्त्वेऽपि हृदत्वादौ नातिव्याप्तिरिति संक्षेपः। अन्ये तु
व्यभिचारोन्नायकत्वेन दूषकत्वपक्षे लक्ष्यतावच्छेदकमुक्त्वा सत्प्रतिपक्षोन्नायकत्वेन दूषकत्वनये लक्ष्यतावच्छेदकमाह। सर्वेति। सैवेत्यर्थः। धर्मि
ष्वसमनन्तरमुपाधिरित्यनुषज्यते। यस्याभावादिति पक्षे यदभावात् पक्षतावच्छेदकवर्त्तमानस्य साभावात् साध्यसाधनसंबंधाभाव इति योजना प्रयोजक
त्वं पंचम्यर्थः तत्त्वव्याप्यत्वमेव तथा च पक्षतावच्छेदकावच्छेदेन वर्त्तमानस्य यदभावव्यापकः साधनविशिष्टसाध्याभाव इत्यर्थः। साधनपदं पक्षवृत्तिध
र्मपरं तेन गोरश्वत्वादित्यादि विहेतुस्थलीयसास्नावत्त्वाद्युपाधौ वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापके उद्भूतरूपवत्त्वादौ च ना
व्याप्तिः। एतदभावस्यापि द्रव्यत्वादिरूपयत्किंचित्पक्षवृत्तिधर्मविशिष्टसाध्याभावव्याप्यत्वात् पक्षतावच्छेदकावच्छेदेन वर्त्तमानत्वाच्च एवं मपि सर्वत्र सा ग्रे
धनपदं पक्षवृत्तिधर्मपरं। एवं च पक्षधर्मावच्छिन्नाभावः पक्षवृत्तिधर्मावच्छिन्नसाध्याभावव्याप्यः पक्षतावच्छेदकावच्छेदेन वर्त्तमानश्च तद्धर्मावच्छिन्नत्वमु
पाधित्वमिति फलितं। वायुः प्रत्यक्षः प्रमेयत्वात् गौरमित्रातनयः श्यामः मित्रातनयत्वादित्यादौ उद्भूतसाध्यव्यापके उद्भूतरूपवत्त्व शाकपाकज
त्वादावव्याप्तिवारणाय अवच्छिन्नान्तं साध्यविशेषणं। पर्वतो धूमवान् वह्नेरित्यादौ अतिव्याप्तिवारणाय यत्किंचिद्धर्मेति विहाय पक्षवृत्तिधर्मेत्यभिहितं
न च तथाप्ययोगोलकं धूमवत् वह्नेरित्यादौ महानसत्वादावतिव्याप्तिः तदभावस्यापि महानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मावच्छिन्न
साध्याभावव्याप्यत्वादिति वाच्यं तत्र तस्य लक्ष्यत्वात् महानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित
या वक्ष्यमाणलक्षणाक्रान्तत्वात्। सर्वे साध्यसमानाधिकरणाः सदुपाधयः। पक्षे सर्वाश्रये येषां स्वसाध्यव्यभिचारित्वेति सिद्धान्तात्। पक्षे सर्वाश्रये। प

११७ कमस्तु लाघवादितिवाच्यं तस्यापि लक्ष्यतावच्छेदकान्तरत्वात् लक्ष्यतावच्छेदकान्तरसंभवस्य लक्ष्यतावच्छेद ४

चि·टी रूपेसर्वाश्रयेसर्वस्मिन् पक्षतावच्छेदकाश्रय इति यावत् पक्षतावच्छेदकावच्छेदेन [illegible]मानत्वोपादानात् पर्वतोवह्निमान् धूमात् द्रव्यं [illegible] वह्निमद्धूमादिसाहो
वह्निसाम[illegible]स्यादेर्भ्रमः । हृदोवह्निमान् धूमादित्यादौ वह्निसामग्र्यादिश्च [illegible] ससत्वनिपक्षोन्तायकत्वे नहेतुकनामेतेसाधन [illegible] साणिपक्षा
न हृतेरुपाधित्वात् अबाधितत्वसाध्यकस्थलीयोपाधिश्च संग्राह्य इति पर्वतोधूमवान्वह्नेरित्यादावार्द्रेन्धनादीनामव्याप्तिरिति भावः । [illegible] धूमोऽवच्छिन्नप्रति
घ योगिताकाभावविशिष्टसाध्याभावः सकलपक्षवृत्तिसाध्याभावच्छिन्नत्वमुपाधित्वमिति एवं लक्ष्यतावच्छेदकालोपत्वात् । लक्ष्यतावच्छेदकगौरवस्याप्यकिंचित्क
रत्वात् [illegible] देवलक्ष्यतावच्छेदकद्वयमेवा अयोगोलकं धूमवत्तवह्नेरित्यत्र [illegible] साध्यव्यापकेआर्द्रेन्धने क्रमेणासंगमयति । [illegible] व्याव
र्तितेहि धूमत्वं तद्व्याप्यत्वा अयोगोलक इति योजना । तद्व्याप्येत्यत्रापि वैशिष्ट्यं [illegible]तीयार्थः । [illegible] हि यस्मात्तद्व्याप्तेनेति शिष्टे अयोगोलके साधना
धिकरणो धूमवत्वं व्यावर्तते धूमस्याभावोवर्तते इत्यर्थः । एतेन प्रथमलक्ष्यतावच्छेदकमुपपादितं । ननु तथापि व्याप्यत्वगर्भद्वितीयलक्ष्यतावच्छेदकं नत्वार्द्रे
धने ऽव्याप्तमेव । तदभावाधिकरणोपक्षीभूते योगोलके [illegible] साध्याभावसत्वेपि पक्षवृत्तिधर्मस्य विशेषणासत्वेन तद्विशिष्टसाध्याभाववृत्त्यत्वात् तत्र
तदेवेति । साध्याभावसत्वादेवेत्यर्थः । तत्रेति साध्यसाधनसंबंधाभावस्तत्र यक्ष इति योजना । साध्यसाधनसंबंधाभावं साधनविशिष्टसाध्याभावः प्र
लानसा योगोलकान्तरत्वादिरूपपक्षावृत्तिधर्मविशिष्टसाध्याभाव इति यावत् । [illegible] पक्षे । अयोगोलकरूपेपक्षे [illegible] साध्याभावसत्वेविशेषणासत्वे
पिविशेष्याभावकृतस्यवि [redacted] राम०
शिष्टसाध्याभावस्याव्यापकत्वादितिभावः ननु तथापि ध्वंसोनतिसाजन्यत्वादित्यत्र [illegible] रूप[illegible]नावच्छिन्नसाध्यव्यापकेभावत्वेप्रथमलक्ष्यतावच्छेद

रु कस्याव्याप्तिः तत्र साधनाधिकरणीध्वंसे जन्यत्वे पक्षधर्मविशिष्टानित्यत्वाभावसत्वं जन्यत्वेऽनित्यत्वाभावसाधनादित्यनुमानसिद्धत्वेऽप्यनित्यत्वसा
मान्याभावरूपस्य गुरुहृस्याध्याभावस्य साधनाधिकरणीसत्वे मानाभावात् एवमपि तु बहिरिन्द्रियग्राह्यत्वसत्ताश्रयत्वादित्यत्र द्रव्यत्वरूपपक्ष
मीवच्छिन्नसाध्यव्यापके उद्धृतद्रूपवत्वेन साध्याव्याप्तिः तत्रापि साधनाधिकरणीवावादौ द्रव्यत्वरूपपक्षधर्मविशिष्टबहिरिन्द्रियग्राह्यसत्ताभावस्यायुः नद्रव्य
त्वे सति बहिरिन्द्रियग्राह्यसत्ता उद्धृतद्रूपवत्वाभावादित्यनुमानसिद्धत्वेऽपि बहिरिन्द्रियसत्ता तद्रूपसप्रगुरुहृसाध्याभावस्य साधनाधिकरणीसत्वे मानाभा
वा दित्यत आह एवमिति ध्वंसे पक्षीभूते ध्वंसे जन्यत्वा नित्यत्वयोः संबंधस्य जन्यत्वरूप पक्षधर्मविशिष्टोऽनित्यत्वाभावः निवर्त्तमानः निहत्निध
तियोगित्वेन तिद्दिविषयीभवनपक्षधर्मताबलादिति जन्यत्वरूपस्य विशेषणस्य विशेष्यस्य सहतितानिष्ठ स्फुरति तर्थः अनित्यत्वाभा स
वं ध्वनित्यत्वाभावरूपं गुरुहृसाध्याभावं नित्यं वर्त्तमानं निहतिप्रतियोगित्वं तामानं द्रव्यत्वे सति तिद्रव्यत्वविशिष्टबहिरिन्द्रियग्राह्यसत्तामित्यर्थः
निहतिप्रतियोगित्वेनानुमापयन् प्रत्यक्षत्वाभावमाहायेति बहिरिन्द्रियग्राह्यसत्ताभावरूपं गुरुहृसाध्याभावमाहायेत्यर्थः। सिद्धाति द्रव्यत्वविशि
ष्टबहिरिन्द्रियग्राह्यसत्तानिहतिः सिद्धति तथा चेति साध्याभावसिद्धा गुरुहृसाध्याभावसिद्धा साध्यसाधनसंबंधाभावोऽसीति साधनाधिकरणी
गुरुहृसाध्याभावो तीत्यर्थः प्रहृतेपक्षस्येव साधनाधिकरणात्वादिति भावः। साध्याभावानकानेनं तत्साध्याभाववत्तद्भावसाध्यकत्वेन साध्याभावाभाववा
प्यत्वेनेतिपावन साध्याध्याहृत्तकत्वादिति [redacted] राम०
[redacted] साधनाधिकरणीसाध्याभावासमानाधिकरण
निवर्त्तयन् ६

२०

कु

दि. टी. त्वहिलघौः पक्षवृत्तित्वमविशिष्टसाध्याभावव्याप्यत्वाद्धेतीति बोध्यं सांप्रदायिकास्तु पूर्वोक्तानामित्यादि स्वाव्यभिचारोन्नायकत्वे केनहेतुव्यापकतापक्षेलक्षणतावच्छेद
कत्वस्यासत्वतिपक्षोन्नायकत्वेनोपाधेर्दूषकत्वं येवदंति तन्मते न लक्षणतार्थक्षुद्रं मा हि स्वस्येतिति। यद्यपि हेतोर्नि। यस्मसाधनस्य यद्यपि हेत्वेतिको जना। कु
मृ सर्वस्मिन्पक्षे इतिशेषः यस्य साधनस्य तत्र येनकेनचित्संबंधेन संबंधित्वं स्पर्थः॥ अन्यपक्षस्य परिमन्त्रात्वतो याच मतार्थे तथा च येनकेनापि संबं
धेन यत्साध्य संबंधिनो पस्य व्याहत्यासहसर्वास्मिन्पक्षे साध्यं संनिवर्तते साध्याभावो वर्तते सत त्र हेतावुपाधिरित्यर्थः उदूनहत्पाद्यभावेन सत्वापि प्रत्यक्षत्वा
भावः सर्वस्मिन्पक्षे वर्तत एवेति न विशिष्टसाध्यव्यापके व्याप्तिः येनकेनापि संबंधेन यथोक्तधर्मसंबंधित्वं चोपाधित्वव्यवहारश्च योजकमिति बोधनाय मे
संबंधिनत्वं तत्पक्षेत्यस्य विशेषणं नतु तत्र हेतौ घटकं यत्तु यद्धर्मावच्छिन्न प्रतियोगिताकाभावविशिष्टस्य साध्याभावस्याधिकरणं तद्धर्मवत्वमुपाधित्वमि
त्येवलक्षणं पर्वतो वह्निमान्धूमादित्यादौ महानसत्वाद्यभावविशिष्टस्य साध्याभावस्याधिकरणं न पक्ष इति न व्याप्तिव्याप्तिः अयो गोलकं धूमवद्वह्नेरित्य
त्र महानसत्वादिकं च न लक्षणमेवं धूमवत्त्वं वह्निमत्वादित्यादौ वह्निसामग्र्याद्यभावविशिष्टसाध्याभावस्य पक्षवृत्तित्वेपि न महानसत्वपक्षवृत्तित्वमतो न त
त्राति व्याप्तिः सत्प्रतिपक्षोन्नायकत्वेन हेतुव्यापकतापक्षे साधनव्यापकस्यापि पक्षावृत्तेरुपाधित्वात्साध्यव्यापकसाधनव्यापकस्यापि पक्षवृत्तेरनुपाधित्वा स्त
न्नत्वादौ वह्निमान्धूमादित्यादौ वह्निसामग्र्याद्यभावविशिष्टसाध्याभावस्याधिकरणं ...त्यादि पर्वतो धूमवान्वह्नेरित्यादौ वाधितस्थले चार्द्रेन्धनाद्यव्याप्तिर्वा साध्यसमानाधिकरणत्वे
मन् नित्वेन तत्तद्धर्मविशेषणीयः। तेनायो गोलकं धूमवद्वह्नेरित्यादौ साध्यविरुद्धे जलत्वादौ नाति व्याप्तिरिति न कोपि दोषः। लक्षणतावच्छेदकस्योक्तलक्षणमा रामः
हस्य धर्मस्यतिपक्षाभावादिति। हवेवद्यानयेपं लक्षणतावच्छेदकं लक्षणं वह्नमेवायोगोलकं धूममवह्नेरित्यार्द्रेन्धनेयो न पतिपर्योतिव्यावर्तनेहीति। हिपक्षान

ध्याहत्तासहपक्षीभूते:घोगोलके धूमवत्त्वं आवर्त्तते धूमाभावो वर्त्तत इति योजना। एतेन लक्ष्यतावच्छेदकं योजितं। ननु तथापि
व्याप्यत्वगर्भतयाल्लक्षणात त्राव्याप्तमेव तत्र भावाधिकरणीभूते:घोगोलके पक्षवृत्तिधर्मस्य विशेषणस्य सत्वेन तद्विशिष्टसाध्याभावासत्त्वादित्यत आ
ह अत एवेति अर्थस्तु पूर्ववत्‌ ननु तथापि ध्वंसो न नित्यो जन्यत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापके भावत्वेना [redacted] पुर्वहिरिंद्रियप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापके उद्भूतरूपवत्वे च लक्ष्यतावच्छेद
कस्याव्याप्तिः नह भयत्र पक्षे उद्भूत साध्याभावसत्वे मानाभावादित्यत आह एवमिति अर्थस्तु पूर्ववत्‌ तथा चेति साध्याभावसिद्धेति सहार्थे तृतीया
साध्यसाधनेति साधनविशिष्टसाध्याभावग्रहो भवतीत्यर्थः॥ अतो लक्ष्यतावच्छेदकस्य न तत्राव्याप्तिरिति शेषः साध्यव्यावर्त्तकत्वादिति पक्षे सा
ध्यासमानाधिकरणत्वादित्यर्थः। स्वव्याघातकत्वं च पूर्वमेवोक्तः। अन्ये तु पक्षव्याहृत्येत्यत्र स्वरसात विनैव सर्वं ग्रन्थं समपक्रयोजयंति तथाहि पक्षस्य हेतो
र्व्याहृत्या हेतुना साधनस्य साध्यं निवर्त्तते साधनत्वसंबंधि साध्याभावः साधयितुं शक्यते साधनविशिष्टसाध्याभावः साधयितुं शक्यत इति याव
त् येन केनचित्संबंधित्वं पक्षधर्मः। अन्वयस्तु स्वयमिति अत्र तथा च येन केनापि संबंधेन यद्धेतुसंबंधिनो पक्षस्य धर्मस्य व्याहत्या हेतुना साधनविशिष्ट
साध्याभावः साधयितुं शक्यते स धर्मस्तन्निष्ठेनोपाधिरित्यर्थः संबंधिनइत्यंतस्य प्रयोजनं पूर्ववत्‌ न तु तत्तल्लक्ष्यसाधकत्वे परंतु पक्षधर्मव्याहत्या: सा
धनविशिष्टसाध्याभावसिद्धिस्वरूपयोग्यः स धर्म उपाधिरिति नैव लक्षणं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात गौरमित्रातनयः श्यामः मित्रातनय

चि॰टी॰ त्वादित्यादावुद्भूतसाध्याव्यापकोऽरूपवत्त्वस्य पाकजत्वादावव्याप्तिवारणाय साधनविशिष्टत्वं साध्यविशेषणं साधनपदं च पक्षवृत्तिधर्मपरं तेन विरुद्धस्थ
१२१ लीयोपाधौ वायुः प्रत्यक्षः प्रमेयस्पर्शवत्त्वादित्यादावुद्भूतरूपवत्त्वादौ च नाव्याप्तिः। नन्वेवं पर्वतो वह्निमान् धूमादित्यादावपि वह्निसामग्र्यादेरुपाधितापत्तिः तस्मा
व्यसहचरितेनाकृत्स्नसाध्याभावसिद्धिस्वरूपयोग्यत्वादित्यत आह स्वरूपयोग्यत्वमेवेत्य[illegible]न्तो निवेशितः स चेति पक्षाभावादिति पूर्ववद्व्याख्येयं। तथा च साध ल
नविशिष्टसाध्याभावव्याप्यत्वे सति पक्षतावच्छेदकवर्त्तमानत्वमेव स्वरूपयोग्यत्वमिति भावः साधनपदं पक्षवृत्तिधर्मपरं एवं सर्वत्र लक्षणानि ष्क
र्षक्तपूर्ववत्। योगोलकं धूमवद्वह्नेरित्यत्रार्द्रेन्धनेऽलक्षणं योजयति यद्येति तन्त्वार्द्रेन्धनाभावस्य कथं साधनविशिष्टसाध्याभावव्याप्यत्वमित्य
त आह व्यावर्त्तते हीति हि यस्मात् [illegible]वर्त्ततेऽव्याप्तिप्रतियोगित्वेनानुमीयते [illegible]योगोल[illegible]केऽपक्षीभूते। योगोलके न[illegible] तावता तदभावस्य उद्बुद्धसाध्याभा
वव्याप्यत्वेऽपि पक्षवृत्तिधर्मविशिष्टसाध्याभावव्याप्यत्वं न संभवति तदभाववति पक्षेऽनुद्बुद्धसाध्याभावसत्त्वेऽपि तादृशविशिष्टसाध्याभावासत्त्वादित्यत
आह [illegible] तदेवेति अर्थस्तु पूर्ववत् [illegible]ध्वंसो न नित्यो जन्यत्वात् वायुर्वहिरिन्द्रियप्रत्यक्षः प्रमेयत्वादित्यादौ भावत्वोद्भूतरूपवत्त्वाद्युपाधेरभाव
स्य जन्यत्वद्रव्यत्वादिरूपपक्षधर्मविशिष्टसाध्याभावव्याप्यत्वज्ञानात् तदभावे न हेतुना तादृशविशिष्टसाध्याभावानुमितिर्भवतु उद्बुद्धसाध्याभावानु
मितिः कथं स्यात् न च तदनुमितिविरहेऽपि न क्षतिरिति वाच्यं निरुक्तोपाधिज्ञानस्य पक्षेऽनुद्बुद्धसाध्याभावानुमितिद्वारैव दूषकत्वस्य स्वयमुपपादितत्वाद्विशिष्ट
साध्याभावानुमितेः उद्बुद्धसाध्याभावानुमितावप्रतिबन्धकत्वादित्यत आह। एवमिति निरुक्तसोपाधित्वदूषकत्वे इत्यर्थः। तज्ज्ञानादिति शेषः यद्यप्येव राम॰
वत् मित्यस्य यथायोगोलकं धूमवद्वह्नेरित्यत्रार्द्रेन्धनाभावस्य द्रव्यत्वादिरूपपक्षधर्मविशिष्टसाध्याभावव्याप्यत्वज्ञानानन्तरं तदभावे न हेतुना पक्षे तादृशविशि

ष्टसाध्याभावः सिद्ध्यात्तद्व्यत्वादेः पक्षवृत्तित्वबलात्तत्र तद्धसाध्याभावः सिद्ध्यतीति तथेत्यर्थः अन्यथा तत्र व्याप्त्येन तद्धशंकासंभवादिति भावः भावत्वव्याप्यत्वे
नसमजन्यत्वविशिष्टनिरूपत्वाभावाभावव्याप्यत्वज्ञानानंतरमिस्यादिः अत्रेपि तथेत्यस्य द्व्यत्वविशिष्टवृत्तिरिंद्रियग्राह्यत्वाभाववहिरिंद्रियग्राह्यत्वाभाव
व्याप्यत्वज्ञानानंतरमितिशेषः तथा चेत्यादिर्विंत्ययत्कसांख्ययिकव्याजनीयः साध्याव्यावर्त्तकत्वादित्यस्य तु निरुक्तसाध्याभावसिद्धिस्वरूपयोग्यत्वाभावादि
त्यर्थ इति कतंपद्धविवेकः। व्यतिरेकिधर्मत्वमिति केवलान्वयिनः प्रमेयत्वादेः स्वरूपसंबंधेन कुत्राप्यनुपाधित्वाद्व्यतिरेकित्वोपादानं तथा च तत्संबंधेन व्य
प्रतियोग्यनधिकरणीवर्तमानसाभावस्य प्रतियोगितानवच्छेदको यो धर्मस्तद्वत्वं तेन रूपेण तत्संबंधेन चोपाधित्वमिति फलितं तेन प्रमेयत्वादेः सम
वायादिसंबंधेनाभावप्रतियोगित्वेपि न स्वरूपसंबंधेनोपाधित्वं न वा स्वरूपसंबंधेन संयोगाभावादेरुपाधित्वं तेन संबंधेन तदभावाधिकरणाप्रसिद्धेः
संबंधविशेषलाभायैव च धर्मपदमिति भावः। ननूपाधेरिति तत्तत्साध्यकतत्तद्धेतुकोपाधेरित्यर्थ [illegible]ः। लक्षणमित्यनुपपत्ते धूमवह्निसंबंधोपाधि
विति धूमाव्यापकत्वे सति वह्निव्यापकत्वस्य वह्निसंबंधावच्छिन्नत्वेनाभिमतोपाधिपदवाच्यताप्रयोजकत्वादित्यर्थः व्यतिरेकिधर्मत्वावच्छिन्नोपाधिपदवाच्य
तावारणायाभिमतं तत्वाच्यताविशेषणं यद्यपि धूमव्यापकत्वे सति वह्निव्यापकत्वं पहिउपाधिपदवाच्यतावच्छेदकं स्यात्तदा तदवच्छिन्नोपाधिपदवा
च्यताश्रयः पक्षेनेरः स्यादित्यत आह नैवेयधिकरण्यं तथापि उपाधिपदवाच्यतावच्छेदकत्वं धूमाव्यापकत्वे सति वह्निव्यापकतासामान्यनिष्ठं स्यात्तदा पक्षे
तरह्यत्ति धूमाव्यापकत्वविशिष्टवह्निव्यापकत्वनिष्ठमपि स्यादित्यत आह ने तात्पर्यं। अन्यथा येति। धूमाव्यापकत्वविशिष्टवह्निव्यापकताप्रसिद्ध्या तद्द
टितापायाप्रसिद्धेश्चेत्यपि बोध्यं। ननु सामान्यलक्षणमिति तदभेदकं तत्तत्साध्यकं तत्तद्धेतुकोपाधिलक्षणं सर्वं दूषणोपयिकं तद्यत्किंचिद्धर्मावच्छिन्नत्तनस

१२२

चि॰ टी॰ ध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वेन विशिष्टसाध्यव्यापकोपाधौ नाव्याप्तिरित्यत आह। विशेषणलक्षणेति यत्किंचिद्धर्मावच्छिन्नतत्तत्साध्यव्यापकत्वे सति तत्त
त्साधनाव्यापकत्वरूपेण तत्साधकतत्तद्धेतुकोपाधिलक्षणाद्वयमर्थः। दूषकतोपयिक इति शेषः। वह्निधूमसंबंधे धूमवह्निसंबंधज्ञाने धूमवह्निव्याप्तिज्ञानमिति यावत्।
२ पक्षेतरस्येति पक्षेतरनिष्ठतद्रूपज्ञानस्य प्रतिबंधकत्वप्रसंगादित्यर्थः। न चेष्टापत्तिः पक्षेतरत्वादिनिष्ठसाध्यव्यापकत्वे सति साधनाव्यापकत्वज्ञानस्य प्रतिबंधकत्व
स्य सर्वसिद्धत्वेपि तन्निष्ठयत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वज्ञानस्य प्रतिबंधकतायाः [redacted] केनाप्यनभ्युपगमादिति भावः। ननु व्यति
रेकेणापक्षे साध्याभावो व्यापकत्वस्य लक्षणतानियामकत्वमते ह्रदो वह्निमान् धूमादित्यादौ साधनाव्यापकस्यापि वह्निसामग्र्यादेरुपाधित्वशंकापत्तिरिष्टाप
त्तिमाह केचित्त्विति। व्यतिरेकेणापक्षे साध्यव्यतिरेको व्यापकत्वस्य लक्षणतानियामकत्ववादिनस्त्वित्यर्थः। पक्षेति साधनस्य पक्षवृत्तित्वेन तद्व्यापकधर्मस्या
पि पक्षवृत्तित्वावश्यकत्वात् तस्योपाधित्वासंभवात्। यथोक्तस्य लक्षणतानियामकत्वमते पक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वस्योपाधिलक्ष
णत्वादिति भावः। अत्र दृष्टांतमाह यथेति। तद्वेति पक्षवृत्तित्वे हेत्वादिरित्यर्थः। ननूपाधेर्यथोक्तलक्षणस्य साध्येपि सत्त्वात् परार्थस्थले साध्यस्यापि साध्यतावच्छेद
करूपेणोपाधितयोद्भावनापत्तिरित्यत आह साध्यं चेति। नोपाधिः साध्यतावच्छेदकरूपेणोपाधितया नोद्भाव्यः। व्यभिचारसाधनेन ह्यभिचारादिरूपेण तत्सा
धनेऽन्यादिपदाज्ञद्भावपरिग्रहः साध्याविशिष्टत्वादिति साध्यव्यभिचारादिरूपस्य साध्यस्य विशेषादित्यर्थः। तथा च साधनादिरूपेण व्यभिचारादेरनिष्ट राम॰
येनिश्चये चोभयथैव तत् व्यभिचारादिना हेतुना साध्यव्यभिचाराद्यनुमितिसंभवात् न तस्योपाधित्वेनोद्भावनमिति भावः। ननु तथापि प्रसंदिग्धोपाधित्वेन तस्योपा

धित्वापत्तिरित्यत आह अनुमितिमात्रेति परार्थानुमितिमात्रेत्यर्थः एतदभावात् तदुद्भावनं तत्रैव परार्थानुमितिसंभवात् परंतु कथकसंप्रदा
यनिषिद्धत्वा न्न तदुद्भावनमित्येव तत्त्वं उपाधिसा मान्यलक्षणं उपाधिसामान्यं लक्षयित्वा विशेषलक्षणार्थं विभजते स चेति हेतुव्यभिचारसंज्ञापकत्वेने
ति साधनाव्यापकत्वसंदेहे साधने साध्यव्यापकत्व भिचारस्य साध्यव्यभिचारव्याप्यस्य संदेहात्साध्यव्यभिचारसंदेहः साध्यव्यापकत्वसंदेहे तु साधनाव्यापकव्याप्य
त्वस्य संदेहात् साध्ये साधनाव्यापकत्वसंदेहः व्याप्यसंदेहस्य व्यापकसंदेहहेतुत्वादिति भावः संदिग्धोपाधिः संदिग्धोपाधित्वं तेनात्रेत्यत्र सप्तम्यर्थस्य नान्वयः इ
त्यसंभवो ह्यलक्ष्यमाह पृथ्वीति शाकाद्याहारः परिणामित्वमिति शाकादिघटितपाकजन्यपाम सामग्रीमत्त्वमित्यर्थः तेन नाग्निमयं व्याप्त्यसंगतिः परार्थस्थलाभिप्राये
यं कृतेन चेति तेनैव मित्रातनयत्वे नैवं तत्पिताहशसामग्रीमत्त्वमपि साध्यमिति पक्षधर्मित्वशंकाधीनसाधनाव्यापकत्वसंदेहनिरसनाय वादिना साधनमित्यर्थः उपा
धित्वादिति संदिग्धोपाधित्वेनोद्भाव्यत्वादित्यर्थः ननु मित्रातनयत्वेन तेन तु न युगपदेवोभयं साधनीयं तत्र च श्यामत्वादेर्नोपाधित्वेन उद्भावनसंभवः साध्यस्योपाधि
त्वेनानुद्भाव्यत्वनियमादित्यत आह उभयस्यापीति श्यामत्वमात्रे हीति इदमुपलक्षणं युगपदुभयस्य साधने ऽप्येकांशेऽपरस्योपाधित्वेनोद्भावने बाधकाभावात् व्य
भिचाराद्यनुमाने साध्याविशिष्टतया स्वस्मिन् साध्ये एव स्वस्योपाधित्वेनानुद्भाव्यत्वनियमादिति ध्येयं नन्वेवमिति एवं साध्यसामग्र्या अप्युपाधित्वग्रहविषयत्वे च
धूमानुमानेऽपि च धूमानुमित्युपाधानस्थलेऽपि उपाधिः स्यात् उपाधि [illegible] त्वग्रहविषयः स्यात् इष्टापत्तौ चानुमितिसंभवादिति भावः अ
नौपाधिकत्वनियमादिति व्याप्यत्वनियमादित्यर्थः साध्यसामग्र्या अप्युपाधित्वग्रहविषयत्वे आचार्यसंवादमाह अत एवेति साध्यसामग्र्या अप्युपाधित्वग्रहविष
यत्वादेवेत्यर्थः नोपाधिः नोपाधित्वग्रहविषयः उपाधिः उपाधित्वग्रहविषयः क्वचिन्नोपाधिः क्वचिन्नोपाधित्वग्रहविषयः ननु सर्वत्रेति नोपाधित्वग्रहविषय इति शेषः

५१

त्रि·टी २२३ द्वितीयमुदाहरति यथेति तुल्येति साधनीभूतकार्यत्वनिष्ठसाध्यीभूतसकर्तृकत्वाव्याप्यताग्राहके सहचारग्रहे साधनीभूतकार्यत्वाव्यापकशरीरजन्यत्वादिनिष्ठसा
ध्यीभूतसकर्तृकत्वव्यापकताग्राहकसहचारग्रहरूपयोः योगक्षेमयोः अनुकूलतर्कसमवहितत्वे तुल्ययोः सतोरित्यर्थः उपाधेरिति कार्यत्वरूपसाधनाव्याप
कीभूतशरीरजन्यत्वादेः साध्यव्यापकतासंदेह इत्यर्थः तथा च क्षितिः सकर्तृका कार्यत्वादित्यत्र पक्षे साधने साध्यव्याप्यतानिर्णायकः साधनाव्यापकशरीरजन्यत्वादौ साध्य प
व्यापकतानिश्चायकः तर्को नावतीर्णः तदा शरीरजन्यत्वादिकं साध्यव्यापकतासंदेहात्संदिग्धोपाधिरित्यर्थः नच तत्ससंदेहे तु तत्पाकर्यन्तत्रोपाधिरिति वाच्यं संदेहे ताव
पि द्रष्टाविशेषे संदिग्धोपाधिकत्वे बाधकाभावादिति भावः तृतीयमुदाहरति यथा चेति शाकपाकजत्वस्येति साधनाव्यापकतया संदिग्धस्य शाकपाकजत्वे [illegible] मित्रा स
तनय[illegible]मित्रातनयत्वहेतौ शाकपाकजत्वमिति शेषः नवा हेत्वाभासांतरं नवा हेत्वाभासः निरनुयोज्येति तथा च स्वार्थानुमाने एवोपाधित्वे संदेहो दूषणानां तु परार्थानुमा
नेऽपीति भावः संदिग्धानैकांतिकवदिति अनैकांतिकत्वसंदेहवदित्यर्थः एतच्च दूषकमात्रे दृष्टांतः तेन व्यभिचारसंशयाधायकत्वे यस्य न क्षतिः दूषणत्वात् उपा
धित्वसंदेहस्य दूषकत्वात् उपाधिरिव उपाधित्वनिश्चयवत् [illegible]निश्चयाधायकतया व्यभिचारनिश्चयाधायकतया नच तथाप्युपाधित्वे संदेहः स्वरूपसन्नेव व्यभिचारसंदे
हद्वारा दूषको न तु तज्ज्ञानमिति तज्ज्ञानार्थं तदुद्भावनम फलमर्थांतरापादकं चेति वाच्यं तथा सति अनैकांतिकत्वसंदेहोपाधित्वनिश्चये पुद्भावनस्य तथात्वापत्तेः प
रिद्यानैकांतिकत्वसंदेहादिनासमव्याप्तिग्रहो माभूदिति ज्ञापनाय तदुद्भावने कथकसंप्रदायप्रसिद्धं तदुपाधित्वासंदेहात्समव्याप्तिग्रहो माभूदिति ज्ञापनायोपाधित्व
संदेहोद्भावनमपि कथकसंप्रदायसिद्धमिति तुल्यत्वादिति भावः॥ उपाधिर्दर्शिभागरल[illegible]संग्रहादुपाधेर्दूषकताबीजं निरूपयितुं शिष्यावधानाय प्रतिजानीते इदानीमि राम॰
ति उपाधिविभागानंतरमित्यर्थः दूषकताबीजं दोषप्रयोजकतास्वरूपं अनुमितितत्प्रयोजकान्यतरप्रतिबंधकत्वान्नं दोषः चिंत्यते नाप्यते केचित्तु दूषकताबीजं दू

षकव्यवहारविषयतावच्छेदकत्वाख्योपाधिशब्दयोः पर्यायतापत्यादूषकशब्दस्य पारिभाषिकतायास्तावच्चयथोक्तलक्षणास्यतद्विषयतावच्छेदकत्वासंभवात्तु
तिभावः उत्पादुः तस्मात् तथाच तस्यतादृशानुमितिप्रयोजकत्वं नान्यदूषकमिति फलितं एवं च सत्प्रतिपक्षे साध्याभावसाधकहेतोरुपन्यासानंतरं वादिना सा
ध्याभावसाधकहेतावुपन्यस्ते सत्प्रतिपक्षे उपाध्युद्भावनं न स्यादित्यग्रिमग्रंथासंगतेः स्वव्यतिरेकेति लिंगतावच्छेदकविषयास्वव्यतिरेकलिंगकपक्षवि
शेष्यकसाध्याभावानुमितिप्रयोजकत्वमित्यर्थः तृतीयार्थोऽभेदः सत्प्रतिपक्षांतरवदिति साध्याभावसाधकहेत्वंतरस्य पर्यनुयोज्योद्भावनं तथोपाधेरप्युद्भावनं
न स्यादित्यर्थः साध्याभावसाधकहेतुज्ञानात्मकप्रतिबंधकसद्भावादुपाधेस्तत्र यथोक्तदूषकत्वासंभवेन वैयर्थ्यत्वादिति भावः सत्प्रतिपक्षस्थानुत्थाने
ति साध्यसाधकानेकहेतुमत्ताज्ञानसत्वेनेत्यर्थः साध्याभावसाधकहेतुमत्ताज्ञानसत्वेपि साध्यानुमितेरुत्पादादिति शेषः अधिकबलोन्नायकेति
ति साध्याभावसाधकानुमितिप्रतिबंधकसाध्यानुमितस्यैवेत्यर्थः नचैवं सत्प्रतिपक्षांतरस्याप्युद्भावनायुक्तिरिष्टत्वात् इति भावः शक्तमपीति
न्यापात् तांत्रिकप्रवादात् तथाच साध्याभावसाधकहेतुज्ञानसत्वे साध्यसाधकानेकहेतुज्ञानां साध्यानुमित्युत्पादेन तत्र वाद्याघातः अंधानां दे
साध्याभावसाधकहेतुमत्ताज्ञाननिष्ठाप्रामाण्यज्ञानाद्यभावविशिष्टज्ञानविषयानां साध्यसाधकहेतूनां ज्ञातमपि न पश्यति न साध्याभावसाध
कैकहेतुमत्ताज्ञानसत्वे साध्यानुमितिं जनयतीति तदर्थादिति भावः ननु तन्न्यायोऽप्रमाणमित्यत आह एकेनापीति तदभावसाधकैकहेतुमत्ता
ज्ञानेनापि तत्साधकानेकहेतुमत्ताज्ञानानां फलप्रतिबंधस्यानुभवसिद्धत्वादित्यर्थः नन्विदमसंभवि नह्यज्ञातानं जनिततदभावव्याप्यत्वयोधर्मि

२२४ नी० वनात्तानात्पीत्यर्थः अनुमितेरिति संबंधः क्वाचित्कः पाठः अनुपश्चादनुमितेर्विशिष्टमितिविरहात्तदित्यर्थः अनुमितेरित्युकारसंवलिततयाऽपि अनु
पश्चात्तमितेर्विशिष्टबुद्ध्यभावस्य प्रमितेरित्यर्थः ननु सत्प्रतिपक्षे नानुमानदूषणार्थमुपाध्युद्भावनमपि तु हेतुदुष्टत्वा प्रतिपक्षधर्मतान्यतरभंगकल्प
नामपेक्ष्यैकत्र तत्कल्पनैव लघीयसीति लाघवतर्कसहकृतप्रमाणात्सत्प्रतिपक्षे हेतुमज्ञापरामर्शेऽप्रामाण्यग्रहार्थमेव तदुद्भावनमत एवास्माकं न्या
पातस्य ज्योवहवस्येति प्रमाणटीकापि किंच यन्न वादिप्रतिवादिभ्यां साध्यतदभावसाधकन्यायमात्रमनुक्तं मध्यस्थस्य चैकत्रापि हेतावनुकू
लतर्कास्फूर्तौ व्याप्तिनिश्चयो जातस्तत्रैवोपाध्युद्भावनं सफलमन्यत्र च तदुद्भावनं निष्फलमेव अन्यथा व्यभिचाराद्युत्थापकतया दूषकत्वं वादिनाम
प्येतद्दोषस्य दुरुद्धरत्वात् व्याप्तिनिश्चयसत्त्वे न व्यभिचारादिज्ञानसाध्यसंभवादित्यरुचेराह संदिग्धोपाधेरिति उपाधित्वसंदेहदशायामुपाधे
र्दूषकत्वापत्तेरित्यर्थः तद्व्यतिरेकस्य संदिग्धत्वादिति पाठः तद्व्यतिरेकस्य तदानीं साध्याभावव्याप्यतया तदानीं संदिग्धत्वादित्यर्थः क्वचित्तु तद्व्य
तिरेकस्य पक्षे संदिग्धत्वादिति पाठः तत्र संदिग्धोपाधेरित्यस्य पक्षवृत्तितासंदेहदशायामुपाधेरित्यर्थः अग्रे च पक्षवृत्तिरित्यस्य पक्षवृत्तितया निश्चि
तत्वेत्यर्थः ननु सत्प्रतिपक्षतयोपाधेर्दूषकत्वादिनये उपाधित्वादिसंदेहदशायां उपाधेर्दूषकत्वे उक्तापत्तिरेवेत्यत आह अपि चेति उपाधित्वं न स्या
न्नुपाधेर्दूषकत्वं न स्यात्तद्व्यतिरेक इति तद्व्यतिरेकस्यासाधारण्यत्वादित्यर्थः पक्षमात्रवृत्तित्वस्यासाधारण्यरूपत्वादिति भावः। ननु पक्षमात्रवृत्ति राम०
त्वरूपासाधारण्यप्रहाणं नानुमितिविरोधि किंतु यावत्पक्षव्यापकत्वरूपतज्ज्ञानमेव तथा च तदत्र नास्ति पक्षस्यैव विपक्षत्वादित्यत आह पक्षवृत्तित्वे

तिपक्षवृत्तिताज्ञानदशायामुपाधिर्दूषको न स्यादित्यर्थः स्वात्मंत्रेणेति स्वाश्रयविषयकलौकिकसाक्षात्कारविषयान्यत्वे सति लौकिकसाक्षा
त्कारविषयत्वादित्यर्थः त्र्यसरेणुरात्मा वा दृष्टांतः व्यभिचारस्तु गंधादौ अश्रावणत्वमिति ग्राह्यं स साधनाव्यापकत्वात्पक्षवृत्तित्वादिति पक्षवृत्तिता
ग्रहादित्यर्थः तल्लक्षणेति साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपस्योपाधिलक्षणस्य सत्त्वादित्यर्थः अन्यथापीति पक्षवृत्तित्वं विनापीत्यर्थः प
क्षवृत्तिताभ्रमेणेति शेषः दूषकत्वसंभवात् कदाचित् दूषकत्वसंभवात् दूषकतातिप्रसंगस्यादोषत्वादिति भावः केचित्तु ननु तन्नोपाधिलक्षणम
पि तु पक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेव तल्लक्षणं तच्च तन्नास्ति यथोक्तस्य दूषकत्वरूपत्वान्यथानुपपत्त्या तथैव कल्पनादित्य
त आह अन्यथापीति यथोक्तरूपभिन्नस्यापि दूषकस्य संभवादित्यर्थः तथा च किं सकलप्रामाणिकव्यवहारविषयस्य तस्यानुपाधित्वाभ्युपगमे
नेति भाव इत्याहुः ननु सत्प्रतिपक्षोन्नायके न दूषकता वादिनो मम पक्षवृत्तित्वग्रहदशायामुपाधेरदूषकेऽष्टापत्तिरेवेत्यत आह किं चेति साध्यव्याप्य
त्वेति साध्यव्याप्यतया निश्चितस्य साधनस्याव्यापकताज्ञानेनोपाधेः साध्यव्यापकत्वज्ञाने इत्यर्थः सत्प्रतिपक्षः साध्याभावग्रहः अव्यापकव्यति
रेकादिति अव्यापकतया प्रवृत्तितस्य व्यतिरेकात् अव्याप्यतया गृहीतस्य व्यतिरेकग्रह इत्यर्थः असिद्धत्वेनेति हेतुविशेष्यकव्याप्यभावप्रका
रकज्ञानस्यानुमितिकारणीभूतव्याप्तिग्रहप्रतिबंधकस्याविरोधाविषयाप्रयोजकत्वेनेत्यर्थः दूषकत्वमिनमनुषज्यते तृतीयार्थश्च पूर्ववत् उपा
ध्यभावस्य व्याप्तित्वे हि उपाधिव्याप्यभावरूपतया दूषकः स्यात् तमदेव च स्थितौ सिद्धिबाधानान्निराकृतमित्याह अनौपाधिकत्वेति उपाधिर्न दू
षकः किं तु व्याप्यत्वासिद्धिरूपहेत्वाभासांतर्गत एव स इति कस्यचिन्मतं दूषयति नापीति अनौपाधिकत्वज्ञानस्य उपाधित्वप्रकारकोपाधिज्ञा

चिं० १२५ नाभावस्य व्याप्तिज्ञानकारणीति व्याप्तिज्ञानकारणीभूताभावप्रतियोगिज्ञानविषयतयेत्यर्थः व्याप्यत्वासिद्धेर्व्याप्यत्वासिद्धेः साधारण्यादिभिन्नव्याप्तिग्रहप्र
तिबंधकज्ञानविषयस्यैव व्याप्यत्वासिद्धत्वा[illegible]दिति भावः दूषयति नहीति अन्यस्य साधनभिन्नस्य अन्यस्य व्याप्तिज्ञाने साधनभिन्नान्यस्य व्या
प्तिज्ञा[illegible]ने साधनस्य व्याप्तिज्ञानउत्पत्ति यावत् स्वतः प्रतिबंधकमिति साक्षात्प्रतिबंधकमित्यर्थः भिन्नधर्मिकत्वादिति भावः तथा चानुमितितत्करणज्ञा
नान्यतरं प्रति साक्षात्प्रतिबंधकज्ञानविषयस्यैव च हेत्वाभासतया कथमस्य हेत्वाभासेंतर्भाव इति हृदयं भिन्नधर्मिकत्वं पीत्यरन्नाहनचेति साध्य
व्यापकेति अव्याप्यतासंबंधेन साध्यव्यापकवज्ज्ञानेनेत्यर्थः तथा च तद्विषयकत्वेनैवोपाधिर्व्याप्यत्वासिद्धेर्नगर्त इति भावः साध्यव्यापकेति अ
व्याप्यतासंबंधेन साध्यव्यापकाभाववज्ज्ञानमित्यर्थः येनेति जनकीभूतज्ञानं विघटयन् एव ग्राह्याभाववगाहिनो ज्ञानस्य प्रतिबंधकत्वनिय
मादिति भावः तत्किमव्याप्यतासंबंधेनोपाधिमज्ज्ञानं व्याप्तिज्ञानविघटकमेव न भवतीत्यत्राह किंत्विति साध्यव्यापकेति अव्याप्यता
संबंधेन साध्यव्यापकोपाधिमज्ज्ञानेनेत्यर्थः साध्यव्यभिचारेति व्याप्तिज्ञानं विघटयत इति शेषः एतच्च समाधिसौकर्याद्युक्तं वस्तुतो अव्याप्य
तासंबंधेन हेतावुपाधिमज्ज्ञाननिष्ठप्रतिबंधकत्वेप्युपाधेर्न व्याप्यत्वासिद्धित्वसंभवः उपाधिविशिष्टहेतुनिरूपितविषयत्वस्यैव व्याप्तिग्र
हप्रतिबंधकतानियमतया तद्विशिष्टहेतोरेव तथात्वसंभवात् अन्यथा व्याप्यत्वासिद्ध्यंतर्गतसाध्यादेरपि प्रत्येकं व्याप्यत्वासिद्धित्वापत्तेरिति हेत्वाभा
सेषु व्युक्तं ननु उपाधिर्दूषकएव दूषकत्वं तु स्वव्यभिचारलिंगकसाधनपक्षकसाध्यव्यभिचारानुमितिप्रयोजकत्वेनेतिमतं दूषयति नापीति दूष राम०
कमित्यनुषज्यते स्वतीयार्थस्तु सर्वत्र साध्यव्यापकव्यभिचारित्वेनेति साध्यव्यापकोपाधिव्यभिचारित्वेनेत्यर्थः तथेति तत्त्वमिति शेषः साध्यव्याप्येति

...तीसाध्यव्याप्यसाधनाव्यापकत्वेनेत्यर्थः साध्याव्यभिचारित्वं साध्यव्यापकत्वं व्याप्तिग्राहकेति उपाधिनिष्ठसाध्यव्यापकताग्राहकसहचारादिग्र
हहेतुनिष्ठसाध्यव्याप्तिग्राहकसहचारादिग्रहयोस्तुल्यत्वादित्यर्थः साध्यव्यापकाव्याप्यत्वेनेति साध्यव्यापकस्वाव्याप्यत्वलिंगेनेत्यर्थः [illegible]प्तिविरहेति व
साधनपक्षकसाध्यव्याप्तिविरहानुमितिप्रयोजकतयेत्यर्थः दूषकत्वमित्यनुषज्यते साध्यव्याप्येति साध्यव्याप्यसाधनेत्यर्थः उपाधिर्हेत्वाभासांत
रमिति आभासस्यदोषस्यापोहेतुः प्रयोजकः तस्मादंतरमितिवृत्तमसा उपाधिरदूषक इत्यर्थः राजदंतादित्वात्षष्ठीतत्पुरुषसमासेपि हेतुशब्दस्य पूर्वनि
पातः केचित्तु हेत्वाभासांतरमिति बाधसत्प्रतिपक्षाद्यतिरिक्तो ऽनुमितिसाक्षात्प्रतिबंधकज्ञानविषयो हेत्वाभास इत्यर्थ इत्याहुः तदसत् तर्कज्ञान
विघटकतयाग्राह्याभावावगाहितया चानुमितिप्रत्यपि साक्षात्प्रतिबंधकत्वासंभवादिति ध्येयं ॥ दूषकताबीजस्य पक्षरहस्यं ॥ तर्कादिनेति साध्य
व्यापकत्वादिनिश्चयसामग्र्यादिनेत्यर्थः आदिपदात्तत्संशयसामग्रीपरिग्रहः निश्चितेत्यादिनेह दूषकताबीजचिंतनं दूषकत्वस्य धर्मिणाः सत्वं य
दि चेति पराचेत्यर्थः साध्यसाधनसहचारदर्शनेन साध्यसाधनयोर्नियतसहचारदर्शनेन साध्यसाधनयोर्व्याप्यत्वनिश्चयेनेति यावत् साध्य
व्याप्यसाधनाव्यापकतया साध्याव्यापकत्वनिश्चयादिति शेषः निश्चयस्य वक्तानमेव उपाधित्व[illegible] निश्चयाभावात् उपाधित्वज्ञानाभावात् दूषक
त्वेव दूषकताधर्मेव्यक्तवहिर्भावितिकुतस्तत्कालीनदूषकतायामनुमितिकारणाप्रवृत्तिवंकर्थं ज्ञानप्रयोजकरूपत्वमाश्रयाहनुमितिप्रतिबंधकज्ञान
प्रयोजकतारूपत्वचिंतनमित्यर्थः किंचेति यत इत्यर्थे सत्प्रतिपक्षतयेति स्वव्यतिरेकलिंगकसाध्याभावानुमितिप्रयोजकतयेत्यर्थः व्याप्यत्वा
सिद्धितयेति व्याप्तिविरहरूपत्वेनविशेषणताविधया हेतुविशेष्यकव्याप्यत्वाभावप्रकारकज्ञानप्रयोजकतयेत्यर्थः स्वोक्तं व्योपायेति [illegible]तदितरह

१२८ दी.

येणावेत्यर्थः तद्रूपं व्याप्यत्वलिंगकहेतुपक्षकसाध्यव्याप्तिविरहानुमितिप्रयोजकत्वं यस्मात्साध्यव्यभिचारज्ञानप्रयोजकत्वं चेति भावः साध्यव्यापकतानि
रूपः तद्रूहवक्तव्य व्यपेक्षणीयः व्यभिचारज्ञानद्वारेणानुमानस्य व्यभिचारप्रमासप्रयोजकत्वेपीत्यर्थः अतो नाग्निमेरा[illegible]योन तज्ज्ञानमानस्य व्यभिचारनिरूपे
त्वपाधिज्ञानस्य विशेषदर्शनतयोपयोगित्वेन तद्विषयतयोपाधेरपि तत्प्रयोजकतादिति भावः साध्यव्यापकाव्याप्यत्वेनेति स्वनिष्ठसाध्यव्यापकता
वच्छेदकरूपावच्छिन्नाव्याप्यत्वेन हेतुना हेतौ साध्यव्याप्तिविरहानुमितेः प्रयोजकतयावेत्यर्थः एतच्चोपाधित्वनिरूपणमधिकृत्य उपाधित्वसंज्ञायस्यानुसाध्य
व्यभिचारवत् साध्यव्याप्तिविरहस्यापि संज्ञापंचतेव क्वचित्प्रयोजकत्वं तत्र साध्यव्या[illegible]प्तिविरहपदं साध्यवत्त्याहनित्यविशिष्टसाध्यवद्वृत्तित्वरूपव्याप्तिवि
रहपरं नतु स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिविरहपरं स्वत्वस्यानुगतस्याभावेन पक्षीभूतसाधनव्यक्तिपर्यवसन्नतयासा[illegible]ध्येधासिद्धेः [illegible]न स्वस
मानाधिकरणासंताभावप्रतियोगिकत्वं साध्यव्याप्तिविरहत्वमपि निरस्तं स्वत्वस्यानुगतस्याभावेन पक्षीभूतसाधनव्यक्तिपर्यवसाने साध्यप्रसिद्धेर्मात्रे
तौ णोवक्तुतार्थतयाहेतरनुमानवैफल्यापत्तेरितिध्येयं कालभेदेन व्यवस्थितविकल्पमाह यद्वेति साध्यव्यापकेति साध्यव्यापकोपाध्यभाववद्वृत्तित्वे
नेत्यर्थः उभयं हेतावनुमेयं तथा च क्वचित्साध्यव्यभिचारानुमितिप्रयोजकतयाप्युपधेर्दूषकत्वमिति भावः एतदपि निष्कृष्टपरज्ञायां व्यवहृतम् इ ति
दं च पर्यवसितसाध्यव्यापकत्वे सति पक्षावृत्तित्वरूपोपाधित्वज्ञानस्य दूषकताबीजमुक्तं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वरूपोपाधि
त्वज्ञानस्य तु सत्प्रतिपक्षोन्नायकत्वं क्वचिद्बाधोन्नायकत्वं च दूषकताबीजं बोध्यं सत्प्रतिपक्षोन्नायकत्वं च पक्षे साध्याभावव्याप्योपाध्यभाववत्तानिरूप ताम०
प्रयोजकत्वं बाधोन्नायकत्वं च पक्षे साध्याभावानुमितिप्रयोजकत्वं तच्च पक्षेनुन्नायकत्वं साध्यव्याप्यहेतुमत्तानिरूपविरहस्यापि पक्षे साध्याभावव्याप्योपाध्य

न्तानि स्वव्यवहारावसेयं व्याप्तिविरहानुमाने व्यभिचारानुमाने चोपाधिमाशंकते नचेति पक्षीभूतसाधनाभाववद्वृत्तित्वमित्यर्थः व्यभिचारस्फुटता
र्था यामेवोपाधिना व्याप्तिविरहावनुमानाव च्चाधिकरणेहेतोः साध्यव्यभिचारित्वं तदितरधर्मेणास्य साध्यव्यापकत्वग्रह इति भावः नुपाधिमा
त्रेति व्यतिरेकि साधनको याधिव्यभिचारमात्रस्य तादृशोपाधे[illegible]व्याप्यत्वमात्रस्य च निरुपाधित्वोच्छेदप्रसंगादित्यर्थः केवलान्वयिनि पक्षी
भूते पक्षीभूतसाधनाभावस्याप्रसिद्ध्या तद्वृत्तित्वस्योपाधित्वासंभवेपि तदितरेके पक्षीभूते सर्वत्रैव तदुपाधितापत्तेरव च त्वादिति भावः [illegible]यति
पक्ष इ[illegible] यथा सत्प्रतिपक्षे स्वं साधनव्यतिरेकस्योपाधित्वनियमे सत्प्रतिपक्षमात्रस्य निरुपाधित्वोच्छेद इत्यर्थः [illegible]हृजीति व्याप्तिविरह साधना
भिव्यपरो[illegible]ं साधनाव्याप्यत्वस्य तन्त्रोपाधित्वाभिधाने तु नैतद्दोष इति ध्येयं संयोगादाविति एतच्च साधनाभाववद्वृत्तित्वं यथाश्रुतमभिप्रेत्य सा
ध्याभावीपानिरवच्छिन्नाधिकरणतावद्वृत्तित्वस्योपाधित्वाभिधाने तु नायं दोष इति ध्येयं "उपाधिदूषकतावीज[illegible]ं" उपाधिं निरूप्य तदाभासानग
णापि तं शिष्यावधनाय प्रतिजानीते अथेति उपाधिनिरूपणानंतरमित्यर्थः उपाध्याभास इति निरूप्यंत इति शेषः असाधारणाविपर्यासीति
असाधारणो विपर्ययो व्यतिरेको यस्येति बहुव्रीहिः साध्याभावे साध्ये इति चाहोपुरुषीयं [illegible] यद्भावः साध्ये ऽसाधारणो भवति स उपाध्याभा
व स इति अर्थः असाधारणपमिह सर्व सपक्षविपक्षे व्यावृत्तमात्रं साध्यमात्ररूपसाध्यवद्वृत्तित्वमिति यावत् तथा च यद्भावः साध्याभाववद्वृत्तिः
स उपाध्याभास इति फलितं तस्य साध्यव्यापकत्वाभावेनानुपाधित्वादिति भावः अस्योदाहरणमाह यथेति केवलान्वयिसाध्ये साध्याभाव

प्रसिद्ध्याऽन्वयव्यतिरेकिणीत्युक्तं अन्वयसाध्यतावच्छेदकसंबंधस्तदवच्छिन्नव्यतिरेकप्रतियोगिनीत्यर्थः जलह्रदो वह्निमान् द्रव्यत्वादित्यादौ ह्र-
देतरत्वादेर्व्यतिरेकस्य साध्याभाववद्वृत्तित्वविरहाद्बाधोन्नीतान्येति पक्षविशेषणं साध्याभाववत्तया प्रमितान्येत्यर्थः तथाच पर्वतो वह्निमान् ह्र-
मादित्यादौ पर्वतेतरत्वादिकमिति भावः प्राचस्तु साध्याभावे साध्ये इत्यादौ न प्रकरणीयं असाधारणत्वं च सर्वसपक्षविपक्षव्यावृत्तत्वं प्रकृते न सा-
ध्यवत्तयानिश्चितव्यावृत्तत्वे सति सकलसाध्याभाववत्तानिश्चितव्यावृत्तः सउपाध्याभासस्तदर्थः अत एवोदाहरणे केवलव्यतिरेकिणि सपक्षस्य
केवलान्वयिनि च विपक्षस्याप्रसिद्ध्यात् न तत्पक्षेतरत्वं कारणायान्वयव्यतिरेकिणीत्युक्तं वह्निरनुष्णः कृतकत्वादित्यादौ पक्षस्यैव विपक्षतया व-
ह्नीतरत्वस्य तद्व्यावृत्तत्वान् न हारणाय बाधोन्नीतान्येत्युक्तं ॥ साध्याभाववत्तयानिश्चितान्येति नहर्थः उदाहरणं भूर्नित्या गंधवत्त्वात् भूरनि-
त्याभिन्नभिन्नत्वादित्यादौ केवलव्यतिरेकिण्यपि पक्षेतरत्वमुदाहरणं बोध्यं तत्र सपक्षप्रसिद्धत्वादिति वदंति न सत् ॥ वह्निरनुष्णः कृतकत्वा-
२ दित्यादौ बाधोन्नीतपक्षेतरत्वेति व्याप्तिवारणाय विपक्षव्यावृत्तत्वेन साधारणकत्वेपि सपक्षव्यावृत्तत्वस्य फलसमर्थत्वात् पृथिवीतरेभ्यो भिद्यते
द्रव्यत्वादित्यादौ [redacted] केवलव्यतिरेकिण्यपि पक्षेतरत्वं सोपाध्याभासस्तथा न हारणस्यासमुक्तत्वात् किंचैवं वह्निरनुष्णः कृतकत्वादित्या-
दौ बाधितेयदासौ राली काहावेवसाध्याभावनिश्चयो ननु पक्षेतरापक्षेतरत्वसोपाध्याभासतापत्तिः एवं ध्रुवामतवह्निरित्यादौ आर्द्रेधनाद्यधिकरणा राम०
एवं साध्यतद्भाववत्तोर्निश्चयो ननु तदनधिकरणोतरानंत्रार्द्रेधनादेरुपाध्याभासतापत्तिः न चेष्टापत्तिः साध्याव्यापकत्वादेरुक्तदानीमपि सत्वेनाभास

नापांवीजाभावात् नव्यमते उपाधित्वज्ञानस्य पक्षे साध्याभावव्याप्योपाध्यभाववत्ताज्ञानद्वारानुमितिप्रतिबंधकत्वं तन्मते तदानींतेषामभावे सा
ध्याभावव्याप्यत्वज्ञानासंभवत्वेनोपाध्याभासत्ववीजमिति वाच्यं असाधारण्यज्ञानस्यानुमितिं प्रत्यपि प्रतिबंधकतया तत्त्वेपि साध्याभावव्याप्यत्वज्ञानेन बा
धकाभावात् असाधारण्यज्ञानस्यान्वयसहचाराग्रहप्रतिबंधकतया व्याप्ति[illegible]मितिज्ञानप्रतिबंधकत्वस्य[illegible]सेप्यन्वयव्याप्तिज्ञानं प्रत्येव प्रतिबंधकतया तत्त्वेपि सा
ध्याभावस्य व्यतिरेकव्याप्तिज्ञाने बाधकाभावाच्चेति ध्येयं। अप्रसिद्धसाध्यविपर्ययः पक्षवृत्तिसाध्यस्य साध्यतावच्छेदकरूपेणाभावो लीकः अत्यंताभावप्रतियो
गितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्याप्रसिद्धिरिति यावत् पक्षेतरत्वे हेतुरित्यादिस्थलात् पक्षेतरातिरिक्तवस्तुमात्रवृत्तिग्रहः केवलान्वयिनि साध्ये कचित्सा
ध्यव्यापकत्वस्य कचित्साधनाव्यापकत्वस्य विरहात् क्लृप्तमात्रस्यैवोपाध्याभासत्वादिति भावः बाधितेति। अव्याप्यतासंबंधेन बाधितः साध्यविपर्ययो
यत्रेति तथा च साध्याभावव्याप्य इत्यर्थः अकृतकत्वमिति न विद्यते कृतं कार्यं यस्येति व्युत्पत्त्या जन्यधर्मानाश्रयत्वमित्यर्थः। पक्षः साधनवाक्यान्तरहेतुविपर्यय
उभयमप्यसत् संज्ञापदत्वप्रोक्तं न प्रमेति इत्यभिधानस्यानुपयुक्तत्वापत्तेः। निद्रादिजन्यपदार्थोपस्थितेर्न संज्ञापदत्वप्रमासाधारणकारणत्वमित्यस्यैव वक्तुमुचित

१४

चिं॰टी॰
१४३

त्वात् ननु येन ज्ञानलक्षणासंनिकर्षस्य प्रत्यक्षाजनकतया न धीर्विशिष्टप्रत्यक्षत्वेपि निद्रादिजन्योपस्थितेस्तत्र दृष्टसाधारणकारणाभावासंभवात्॥ [illegible] नु प्राणुक्तसं
न्नायस्तत्प्रत्यक्षस्थले बहिरिंद्रियलौकिकसंनिकर्षं विना मिबाह्यार्थविषयकविशिष्टप्रत्यक्षजनने कनशक्तिकेन मनसा प्रवृत्तेऽपि तेन विनाविशिष्टप्रत्यक्षं जनयतु नवै
नवारणीयं नेत्नु मतिभियासामग्री कार्यं नाजविष्यति। [illegible] बहिरिंद्रियव्यापारं विना मनसा बाह्यार्थविषयकविशिष्टप्रत्यक्षजनने दोषस्य सहकारितया प्रवृत्तेर्दो
षाभावादेव न विशिष्टप्रत्यक्षजननसंभव इति॥ [illegible]दोषं विना महत्त्वः संयोगवान्नवेत्यादिकोटिद्वयप्रमात्मकसंशयजनने दोषस्य व्यभिचारादिमत आह। [illegible]
मि लौकिकसंनिकर्षाजन्यसंशयस्वभावितमर्थः। न प्रमेन विशिष्टप्रत्यक्षरूपौ किंतु स्मरणात्मकधर्मिज्ञानविशेषणज्ञानरूपौ। निद्रादेरिति पंचमी। नि
द्रादिसहकारादित्यर्थः॥ प्रमाणांतरत्वं मनसः प्रमाणत्वं मनस्योवहिरिंद्रियलौकिकसंनिकर्षं विना बाह्यार्थविषयकविशिष्टप्रत्यक्षकारणत्वमिति पावन्[illegible]
ह्ये निद्रादेरिस्वस्थतिदृप्तिहामनःसंयोगः तस्यादिः कारणमिति वृत्तमानमन्यसमर्थः न चैति॥ इंद्रियार्थसंनिकृष्टे धूमे इति शेषः॥ न[illegible]व्याप्तीति सधूमो वह्नि
व्याप्य इति विशिष्टस्मरणाद्यभावत्वापामिति शेषः। नव्याप्यत्वानुभावकेनेति तद्धूमे वह्निव्याप्यत्वानुभावकत्वाभावादित्यर्थः। मानसत्वप्यत्वया ऽनंगीकारात्
विशिष्ट[illegible]व्यवहारं प्रति विशिष्टज्ञानस्य हेतुत्वादिति भावः। [illegible]व्याप्यत्वानुभवादिति स्वं दृशो धूमत्वादौ वह्निव्याप्तिव्याप्यत्वस्मरणात्सधूमत्वादिना तद्धूमे धूम
त्वादिमत्वांस्मरणास्यच सत्वात्तयसानुनताहृशस्मरणांतरात्संसर्गाग्रहादेवेति भावः। न च त्वम तेऽसति। वह्निव्याप्तिव्याप्यधूमत्व धूमवह्निव्याप्तिव्याप्यधूम
त्वं तद्धूमविशिष्टस्मरणाद्यभावात्तद्धूमस्यासंनिकृष्टत्वेन च प्रत्यक्षिकतादृशाविशिष्टस्य गमनीस्यासंभवात् न व्याप्तभवन्मते एवं तादृशविशिष्टस्य गमनीवि
रहद्रष्टायांतादृशविशिष्टव्यवहारोन स्यादिति भावः॥ व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानाभावाद्वह्निव्याप्यवानयमिति शाब्दज्ञानजन्यानुमितौ स्वमते राम॰
व्यभिचारमुद्धरति॥ अत एवेति यत एवानींद्रियादौ व्यभिचाराद्विशिष्टज्ञानं नकारणमपि तु व्याप्यतावच्छेदकधर्मावच्छेदेन व्याप्तिग्रहतत्प्रकारकपक्षधर्मताज्ञानं

कारणमत एवेत्यर्थः। वह्निव्याप्यवानयमिति ज्ञानाव्यवहितोत्तरमिति शेषः। व्याप्तिज्ञानवत इति। व्याप्तिस्मरणवत इत्यर्थः॥ अत एव वह्निव्याप्यत्वस्य व्याप्य-
तावच्छेदकप्रकारत्वादिति भावः॥ यद्वेतीयधूमे इति। धूमत्वरूपेण धूमे पर्वते न हतिलिङ्गज्ञाने इत्यर्थः॥ वह्निव्याप्यः वह्निव्याप्यो धूमः अयं न वा पर्वतवान्न वाऽ-
स्मन्मते च वह्निव्याप्यो धूमः पर्वतनवानिति विशिष्टनिश्चयाभावान्न तदानीमनुमितिरिति भावः। स्मरणेऽविद्यमाने इति॥ धर्मितावच्छेदकप्रकारकधर्मिस्म-
रणेऽविद्यमाने इत्यर्थः। धूमत्वज्ञानस्य धूमत्वेन रूपेण पर्वतवत्तानिश्चयस्य विशेषदर्शनत्वेन व्यावर्तकधर्मदर्शनत्वेन॥ अग्रे यथेति। यदि तत्र न सं-
शयस्तदेत्यर्थः॥ संशयानन्तरमिति शेषः। पश्चान्मनोयोगिकुतो न स्यादिति तत्र वह्निव्याप्यो धूमः पर्वतनवानिति विशिष्टनिश्चयस्याप्याय[illegible]निःसै-
वानुमितिसामग्री तस्या एव तत्र व परामर्शसामग्रीत्वादित्यर्थः॥ तस्मात्तत्र संशयो न जायते किन्तु विशिष्टविश्चय एव जायते ततोऽनुमितिरिति त्वया-
पि स्वीकरणीयमिति भावः॥ ननु मम विशिष्टनिश्चयस्याप्यापत्तिर्नास्ति संशयस्य प्रतिबन्धकत्वादित्याशंकते संशये न प्रतिबन्धादिति न विशिष्टनि-
श्चयस्यापत्तिरिति शेषः। तुल्यमिति। ममाप्यनुमितिं प्रति संशयः प्रतिबन्धक एव च इत्यर्थः॥ एतच्चाभ्युपगमवादः। नादृशसंशयस्यानुमितिप्रति-
रिक्तप्रतिबन्धकत्वकल्पने गौरवात्। व्यक्तत्वविशेषदर्शनसत्वात्संशय एव न जायते इत्यत्रैव निर्भरो बोध्यः। अत एव तत्रैव दर्शकतो। नचेति [redacted] सामान्यनिश्चयस्ये-
ति। धूमत्वरूपसामान्यधर्मे धर्मितावच्छेदककनिश्चयस्येत्यर्थः। सामान्यसंशये इति। धूमत्वरूपसामान्यधर्मितावच्छेदककसंशये इत्यर्थः॥ निवर्तकत्वा-
त्प्रतिबन्धकत्वात् तत्त्वत्वदिति शेषः। धूमसामान्ये धूमत्वावच्छिन्ने विशेषसंशय इति वह्निव्याप्यधूमत्वरूपविशेषधर्मावच्छिन्नविशेष्यताकसंशय इ-

चिं॰टी
१४४

त्यर्थः। विशेषणनिश्चये तु तादृशविशेषधर्मावच्छिन्नविशेष्यताकनिश्चये त्यर्थः। निवर्त्तनीयः प्रतिबध्यः। धूमविशेषे वह्निव्याप्यधूमत्वावच्छिन्ने संशयनिरासार्थमि
ति। संशयानन्तरमनुमिमितिनिरासार्थमित्यर्थः। उपयोगिनि। वह्निव्याप्यो धूमः पर्वतवानिति वैशिष्ट्यनिश्चय एवानुमितिहेतुर्वाच्य इत्यन्वयः। पत्रहीतिप
द्धर्मघटितविशेषणतद्धर्मावच्छिन्ने त्यर्थः यत्र तद्धर्मावच्छिन्ने तत्संशयात्मकं ज्ञानं सामान्ये विशेषे वेति तद्धर्ममात्रावच्छिन्ने तद्धर्मघटितविशेषधर्मावच्छि
न्ने त्यर्थः तथा च सामान्याभाववत्ता घटादिबुद्धेः सामान्यघटितविशेषवत्ताबुद्धिप्रतिबंधकत्वरूपसामान्यधर्मितावच्छेदकतद्भावत्वेकधर्मदर्शनमपि
सामान्यघटितविशेषधर्मधर्मितावच्छेदकतद्वत्ताबुद्धिप्रतिबंधकं भूतलं घटाभाववदिति निश्चये भूतलं घटवदिति बुद्धिवन्नीलभूतलं घटवदिति बुद्धे
रप्यनुदयात् तद्भाववत्तैकधर्मेष्वन तद्संसर्गताभावः तत्संसर्गताभावव्याप्यः तत्संसर्गताभावो यद्धर्मावच्छेदेन गृहीतः स धर्मः तद्रूपेणान्याभावः तद्रूपेणान्याभा
वव्याप्यः तद्रूपेणान्याभावो यद्धर्मावच्छेदेन गृहीतः स धर्मः तादात्म्यसंबंधेन तद्बुद्धौ तद्धेतुरितिरूपेणापि बोध्यं न च तथापि वह्निव्याप्यस्य पर्व
तवान्वेति संशयो बाधकं न तद्धर्मितावच्छेदके धूमत्वाप्रवेशादिति वाच्यं तादृशसंशयसत्त्वेऽनुमितेरिष्टत्वात्। वह्निव्याप्यो धूमः पर्वतवानिति विशिष्ट
निश्चयदशायां तादृशसंशयसत्त्वेऽप्यनुमितेस्त्वयाप्यभ्युपगमादिति भावः। अत्र मे साहित्यं थोऽन्यथा योजनीयः अत्र मया धूमत्वावच्छिन्न
विशेष्यकः पर्वतवत्तानिश्चयो यदि व्यावर्त्तकधर्मदर्शनसत्त्वे ...पि न वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यकपर्वते नसंशयाभावप्रयोजकस्तदा यदा मनो
धीति वह्निव्याप्यो धूमः पर्वतवानिति विशिष्टनिश्चयो धीत्यर्थः। कुतो न स्यादिति वह्निव्याप्यो धूमः पर्वतवान्वेति संशयाभावप्रयोजकः कुतो न स्यादि
त्यर्थः। अथ विशिष्टनिश्चयस्य तादृशसंशयनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात् तन्न तादृशसंशयाभावाप्रयोजकत्वमिति चेन्न धू
मः पर्वतवानिति निश्चयस्यापि तदाश्रयत्वात् तस्यापि न तादृशसंशयाभावाप्रयोजकत्वमित्याह संशये न प्रतिबंधाहिति संशयनिरूपितप्रतिबंधकतावच्छे

राम॰

काभ्ययत्वादित्यर्थः। नन्वत्राहत्रासंशयप्रतिबंधकतावच्छेदकत्वमेवासिद्धमित्यभिप्रायेणाशंकते। नचेति। सामान्यनिश्चयस्येति सर्वत्र धूमसामान्ये संशयो
माभून्नतन्नस्तु धूमत्वावच्छिन्नविशेष्यकसंशयएव न जायते धूमत्वावच्छिन्नविशेष्यकसंशयाभावस्यैव प्रयोजकमिति पर्वतात् एवकाराद्वह्निव्याप्यधू
मत्वावच्छिन्नविशेष्यकसंशयाभावव्यवच्छेदः। विशेषसंशयस्त्वेत्यादिव्याख्यानार्थकं धूमविशेषसंशयनिरासार्थमिति एवकृत्वाभिमिति निश्चयो धूमविशेषसंश
यनिरासार्थमवतरणं वाक्यमिति योजना। एवकृत्वाभिमिति निश्चयं वह्निव्याप्यो धूमः पर्वतवानिति निश्चयः धूमविशेषसंशयनिरासार्थं वह्निव्याप्यधूमत्वावच्छिन्नवि
शेष्यकसंशयाभावप्रयोजकतया तु ज्ञापनाय तत्र ही त्यादिग्रन्थो पि हृद्यवत्तत्र तथापि प्रथमं वह्निव्याप्यो धूमः पर्वतवान्न वेति संशयः ततो धूमः पर्व
तवानिति निश्चयस्तथानुमित्यापत्ति हृदीयसंशयस्यैव व्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयत्वादित्यस्वरसादिप्यपत्तिमाह वस्तुतस्त्विति। कश्चित्त्वनु
मितिसामग्र्यावलवत्त्वादपि न तादृशसंशयो भवत्याह वस्तुतस्त्विति। धूमत्वप्रकारेणेति। धर्मितावच्छेदकप्रकारकधर्मिज्ञानस्यैव संशयहेतुतया त
स्य प्रथममभावव्यापकत्वादिति भावः। पक्षधर्मताज्ञाने धूमत्वरूपेणापक्षप्रकारकज्ञाने अनुमितिर्भवत्येवेति एवकारभिन्नक्रमे अनुमितिरेव भवतीनु
संशयः॥ अनुमितिसामग्र्यावलवत्त्वादित्यर्थः॥ नच धूमत्वरूपेणापक्षप्रकारकज्ञानस्तथापि मेव संशयसंभवइति वाच्यं प्रतिबंधकाभावस्य कार्यस
हभावेन हेतुतया तदानीं संशयासंभवादिति भाव इति व्याचक्षुः। तदसत् धूमत्वरूपेणापक्षप्रकारकनिश्चयात्पूर्वं संशयासंभवात्। मिश्रास्तु भवत्येव
संशयः भवतु नन्निश्चयार्थं क्वचिद्दिदृक्षानिश्चयोऽपेक्षितः तथापि धूमत्वरूपेणाभिमतस्मरणानेन रूपेणापक्षधर्मताज्ञाने चानुमितिर्भवत्येव पुनः
संशयस्तत्रैवतादृशज्ञानद्वयादनुमितरुत्पत्ते नावैनैवमिद्धेनः सम्मोहितमित्याह वस्तुतस्त्विति नीमार्थः॥ नन्विति। इदमितिपक्षः ईदृशीयः भावोवा
भावत्वं वहाभावो वा अभावत्ववद्धा प्रमेयं प्रमेयत्ववद्धाप्यवतो भावत्वाभावत्वयोरितिधर्मपरो निर्देशः भावत्वाभावत्वरूपव्याप्यतावच्छेदकप्र
त्व

चिं. टी. १४५

कारकव्याप्तिपक्षधर्मतानिश्चयाभावादित्यर्थः। अनुमानं अनुमितिः। ननु तत्र भावाभावान्यतरत्वप्रकारेणाभावाभावान्यतरत्वनिष्ठमेयत्वव्याप्तिज्ञानात्तेन रूपेणाप
क्षपक्षधर्मतानिश्चयाभावादित्यर्थः। अनुमानं अनुमितिः। फलबलेन तादृशज्ञानकल्पनादित्यत आह। तदन्यान्यत्वेति भावभिन्नत्वे सति भावभिन्नो यस्तदन्यत्वरूपस्य
भावाभावान्यतररूपस्य भावाभावान्यतरत्वस्येत्यर्थः। लिंगत्वाभावादिति। अप्रसिद्धेरिति भावः। भावत्वाभावत्वेति। भावत्वाभावत्वान्यतरधर्मस्वरूपेणाभावत्वाभा
वत्वान्यतरधर्मस्वरूपेणाभावत्वान्यतरधर्मनिष्ठव्याप्तिपक्षधर्मतानिश्चयादेवानुमित्युत्पादात् फलबलेन तादृशज्ञानकल्पनादित्यर्थः। एवमिति। लिंगं लिंग
तावच्छेदकं। यत्रायं धूमवानालोकवान्वा उभयथापि वह्निव्याप्यवानिति ज्ञानानंतरं अनुमितिस्तत्रापि धूमालोकान्यतरत्वरूपेण धूमालोकान्यतर लो
निष्ठव्याप्तिपक्षधर्मतानिश्चयात्सैवानुमितिः फलबलेन तादृशज्ञानकल्पनादित्यर्थः। तद्धर्मेति। यद्धर्मावच्छिन्नविशेष्यकयद्धर्मावच्छिन्नवृत्ति
त्वज्ञानत्वावच्छिन्नमित्यर्थः। तन्निश्चयसाध्यमिति। तद्धर्मावच्छिन्नविषयतानिरूपिततद्धर्मावच्छिन्नविषयताशालिनिश्चयत्वावच्छिन्नकारणताप्रति
योगिककार्यतावदित्यर्थः। पक्षधर्मत्वेति पक्षतान्याप्यत्वावच्छिन्ने पक्षतावच्छिन्नवतो भेदस्य पक्षतावच्छेदकावच्छिन्नरूपस्य ज्ञानं साध्यव्याप्यत्वा
वच्छिन्नविशेष्यतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वावच्छिन्नमिति यावत्। अन्यथा क्वचित्सिद्धसाधनापत्तेः। एवमग्रेऽपि पक्षधर्मताज्ञा
नि नं पक्षप्रकारकनिश्चये विशेष्यस्य ज्ञानान्तर्व्यावर्त्यधर्मज्ञानात्। पक्षस्यैव पक्षभेदव्यावर्तकत्वादिति भावः। धूमव्याप्यमेदज्ञानं धूमत्वावच्छिन्ने वह्निव्याप्यत्वा
क वच्छिन्नविशेष्यकपक्षवृत्तिज्ञानं वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यपक्षवृत्तित्वज्ञानमिति यावत्। अत्रैवेति। व्याप्यमत्भेदज्ञानं साध्यव्याप्यहेतुत्वा
वच्छिन्ने पक्षवृत्तित्वज्ञानं स्वेन रूपेण कलकारणसमवधानसत्वे पक्षत्वे कार्यानुत्पादस्य तस्यैव प्रतिबंधकत्वादिति भावः। ननु धूमत्वावच्छिन्नविशेष्यकपक्ष राम०
प्रकारकनिश्चयस्य धूमत्वावच्छिन्न[illegible]विशेष्यकपक्षवृत्तिप्रकारकनिश्चयं प्रतिविरोधित्वात् तस्यापि वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यकपक्षतावच्छेदकमे

बाधकाभावः इति भ्रमेणाग्रांकते। न चैवं। पक्षधर्मताग्रहेऽपि पक्षप्रकारकनिश्चये विद्यमाने यो निरोधः इद्यमिति। वह्निव्याप्यो धूमव्यक्तिरियं न प
र्वतीयेति निर्णयोत्तरं भ्रमप्रमतः भ्रमे बाधकविरहवतः अनुमितिसाधकत्वेन तदनन्तरं अनुमित्यापत्तिः। भ्रमेऽनिराकरणसमाधाने। धूमत्वस्येति। घटितत्वेन पक्षस्यार्थः।
धूमत्वघटितविशेषणदर्शनस्येत्यर्थः।। तदंशे न विशेष्यतावच्छेदकतया भानेन। तादृशभ्रमेऽपि तत्सामान्यधर्मावच्छिन्नविशेष्यकत्व। यावदेकधर्मवर्त्तनि
श्चयस्य सामान्यघटितधर्मावच्छिन्नविशेष्यताकतन्निश्चयं प्रत्यपि विरोधित्वात्। न च तथापि वह्निव्याप्यः पर्वतवान् इति भ्रमे बाधकाभावः। न च धूमत्वस्य वि
शेष्यतावच्छेदकतया प्रवेशादिति वाच्यं। तादृशभ्रमप्रमत्वेऽनुमितेरिष्टत्वात्। वह्निव्याप्यो धूमः पर्वतवानिति निश्चयसत्त्वे वह्निव्याप्यः पर्वतवानिति भ्रमेऽपि अनु
मितेस्त्वयाभ्युपगमात्। एवं यत्र प्रथमं वह्निव्याप्यो धूमः पर्वतवानिति भ्रमः ततो धूमः पर्वतवानिति निश्चयस्तत्राप्यनुमितिरिष्टैवेति भावः।। एवं यत्र हीत्यादि
ना। सामान्यधर्मावच्छिन्नविशेष्यकतद्व्यावर्त्तकधर्मदर्शनस्य सामान्यघटितविशेषणधर्मावच्छिन्नविशेष्यकतत्संशयं प्रत्यपि विरोधित्वे वोक्तेन तु नाहत्यानि
श्चयं प्रतीत्यतो नयोन[illegible]मयेति। यदि सामान्यधर्मावच्छिन्नविशेष्यकतद्व्यावर्त्तकधर्मदर्शनस्य न सामान्यघटितविशेषणधर्मावच्छिन्नविशेष्यकनिश्चय
प्रतिबंधकत्वमित्यर्थः। निश्चयसामग्र्यां विशेष्यतावच्छेदकप्रकारकनिश्चयरूपविशिष्टपरामर्शसामग्र्यां अनुमानान्तरमिति पाठः। धूमवान् पर्वतवानिति धू
मत्वधर्मितावच्छेदककभूमानन्तरमित्यर्थः। विशिष्टपरामर्श इति। वह्निव्याप्यो धूमः पर्वतवानिति विशिष्टपरामर्शेऽप्येवेत्यर्थः। तथा च धूमत्वरूपसामान्यध
र्मावच्छिन्नविशेष्यकपर्वतवद्वृत्तित्वस्य हानेत्तरं यथा न तद्घटितविशेषणधर्मावच्छिन्नविशेष्यकपर्वतवत्तानिश्चयस्तथा तादृशसामान्यधर्मावच्छिन्नविशेष्य
कपर्वतवत्तानिश्चयानन्तरमपि तद्घटितविशेषणधर्मावच्छिन्नविशेष्यकपर्वतवद्वृत्तित्वनिश्चय इति भावः। अभ्युपगमवादेनाह। आहत्येति। व्याप्यतये
ति। व्याप्यतावच्छेदकरूपेण साध्यव्याप्यतयाऽवगतस्य पक्षवत्तयावगतस्य भेदाग्रह इत्यर्थः। कल्पनालाघवं हेतुमाह। परामर्शहेतुत्वेनेति। न चैवं पक्षतिरेक

ज्ञानस्याभिमतत्वादेवविशिष्टपरामर्शत्वेन हेतुत्वसिद्धिरिति वा यत्नतत्वयोरनतु गमानुभयपक्षवादिसिद्धदृष्टांताभावाद्वनस्त्रिति सिद्धेः। व्यतिरेकेत्याह दृष्टांतस्थ
लभ इति वाच्यं सध्य स्याप्रसिद्धाव्यतिरेकदृष्टांतस्याप्यसंभवादिति भावः। असंनिकृष्टधूमज्ञानादपीति धूमेंद्रियसंनिकर्षविरहदशायामपि धूमत्वरूपेणा
लंकृताः साध्यव्याप्यत्वपक्षधर्मत्वस्मरणादनुमितिरित्यर्थः। गौरवमिति। कारणतावच्छेदकशरीरगौरवादित्यर्थः। विशिष्टपरामर्शत्वमपेक्ष्य यथोक्तभेदस्याग्रहत्व
स्य गुरुत्वादिति भावः। नेति। धूमेंद्रियसंनिकर्षविरहदशायामित्यर्थः। अनुपस्थितेः अनुपपत्तेः। तथा चानायत्त्या गौरवमप्यावश्यकमिति भावः। ननु ग्रह
व्याप्यतावच्छेदकरूपेण साध्यव्याप्यतयावगते पक्षवद्भेदस्याग्रहः अभेदसमानस्य साध्यव्याप्यत्वविशिष्टपक्षवद्भेदनिश्चयस्य तादृशहेतौ यथा प्रकारकनिश्चय
स्येति यावत्। अजनकत्वात् जनकत्वासंभवात् तथा चानापत्त्याकारणीभूतज्ञानाविरोधिनोपि तादृशाभेदज्ञानस्य प्रतिबंधकत्वमावश्यकमिति भावः।
उक्तयाप्ते व्यभिचारमाह त्वमपीति तादृशाव्यकाणी। भूतज्ञानाविरोधिनो यथोक्तभेदग्रहस्यापि यन्नियतव्याप्यतावच्छेदकप्रकारेण साध्यव्याप्यतयावगते
पक्षवद्भेदग्रहे नानुमितिहेतुसत्त्वे गोत्वमधुरत्वादीनां सास्नादिलिंगकानुमितिर्न स्यादित्यर्थः। जातिपदं धर्मपरं स च धर्मः परेषामखंडोपाधिरस्मा
कं च जातिरेवेति फलतो न कश्चिद्विशेषः। धर्मांतरेति। अनतिप्रसक्तधर्मांतरेत्यर्थः। नव गोत्वे गोपदप्रवृत्तिनिमित्तत्वमेव तादृशो धर्मः संभवतीत्याश
। पृथिवीत्वस्यापि गोपदप्रवृत्तिनिमित्ततापत्तेः अतिप्रसक्तत्वात्। मधुरत्वादीनां गोत्वेतरदसंभवाच्च। अत एव तदुपक्षकं तदुत्कीर्त्तनं। नन्वेवं भवन्मतेपि त
स्य गोत्वादावव्याप्तिसाधकत्वमित्यत आह। अत एवेति स्वरूपत एवेत्यर्थः। अस्य न्यग्रहीतिशेषः। विलक्षणत्वात्। व्यावर्तकत्वात्। व्यक्तिरेवेति। गोत्वा
धवच्छिन्नगवादिव्यक्तिरेवेत्यर्थः। समवेतत्वसंबंधेन इति शेषः। प्रकारकत्वात्। अनतिप्रसक्तत्वात्। ननु समवेतत्वस्य संबंधत्वे मानाभाव इत्यत आह। महीति। राम०
समवेतत्वसंबंधेन गोत्वे गोप्रकारत्वस्यैव तत्त्वविशेषत्वादिति भावः। ननु गौरिति ज्ञाने गोत्वं प्रकारः गोत्वमिति ज्ञाने तथात्वेऽपि विशेष इत्यत आह। अन्यथेति व्याप्य

त्यग्रहइति।गोत्वघटितव्याप्यत्वग्रहेतादृशव्याप्यत्वविशिष्टवत्तापरामर्शस्य चानुपयोगप्रसंगादित्यर्थः।विशेष्यतानवच्छेदकप्रकारकज्ञानविषये
वतत्रैतस्योपयोगादितिभावः।ननुगोनिष्ठाभावाप्रतियोगित्वादिगर्भव्याप्यत्वग्रहेतादृशव्याप्यत्वविशिष्टवत्तापरामर्शस्यचविशेष्यताज्ञानविषये
वत्त्वग्रहेनस्योपयोगादित्यतआह।गोत्वेनेति।गोत्वमित्येवपाठः।तथाचगोत्वेनसमवेतत्वेसतिसकलगोसमवेतत्वमेवतत्रानतिप्र[illegible]सक्तधर्मत्वमनु
भवसिद्धत्वेनोपहूवासंभवादितिभावः।गोत्वेवमिति।।गोत्वेप्यनतिप्रसक्तधर्मस्वीकारेऽनवस्थितिस्तत्रापिधर्मान्तरस्वीकारादनवस्थेत्यर्थः।अनुभ
वेनेति।अनुभवसिद्धत्वेनेत्यर्थः।तथाचप्रामाणिकत्वान्नानवस्थानदोषायेतिभावः।[illegible]पक्षधर्मतारहस्यं।।श्री।।यत्रापिपक्षःव्याप्यत्वसंबंधेनसंयोगसं
बंधेनैववावह्नेः साध्यतातादात्म्यसंबंधेनालोकोधूमोवाहेतुः तत्रायंधूमोवाऽऽलोकोवाउभयव्याप्यवह्निव्याप्यइतिव्याप्यतावच्छेदकधूमत्वादिप्रकारक
संज्ञात्मकव्याप्यतावच्छेदकतादात्म्यसंबंधसंसर्गकवह्निव्याप्यप्रकारकज्ञानानन्तरमपिव्याप्यत्वादिसंबंधेनवह्न्यादेरनुमितिःपरस्याभिमतासाकथं
स्यात्।व्याप्यतावच्छेदकप्रकारकधूमत्वादिप्रकारकनिश्चयविरहादितिसमाधत्ते[illegible]पक्षमिति।आलोकोधूमोवेति।अत्रतादात्म्यसंबंधेनालोकादि[illegible]व
कोटिः।इतिज्ञानमितिइत्याकारकंव्याप्यतावच्छेदकतादात्म्यसंबंधेनपक्षेवह्निव्याप्यप्रकारकज्ञानमित्यर्थः।नचैवंतदवच्छिन्नेव्याप्यत्वप्रकारकनिश्चय
स्यैवाप्रमाकारोननुव्याप्यप्रकारकनिश्चयस्येतिवाच्यं।धर्मप्रकारकनिश्चयस्यैवतादात्म्यसंबंधेनधर्मःप्रकारःततोऽनुमितिःतदनन्तरमपिव्याप्यतासंबंधेन
वह्नेरनुमितिःपरस्याभिमतेतिदोषः।तत्रनिश्चयःतत्रव्याप्तिपक्षधर्मतानिश्चयः।यद्यपिपर्वतोवह्निव्याप्यधूमादिमान्पर्वतोधूमवानित्युभयथापिवह्निव्याप्य
वानितिव्याप्यतावच्छेदकधूमत्वप्रकारकसंज्ञात्मकपरामर्शाद[illegible]नुमितिरनुभवसिद्धासापितन्मतेनस्यादित्येववक्तुंयुक्तंअभिहितासावाहस्तालाजेत्या
पितेनेतद्विनादृशसंज्ञात्मकपरामर्शानन्तरंवह्न्यनुमितिर्जायतइतिकाव्यलिखनात्तत्परित्यागः।तद्व्याप्यत्वमेवेति।धूमालोकान्यतरत्वमेवेत्यर्थः।नन्वालिंगांत

१८

चिं. टी. त्र्याप्यंशे विशेष्यतावच्छेदकं सत् पक्षधर्मताग्रहे विशेषणतावच्छेदकं तथा च तन्मध्ये वह्निव्याप्यधूमालोकान्यतरवान् पर्वत इति ज्ञानं ततोऽनुमितिरिति भावः ॥ नन्व

१४७ नुपपत्तिः । धूमालोकान्यतरज्ञानस्थापामपि रसर्थः ॥ अनुमितिदर्शनात् ताहृशसंशयात्मकपरामर्शानंतरं व्याप्यत्वादिसंबंधेन वह्न्यनुमितिदर्शनात् । ननु धान

३ नध्येनाहृशानं धूमालोकान्यतरत्वज्ञानमिति यद्येनाहात्म्यसंबंधेन धूमालोकान्यतरत्वप्रकारकधूमालोकान्यतमवज्ज्ञानिश्चयं विनेत्यर्थः ॥ व्याप्यत्वादिनिश्चयेन

नि । यत्र प्रसक्तो वह्निव्याप्यत्वप्रकारकवह्निव्याप्यवत्तानिश्चयासंभवेनेत्यर्थः ॥ संशयादीति निरासार्थकं विशेषदर्शनविधया तन्निश्चयप्रयोजकतयोपयोगादित्यभिमानः

। धूमान्यतमत्वं वेति नाशङ्कनीयं गौरवादिति । ननु वैकस्यावच्छेदकत्वापेक्षया धूमत्वालोकत्वोभयधर्मस्य ह्रस्वस्यावच्छेदकत्वे एव गौरवमिति वाच्यं ताहृशधर्म

स्यैकत्वेपि बहुतरभेदादिघटितत्वात् तथा च समो यत्नः कृतेनलेन च लघुत्वकधर्मद्वयस्यैवावच्छेदकत्वौचित्यात् लघुधर्मद्वयमत्वेनैकत्वस्यापि न किंचित्करत्वादिति भावः ॥ अ

भिचारेति । अन्यतमत्वविशिष्टमूलस्याव्यभिचारवारकधर्मघटित [illegible] त्वाच्चेत्यर्थः ॥ संदिग्धमेव मेरे हकोटितावच्छेदकत्वमेव वह्निव्याप्यस्य पक्षधर्मतानां

नंकारसामित्वादेपेनाह ननु चिति केचित्तु [illegible] नत्स्माभ्य [illegible] त्वस्य व्यभिचारवारकधर्मघटितत्वात् तस्मान्यत्वेपि एवमग्रेऽपि कंदनिदं

कते । नभिनीत्यादेः मितियाठे ननु तस्मात्त्वं दन्तिबहुश्रीहिर्बोध्यः एवमग्रे नरस्त्र । वह्निव्याप्यमेव धूमत्वालोकत्वादिवह्निव्याप्यमेव । नन्वेवं धूमालोकान्यतर

त्वादिनि प्रयोगे कथं निग्रहस्थानत्वमाह पुरुषेति । नीलधूमत्वादिरपैवेति । तत्रापि नीलधूमत्वस्य वर्धविशेषो [illegible] घटितत्वात्तेन रूपेण व्याप्तिविरहेपि धूम ल

त्वरूपेण व्याप्तिसत्त्वादिति भावः ॥ अर्मनिराकृतमसमाधत्ते । तस्मान्वयिति । व्याप्यत्वानां व्याप्यस्य पक्षधर्मतानातानात् । अतिप्रसंगादिति । वह्निव्याप्यो धूमः

इत्यवान् पर्वत इत्यादि वह्निव्याप्यं द्रव्यं द्रव्यवान् पर्वतः वह्निव्याप्यद्रव्यवान् पर्वतो वह्निव्याप्यवानित्यादिज्ञानादपि भवन्मतेऽनुमितिप्रसंगादित्यर्थः ॥ व्याप्यता १४०

वच्छेदकप्रकारकज्ञानादिति । व्याप्तिग्रहविशेष्यतावच्छेदकीभूतो यो व्याप्यतावच्छेदकधर्मस्तत्प्रकारकपक्षधर्मताज्ञानादित्यर्थः ॥ नैवमिति । एवं धूमालोकान्यतरत्व

तदन्यान्यत्वादितिपाठः ॥ तदन्यान्यत्व ॥

स्यव्याप्यतावच्छेदकत्वाभावेधूमत्वालोकत्वादिरूपेणव्याप्तिज्ञानविरहदशायामितिशेषः।तद्व्याप्यादिनिष्ठमेयत्वेनिर्द्दिष्टः।तादात्म्यसंबंधेनधूमालोका
न्यतरत्वेनहेतुत्वेनेत्यर्थः।नानुमेयं।नानुमातुंशक्यं।व्यर्थविशेषणत्वादिति।व्यर्थविशेषणतयाव्याप्यतावच्छेदकत्वाभावेनतद्धर्मावच्छिन्नस्यव्याप्त्यघट
कत्वादित्यर्थः।तद्धर्मावच्छिन्नस्यव्याप्तिघटकत्वेव्याप्यतावच्छेदकत्वस्यावश्यकत्वात्।यद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकंसा
ध्यतावच्छेदकंतस्यैवव्याप्यत्वादितिभावः।किंचित्तु।नचैवमिति।एवंव्यर्थविशेषणत्वस्यव्याप्यतावच्छेदकत्वविघटकत्वेपिधूमत्वादिनाव्याप्तिज्ञानविर
हदशायामितिशेषः।नद्धूमत्वादिति।विशेषणताविशेषसंबंधेनधूमालोकान्यत्वेनहेतुनेत्यर्थः।शेषंपूर्ववदित्याशयः।तदसत्त्वधूमालोकान्यत्वस्यधूम
त्वाव्यतिरिक्तत्वेनाभिन्नधर्मिकतयाप्रागभावपदवैयर्थ्यान्नधूमत्वादिरूपत्वेपिचधूमत्वत्वादेरप्रवेशेनवैयर्थ्याविरहादितिदृष्टव्यं।नभवत्येवतत्रानेनहेतु
नावह्निव्याप्यत्वानुमितिःकिंतुप्रत्यक्षतः तत्रव्याप्तिग्रहस्तत्रइतिसमाधत्ते प्रत्यक्षंहीति।विशेषदर्शनादिति।एतच्चसंप्रदायेनव्याप्तिप्रत्यक्षाभिप्रायेणावि
शेषणाविशेष्यसंबंधेति।।एतच्चसंबंधांशेलौकिकप्रत्यक्षाभिप्रायेणयथार्थप्रत्यक्षंप्रतिविशेषणाविशेष्यसंबंधस्यगुणतयातत्त्वंयादृनायेत्यधिक
श्चेत्।।विशेषणाविशेष्येंद्रियेण।विशेषणस्यज्ञानसत्त्वेपिपुनरिंद्रियसंनिकर्षाभिधानंतदंशेलौकिकप्रत्यक्षाभिप्रायेण।प्रत्यक्षसंभवादित्यर्थः।।व्य
र्थमुपलक्षणं।व्यर्थविशेषणतयातद्धर्मावच्छिन्नघटितव्यापकसामानाधिकरण्यरूपव्याप्तेर्विरहेपितत्रसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानेनवानुमि
तेरपिसंभवात्।नहिगुरुतनयत्रवन्यापनयेपिव्याप्यतावच्छेदकप्रकारकज्ञानमेवकारणमन्यथाव्याप्यसत्त्वप्युपगमोवेतिशेषं।नचैवमिति।एवंगुरुतयाऽन
वच्छेदकत्वे।प्रत्यक्षेपीति।गुरुतयाविषयितयाज्ञाननिष्ठप्रत्यक्षकारणतानवच्छेदकत्वासंभवादितिभावः।गुरुरपीति।तस्यबुद्धेरितिशेषः।विषयवि
शेषदर्शनेत्वेति।यावन्नैकधर्मदर्शनतयाविषयिताज्ञानविरोधिदर्शनेनेत्यर्थः।प्रत्यक्षसहकारित्वात् प्रत्यक्षीययोग्यत्वात्।नतुतद्व्याप्यत्वज्ञानत्वेनकार

णत्वमितिभावः। तद्व्याप्यत्वज्ञानमिति पक्षे धूमालोकाव्याप्यत्वप्रकारकधूमालोकाव्याप्यवत्ताज्ञानमित्यर्थः। नत्वेति धूमा लोको धूमो वेत्यादि संशयात्मकयत्र प
णीस्थलेऽत्यर्थः। व्याप्यवत्ताज्ञानोपक्षीणामिति। यत्रैव वह्निव्याप्यत्वप्रकारकवह्निव्याप्यवत्ताज्ञानं तत्रास्यैव युक्तमित्यर्थः। नहीति व्याप्यतावच्छेदकप्रकारकपक्ष
धर्मताज्ञानस्यैव मन्मतेऽनुमितिहेतुत्वाद्व्याप्यतावच्छेदकगौरवादिना व्याप्यतानवच्छेदकत्वादिति भावः। इदमुपलक्षणं। संशयादिसामग्र्याः सर्वत्रानावश्यक
त्वे न यत्रेतरकारणाभावात् संशयाद्यभावस्तत्र धूमालोकाव्याप्यवत्ताज्ञानमपि नावश्यकमित्यपि मन्तव्यं। [illegible]लाघवगुरुरूपविधर्मो व्याप्यतावच्छेदकः [illegible]
त्वे चोक्तस्थले धूमालोकाव्याप्यवत्ताज्ञानमावश्यकं तथापि गुरुव्याप्तिप्रकारकशाब्दज्ञानस्थले व्यभिचारान्न व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिज्ञा
नस्यैव हेतुत्वनियम इत्याह। किंचेति। शाब्दज्ञाने शाब्दज्ञानजन्यानुमितौ। व्याप्यत्वावच्छिन्नविषयताशालिज्ञानमेव कारणमित्यर्थः। [illegible]पि। व
ह्निव्याप्यो धूमः धूमवान्पर्वत इत्यादिज्ञानोत्तरमनुमितावपि तथा नाद्यविषयिताशालिज्ञानं कारणं। ननु सर्वत्र व्याप्यतावच्छेदकप्रकारकव्या
प्तिज्ञानमेव कारणमिति नियमोऽत्रैव व्यभिचारादिति भावः। व्यभिचारमुद्धरति अथेति। तथा च व्याप्यत्वप्रकारकज्ञानस्यैव व्याप्यतावच्छेदकप्र
कारकज्ञानत्वान्न नियमस्य व्यभिचार इति भावः। ननु व्याप्तेर्व्याप्यतावच्छेदकत्वे आत्माश्रय इत्यत आह तथा हीति। प्रत्येकवृत्तिः प्रत्येकमात्रवृत्तिः
[illegible]कत्वधूमा[illegible]कत्वधूमालोकादिनिष्ठेत्यर्थः। ननु यत्र वह्निव्याप्यस्तत्र वह्निरिति प्रतीतिरेव मानमित्यत आह। चैत्रेति शाब्दव्याप्यत्वावबोधे चे ह्नि
ति चत्राव्द इव वार्थः शाब्दवह्निव्याप्यवानयमिति बुद्धावित्यर्थः। ननु प्रत्येकव्याप्तिज्ञानाभावदशायामपि नादृशप्रतीतेरनेन तस्याः प्रत्येकव्याप्त्या
श्रयत्वं विषय इत्यत आह प्रत्येकेति नवाधीति शेषः। प्रत्येकव्याप्तेर्महाव्याप्त्यवच्छेदकत्वादिति भावः। इदमापाततः। यत्र यत्र धूमस्तत्र वह्निरित्य राम॰
स्य धूमत्वावच्छिन्नव्याप्ति विषयकत्वेन तत्र यत्र वह्निरित्यपि व्याप्यत्वावच्छिन्नव्याप्तिविषयकत्वस्य सर्वानुभवसिद्धत्वात्तस्य धूमादिसमानाधिकर

त्यु

स्रु णाभावप्रतियोगित्वरूपव्याप्यत्वविषय इति कश्चित्। प्रत्येकेति। वन्हीति विशेषणव्याप्यत्वावच्छिन्ना व्याप्तिरिति शिवा अतो न व्याप्तिप्रकृते तत्प्रकारेणैवास्यावच्छेदकत्वे
न व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानसत्वेपि वह्निव्याप्यो वह्निव्याप्य इति तत्प्रकारकव्याप्तिज्ञानाभावात् कथमनुमितिः स्यात् नच तदनन्तरं यो
वह्निव्याप्यवान् सोऽयमिति व्याप्तिज्ञानं कल्प्यं ततोऽनुमितिरिति वाच्यं तथा सति कल्प्यत्वाविशेषेण लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्तितायाः
कल्पयितुं युक्तत्वादिति भावः। एवं न तु शाब्दपरामर्शमात्रादनुमितिरप्रसिद्धैवेत्यत आह अपि चेति विशिष्टमितिपाठः यत्र प्रथमं यैनुमितिरयं वह्नि ८
तत्पूर्वं च वह्निव्याप्यधूमत्वविशिष्टमेव प्रत्यक्षं युगपद्विशिष्टस्य वैशिष्ट्यमिति। न्यायपक्षधर्मेण पक्षतावच्छेदकावच्छिन्ने भासते ज्ञायते तत्रेति योजना। के
चित्तु वैशिष्ट्यमिति पाठः अवच्छिन्नस्येत्यादिः। तथा च वह्निव्याप्यधूमत्वावच्छिन्नस्य वैशिष्ट्यमेवेत्यर्थः शेषं पूर्ववत्। व्याप्यत्वज्ञानमेवेति। पक्षता
वच्छेदकावच्छिन्नपक्षविषयतानिरूपितव्याप्यत्वावच्छिन्नविषयताशालिनिश्चयत्वमेवेत्यर्थः। नन्वेवमिति यत्र वह्निव्याप्यो धूमः धूमवान्पर्व
त इति ज्ञानानन्तरमनुमितिस्तत्रेति शेषः। कारणत्वेऽपि पूर्ववृत्तित्वकल्पने। लाघवमाणकत्वादिति। कार्यकारणभावग्रहाधीनप्रमाणगम्यत्वादित्यर्थः
। अपेक्षणात् विशिष्टपरामर्शोपायात् अयं वह्नितत्पूर्ववर्तिनासंबंधेनानुमितिमत्वादित्यनुमानेन विशिष्टपरामर्शसिद्धावनुकूलतर्कविधया का
रणतायाग्रहस्य बीजत्वादिति भावः। तावतैव कथं न दोषत्वं तत्राह कारणताग्रहदशायामिति। तत्प्रकारकग्रहदशायामित्यर्थः। फलेनेति फलं विशि
ष्टपरामर्शानुमित्योः कार्यकारणभावग्रहः स एवमुख्यं निश्चयबीजं यस्य एतादृशं यद्गौरवमतिरिक्तविशिष्टपरामर्शरूपं तस्येत्यर्थः। सिद्धसिद्धि
भ्यामिति। ज्ञानाज्ञानाभ्यामित्यर्थः। तदानीं तस्य ज्ञाने सत्वे कार्यकारणभावग्रहस्य तन्निश्चयप्रयोजकतया संशयरूपमेव तज्ज्ञानं भविष्यति न
तु तद्दोषताप्रयोजकं निश्चितगौरवस्यैव दोषत्वात् अज्ञानं चेत् तथापि न दोषापत्तिरूपमतद्गौरवस्यादोषत्वादिति भावः। केचित्तु लाघवमाणकत्वादिति।

२०

चिं. टी. अनुमित्यात्मककार्यस्य प्रमाणागम्यत्वादित्यर्थः। उक्तानुमानेनैव तत्सिद्धेरिति भावः। ननु कार्यस्य न प्रमाणत्वं कार्यकारणभावग्रहे सति स्यात् तु कल्पनकं विध
१४९ यातस्य तत्रोपयोगात्। स एव न संभवति गौरवेणात्र तत्संधारित्वात् आह कारणेनेति। अर्थस्तु पूर्ववदिति निरस्तेति। सप्रमाणकत्वादिति यथाश्रुतं तु न संगच्छते। सप्रमा
णत्वस्यादोषत्वात् प्रयोजकत्वे गौरवमात्रस्यैवादोषत्वापत्तेः। निष्प्रमाणकं गौरवं प्रतीतिध्येयं। इंद्रियासंनिकृष्टादिस्थले प्रागुक्तव्यभिचारमुद्धरति। नचेति। धूम
लज्ञानेति। [illegible] धूमत्वप्रकारकपक्षधर्मताज्ञानेत्यर्थः। प्रत्येकानुमानेति आकाशानिरवधकत्वं परममहत्वात् आकाशानि सद्रूपममूर्त्ते
त्वादित्यात्मकानुमानाभ्यामाकाशाहंजितयोपनीतेत्यर्थः। आकाशावृत्तितया स्मरणादिति। एतेन सहचारज्ञानं संधारितं। मनसा वा धूमनुभवेति। नचत
त्स्मरणरूपमेव व्याप्तिज्ञानं स्यादितिवाच्यं। आत्मस्मरणोप्यनुमितित्वत्वेति भावः। ननु तत्र साध्यसाधनग्राहकप्रत्येकानुमानाभ्यामेव व्याप्तिग्रहः
स्यात् किं मानसेनेत्यत आह। अनुमानयोरिति। व्याप्त्यग्राहकत्वादिति। व्याप्त्यविषयकत्वादित्यर्थः। नहि सहचारविषयकं ज्ञानं नियतसहचार
त्मकव्याप्तिविषयकं संभवतीति भावः। नवाधीति। नच तत्राप्यनुमानांतराद्व्याप्तिग्रह इति वाच्यं। नाहमौ [illegible] स्थलव्याप्त्यनुमितिधारावरहेप्यनुमितेर वि
नुभविकत्वादिति भावः। नन्वहृद्यतयसहितन्यतद्धृदयनयरूपासाधारणकारणसहितस्य वहिरर्थप्रयोजनकत्वे यदवेनाहि बहिर्विषयकत्वलिंग
प्रत्यक्षादिजनकत्वे उपनयस्य तत्र हृदयनयस्य। प्रमाणांतरत्वे प्रमाणांतरत्वप्रसंगः। यद्वेनादिविशेष्यकलिंगप्रकारकप्रमाणत्वप्रसंगादिति
यावत्। परसाधारणामित्साधुकव्याप्तेरिति भावः। नियतव्यापाराभावेन कारणत्वव्यापकस्य तज्जनकत्वव्यापारत्वस्याभावेन प्रमायामकरणत्वात् य
द्वितादिविशेष्यकवह्निव्याप्यादिप्रकारकप्रमायाः करणतायास्तत्रासंभवात्। यत्नव्यापारसंभवस्तस्य कारणत्वं निश्चलमेवावश्यव्यापकौ वाधौ इत्युः राम.
णा एवं तथापि तदर्थविषयकज्ञानहेतुव्यापारत्वे सति तदर्थविषयकज्ञानासाधारणकारणत्वमेव तदर्थविषयकप्रमाकरणत्वमावश्यं। ननु परसाधा

रणाद्युक्तो हेतुर्गलाभावादिति भावः। ननु व्यापाराभावात्सहकारित्वेन वक्तुं न शक्यत आह। सहकारिणा चेति। यदसाधारणोत्पादित्वाग्न्याभिचारमध्याह
बहिरिंद्रियेति॥ तथा चात्रैव साधनाव्यापकत्वनिश्चय इति भाव इति वाच्यम्ः। प्रामाणिकपरामर्शोत्पत्तिबहिर्मुखत्वेनानुमितित्वजातिस्वं उयतिस्यादेत
दिति पक्षधर्मत्वप्रत्यक्षसंबंधस्य। व्याप्यताज्ञानं वह्निव्याप्यत्वप्रकारेणायत्साधर्म्ये ज्ञानं वन्हिव्याप्यो धूमः पर्वत इति ज्ञानमिति यावत्। नेन्द्रियेति। वह्नि
लौकिकसंनिकर्षविरहदशायां कदाचिदपीन्द्रियेण तन्निष्पत्तसामानाधिकरण्यस्येत्यर्थः। अयोग्यत्वादिति इंद्रियेणाग्रहीतुमशक्यत्वादित्यर्थः।
यावद्विषयसंनिकर्षस्य प्रत्यक्षहेतुत्वादिति गूढाभिसंधिः। धूमत्वेनेति। महानसीयधूमे वह्निव्याप्तिप्रत्यक्षदशायां धूमत्वसामान्यलक्षणाप्रत्यासत्त्या
धूमत्वरूपेण सर्वस्यैव धूमस्य व्याप्तिसामान्यलक्षणाधीनवह्निव्याप्यत्वप्रकारकस्यानुभवादित्यर्थः। धूमविशेष इति। संस्कारात्स्मरणाद्वा धूम
विशेषेऽपनीतव्याप्यभेद इति योजना। संस्कारात् धूमत्वावच्छिन्नसकलधूमविशेष्यकनिखिलवह्निव्याप्तिप्रकारकसंस्कारात् एतद्धूमविष
यकमात्रं प्रत्यासत्तिः विशिष्टाधिकरणकवैशिष्ट्यबुद्धावपि स्वविशेष्यतावच्छेदकधर्मप्रकारकविशेष्यविषयकमात्रं कारणमिति प्राची
ननयेतत्स्मरणाद्वा धूमत्वावच्छिन्नसकलधूमविशेष्यकनिखिलवन्हिव्याप्तिप्रकारकस्मरणाद्वा एतद्धूमज्ञानमेव प्रत्यासत्तिः। विशिष्टाधि
करणकवैशिष्ट्यबुद्धावपि विशेष्यतावच्छेदकप्रकारकविशेष्यज्ञानमेव हेतुरिति नव्यमते। धूमविशेषे पक्षीयधूमे उपनीतव्या[illegible]भेदग्रहः प्य
स्वविषयीभूतवह्निव्याप्यभेदप्रकारेण लौकिकप्रत्यक्षसंबंधसाक्षात्कारः स्वसंस्कारादिः वह्निव्याप्याभेदो वह्निव्याप्यत्वं प्रत्यभिज्ञाने प्रम
भिज्ञानविशेषीभूतत्वसंबंधेनेत्युपस्थापतेः सिद्धान्तिनिष्कर्षः॥ ततः हि विशिष्टस्यैव संस्कारात्स्मरणाद्वा न तु विशिष्टस्य संबंधस्य साक्षात्का
रः। धूमवत्त्वेनेति। वह्निव्याप्यधूमवत्त्वप्रकारकेत्यर्थः। वह्निव्याप्तिज्ञानान्न व्याप्तिपरकत्वाविच्छिन्नत्वरूपेणानिखिलवह्निमत्त्वज्ञानानन्तरपरामर्शोत्पान

२१ १३

चिं॰टी॰ संज्ञायोजनरूपसंग्रमसंशयनिविशेषदर्शनस्यहेतुतयानुमितित्वेलेपसंज्ञायस्वाबग्रपकत्वात्तत्त्वंपादनापप्रकारानंतज्ञानविशेषणानांसमव हिशेषणमितिवहि
१५० व्याप्यवत्वांशेविशेषणीभूतइत्यर्थः समानधर्मिकविशेषदर्शनस्येवसंज्ञायोजनरूपसंशहेतुत्वमतेनकृत्यं सूमितदमभिहितं। संस्कारवशात् अलौ र्थ
किकसंनिकर्षवशात्वन्हिरिंद्रियजप्रत्यक्षेमुख्यविशेष्येणासमंलौकिकसंनिकर्षस्यापेक्षिततयातत्संपत्त्यर्थमिदमभिहितं। प्रत्यक्षेलाघ्रेंद्रियेणाव्या
प्तिज्ञानायेक्षेशोति। व्याप्तिज्ञानजनकेनेत्यर्थः। एतच्चपर्वतेनसमंपरामर्शजनकेंद्रियसंनिकर्षस्थलाभिप्रायेण। तेनक्वचिदिंद्रियानंतरं प्रत्यक्षसं
भवेपिनक्षतिः। वन्हिमद्देशग्रहइति। अभेदसंबंधेनवन्हिमत्प्रकारक ग्रहइत्यर्थः। संयोगादिसंबंधेनवह्निप्रकारकग्रहस्यानुभवसिद्धत्वात्तदह व
न्हिमत्त्वग्रहोवेति। संयोगादिसंबंधेनवह्निप्रकारकग्रहोवेत्यर्थः। किमनुमानेन। किंवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शानंतरं प्रत्यक्षविजातीयप्रमा
कल्पनेनेत्यर्थः। अथकृवह्निमत्वस्मरणमिति। स्वतंत्रतयावन्हिज्ञानमित्यर्थः। तत्रनास्तीति। अनुमितिपूर्वसमयेसर्वत्रनास्तीत्यर्थः। यत्रेंद्रोधका
दिवशातदृष्टांतरूपसाध्याधिकरणमेवसाध्यसामान्याधिकरण्यघटकतया भाति यत्रवावह्निभावेवदृष्टेनित्यत्वरूपव्याप्तिरेवपरामर्शेतत्रतदभा
वादितिभावः। आस्यवच्छेदकतयेति। व्याप्तिघटकतयेत्यर्थः। तथाचस्वातंत्र्येणाविशेषणज्ञानस्यविशिष्टप्रत्यक्षहेतुत्वेनतदभावात्कथंपक्षेसा ञि
ध्यविशिष्टबुद्धिः प्रत्यक्षेणेतिभावः। स्वातंत्र्यंचयद्यपिन विशेषणत्वं धारावाहिकप्रत्यक्षस्थलेप्येवहरघनेः। न विशेषणाविशेषणत्वं घटवद्भूत
लमितिज्ञानोत्तरंघटवद्भूतलमितिघटत्वविशिष्टप्रत्यक्षानुपपत्तेः। घटत्वस्यविशेषणाविशेषणत्वेनैवज्ञानात् तथापिफलीभूतविशिष्टप्र
त्यक्षविशेष्यतदभावविशेषणत्वंस्वातंत्र्यपदार्थः। चैत्रमैत्रोभयविशेष्यकदंडादिप्रकारकज्ञानानंतरंदोषवशाज्जायमानेकेवलचैत्रविशे राम॰
ष्यकदंडादिप्रकारकप्रत्यक्षेव्यभिचारवारणायमात्रपदंतथाचफलीभूतप्रत्यक्षविशेष्यकनिरूपिताविषयतानिरूपितविशेषणाविषयितानिरूपितानं है

नुरितिफलितं। ननु तस्य स्मरणस्य संस्कारेयेधिविनाशान्न तावत्कालमवस्थानं। न च कोटिस्मरणानाशेऽपि संशयएव स्वतन्त्रविशेषणोपस्थिति
रूपो वक्तव्य इति वाच्यं यत्रादौ संशयस्ततो व्याप्तिस्मरणं ततः परामर्शः तत्र संशयस्यापि नाशादित्यस्वरसादाह नवेति नवे सर्वथा विशिष्टज्ञाने
विशिष्टप्रत्यक्षे समप्यात्वेन नविशेषणाज्ञानस्य विशिष्टधीसामान्ये हेतुत्वाभ्युपगमेऽनुमितेरप्यसंभवादनुमितेरपि विशिष्टज्ञानत्वादिति ध्ये
यं योग्यत्वेति। परामर्शेऽपि वह्निमत्त्वसामान्यलक्षणया पर्वते वह्निभानादुक्तं विशेष्येति। तद्व्यक्तित्वं तद्व्यक्तित्वरूपेणोत्यर्थः। क्वचिद्विशेष्ये
६ ति नयाठः। तत्रापि धीपदेत्रैस्य नेतरं ज्ञानद्वारणीयं संस्कारेव चानसंस्कारादुपनयवज्ञानात्। न च यर्वं न उक्तेति। सर्वत्रेति शेषः। विशिष्य तत्तद्व्यक्तित्वरूपेण
।स्मरणमेवेति। नन्वेवं येकस्मिन्नर्वद्ने मोरभज्ञाने चं नातरे चक्षुषा मेरभज्ञानं न स्यादित्यत्रेष्टापत्तिमाह यत्रेति। पक्षधर्मधूमेधीति तथा च तत्रैवोक्त
नियमस्यव्यभिचार इति भावः। ननु संस्काराद्युपनयवज्ञानाद्व्याप्तिबोधः किंतु व्याप्तिर्लौकिकसाक्षात्कार एव व्याप्तेः सामानाधिकरण्यात्मक
त्वेन संयोगादिरूपत्वादिसन्निमानेन व्यभिचारमुद्धरति नन्वेति। महानसीयधूमवह्निसमवन्ध्यताहृतिः पर्वतीयधूमे व्याप्त्यवगमः पर्वतीय
धूमेधिवा। स्वलौकिकसंनिकर्षाभावादिति। लौकिकसंनिकर्षविरहादित्यर्थः। न चोपनयएव संनिकर्षोऽस्तीति वाच्यं। योत्रयत्रेसादिनिय
५ मादृन्नयसंनिकर्षवन्नोन प्रत्यक्षासंभवादिति भावः। ननु साध्येति। पक्षीयहेतुपक्षीयलौकिकसाक्षात्कारं विनेम र्थः। व्याप्तिग्रहान पक्षीय
हेतौ पक्षीयसाध्यस्य व्याप्तिलौकिकप्रत्यक्षासंभवात् संबंधिवह्निर्योनिहव्यपरार्थलौकिकप्रत्यक्षे प्रतिसमानेन्द्रियजसंबंधिह्येलौकिकसाक्षा
त्कारस्य हेतुत्वादिति भावः। ननु पर्वतीयधूमस्य लौकिकसाक्षात्कारोऽस्त्येवेत्यत आह नवेति। पर्वते वह्निसाक्षात्कारः पर्वतीयवह्निलौकिकसाक्षा
त्कारः तथा च पक्षीयसाध्यस्य लौकिकसाक्षात्कारो नास्तीति भावः। ननु नाशप्रत्यक्षसामान्यं प्रत्येव संबंधिहृयसाक्षात्कारस्य हेतुत्वे मानाभावव

२२ २४

चिं॰ टी॰ ऽप्यस्वरसाहानचैति नचैवमर्थः पक्षे साध्यग्रहं विना पक्षीयसाध्यज्ञानलक्षणासंनिकर्षं विना लौकिकप्रत्यक्षेणाग्रहीतुं शक्येति शेषः पक्षीयहेतुनिष्ठव्या
१५१ प्तेः प॰ क्षीयसाध्यघटितमूर्तिकत्वेन तत्प्रत्यक्षस्य पक्षीयसाध्यप्रत्यक्षरूपतानियमात् पक्षीयसाध्यप्रत्यक्षसामग्रीं विनाऽसंभवात् लौकिकसंनि
कर्षस्य च पक्षीयसाध्येन सममभावात् । नव्यास्तु तत्रोक्तनियमस्य च व्यभिचारो दुर्वार एवेति भावः योप त्रविशेष्ये युक्तनियमस्य व्यभिचारं वारयितुं पक्षी
यसाध्यप्र॰ त्यक्षसामग्रीं विनापि व्याप्तिलौकिकप्रत्यक्षमुपपादयति । नुमत इति । नत्र्येति विशेषणस्य विशेष्येणासंबद्ध इत्यर्थः । एतच्च विशेषणाविशे
ष्यसंबंधांशे लौकिकप्रत्यक्षाभिप्रायेण तत्र विषयविधया तस्य हेतुत्वात् विशेषणज्ञानमिति एतच्च विशिष्टज्ञाने तत्प्रत्यक्षे उपयुज्यते विशेषणाने
ति विशेषणविशेष्याभ्यामिंद्रियलौकिकसंनिकर्ष इत्यर्थः । विशिष्टप्रत्यक्षकरणं विशिष्टलौकिकप्रत्यक्षकरणं । ननु पर्वतीयधूमनिष्ठव्याप्तेः पू
र्वमननुभूतत्वेन महानसीयधूमव्याप्तेरेव स्मृतत्वान्न तस्याः पर्वतीयधूमे सत्त्वं सामानाधिकरण्यात्मकतया प्रतिव्यक्ति भिन्नत्वात् इत्यत आह । एकैव
हीति । व्याप्तेर्धूमत्वादिरूपत्वादित्यर्थः । यद्यपि व्याप्तेः प्रतिव्यक्ति विभिन्नसाध्यसामानाधिकरण्यरूपत्वेपि न क्षतिः सामान्यतो वह्निधूमसामाना
धिकरण्यत्वेन ग्रहीतानां सकलसामानाधिकरण्यानां तथैव स्मरणासंभवात् तथापि व्याप्तेर्वह्निसामानाधिकरण्यरूपत्वेन पर्वतीयधूमनिष्ठ
पर्वतीयवह्निसामानाधिकरण्यस्य पर्वतीयवह्नितदधिकरणाघटिततया पर्वतीयवह्निप्रत्यक्षसामग्रीं विना न पर्वतीयधूमे वह्निव्याप्तिलौकिक
प्रत्यक्षसंभवः वह्निसामानाधिकरण्यं तु धूमत्वरूपत्वे पर्वतीयवह्निप्रत्यक्षसामग्रीं विनापि महानसीयादिधूमत्वं किंचिद्वह्निप्रत्यक्षसामग्रीसत्त्वे पर्वतीय चि
धूममहानसीयादिवह्निसामानाधिकरण्यमात्रविषयकवह्निव्याप्तिलौकिकप्रत्यक्षसंभवात् पर्वतीयधूमे महानसीयवह्न्यादिसामानाधिकरण्यबा राम॰
धितत्वेपि तत्सामानाधिकरण्याद्वह्निधूमत्वस्य तत्राबाधिततयेत्यभिप्रायेणोक्तं । व्याप्तिविशिष्टधूमेंद्रियसंनिकर्षश्चेति । व्याप्तिपर्वतीयधूमयोर्लौकिक

संनिकर्षश्चेत्यर्थः। व्याप्तेर्धूमत्वादिरूपतया संयुक्तसमवायादेरेव लौकिकसंनिकर्षस्य सत्वादिति भावः। व्याप्तिविशिष्टज्ञानं कारणं यत्पर्वतीयधूमे वह्निव्या
प्तिविशिष्टस्य लौकिकप्रत्यक्षं कारणं अतः पर्वतीयवह्निप्रत्यक्षसामग्रीं विनापि पर्वतीयधूमे वह्निव्याप्तिलौकिकप्रत्यक्षसंभव इति न व्याप्तेर्वह्निघटित
त्वे जिकतया वह्निप्रत्यक्षसामग्रीं विना कथं तल्लौकिकप्रत्यक्षमिति वाच्यं। यो यत्रेत्याद्युक्तनियमात्पर्वतीयवह्निमत्वविषयकोऽनुमितौ नु मानसामग्र्याः सत्वे
पि महानसीयादिवह्नित्वविषयकोऽयं नीन प्रत्यक्षसामग्रीसत्वान्महानसादौ विशिष्टव्याप्तिहेतुरेव पुरा वह्नेरवगमात्‌ परामर्शसामानाधिकरण्यप्रतियो
गितया प्रकृतवह्निभाने मानाभावात्। नन्वेवमनुमितावपि कथं पर्वतीयवह्निभानं विशेषणज्ञानविरहादिति वाच्यं स्वरूपतो विशेषणाविषयकविशि
ष्टप्रत्यक्षं प्रति विशेषणज्ञानस्य हेतुत्वेऽप्यत्र न हेतुत्वे मानाभावः। न च वह्निविशिष्टज्ञानसामग्रीति। न च सर्वत्र पर्वते वह्निविशिष्टलौकिकप्रत्यक्षसाम
ग्रीत्यर्थः। वह्नेः संनिकर्षादिति। सर्वत्र वह्निना सममलौकिकसंनिकर्षविरहादित्यर्थः। अथ लौकिकप्रत्यक्षसामग्रीविरहेऽप्यनयसंनिकर्षाद्युपनी
तभानमेव पर्वते वह्नेर्भविष्यतीत्यत्र दूरे वनयवर्ती यत्र वह्नेर्भानं तत्रापि वह्नित्वरूपेण परामर्शविषयवह्नेरेव भानसंभवात्‌ जावत्तापि पर्वतो वह्निमानि
ति ज्ञाननिर्वाहात्। परामर्शानंतरं जायमानस्य नाहमनुज्ञानस्य सर्वत्र पर्वतीयवह्निविषयकत्वमनुभवसिद्धं न चैवं भ्रमत्वापत्तिरिति वाच्यं तद्वत्स
वच्छिन्नाभाववति तद्वत्ताबुद्धिप्रकारकत्वरूपतद्बुद्धिभ्रमस्योक्तत्वादिति चेन्न। यो यत्रेत्याद्युक्तनियमादुपनीतभानस्यापि सर्वत्रासंभवादिति निर्गलः। धू
मव्यापकवह्निसमानाधिकरणत्वात्मकधूमत्वमेव व्याप्तिस्तद्विशिष्टस्य धूमस्य पर्वतव्यासंगो लौकिकप्रत्यक्षात्मक एव परामर्शे पर्वते वह्नेर्लौकिकसंनि
कर्षविरहे हवायामपि अनुमितिहेतुरिति। यो यत्रेति नियमस्यापि न भंगः इति स्वयमुक्तं केचित्तु धूमव्यापकवह्निसामानाधिकरण्यमेव व्याप्तिः स्वाश्रय राम०
वृत्तित्वसंबंधेन तद्विशिष्टस्य धूमत्वस्य स्वाश्रयसंयोगादिरूपपरंपरासंबंधेन पर्वतेऽपरामर्शादेव सर्वत्रानुमितिरतो यो यत्रेत्यादिनियमभंगाभावे नैव वह्नेर्लौ

किकसंनिकर्षविरहस्थामपिव्याप्त्यंशेऽनुपनीतमानात्मकपक्षसत्त्वरूपएवपरामर्शोऽनुमितिहेतुरित्याहः तन्मनस्पप्नस्मृतीयञ्चेतिवह्निव्याप्यत्वेधूमव्यापकवह्नि
सामानाधिकरण्यरूपंवह्निव्याप्यत्वंपक्षदृष्टनिधूमत्वइतिसाक्षात्संयोगरूपपरंपरासंबंधेनपक्षांवोप्रकारकीभूतधूमत्वइत्यर्थः। सर्वमनुभवादितिवि
शिष्टपूर्वमनुभवादित्यर्थः। अन्तोनयत्नेत्यादिनियमभंगइतिभावः। नन्वेवमपिअनुमितिकारणापरामर्शोनिर्वाहइत्यतआह एवंचेति। धूमत्वव्याप्यत्वेति
वह्निव्याप्यधूमत्ववान्पर्वतइतिपरामर्शादित्यर्थः। लिंगंस्यादिति विषयःस्यादित्यर्थः। यादृशव्याप्तिज्ञानमनुमितिहेतुस्तादृशज्ञानस्यैवलिंगव्यवहारहे
तुत्वादितिभावः। तत्रैवाशयंनिगमयन्नाह तथाचेतिसर्वोपसंहारेणेति सर्वांशेधूमव्यक्तिःविशेष्यीकृतेत्यर्थः। व्यक्तौसंनिकृष्टधूमव्यक्तौ। तादृशव्याप्तिग्रह
स्यअनुमितौलिंगादिव्यवहारस्यचानुमितिलिंगादिव्यवहारंप्रतिसाक्षात्संबंधेनभवद्धूमकव्याप्तिज्ञानमेवहेतुरित्युक्तौचलाघवात्परंपरासंबंधेनधूमत्वव्या
प्यत्वपरामर्शएवहेतुरत्याह अथतेचेति परंपरेतिपरंपरासंबंधेनपक्षधर्मताज्ञानंविनापिजातिव्याप्तिमविदुषोपीसन्नयलिंगव्यवहारेसंबंधज्ञानस्या
नुपयोगितयायथाश्रुतासंगतेः। व्याप्यताग्रहः परंपरासंबंधेनव्याप्यताग्रहः स्वमतेतृतीयलिंगपरामर्शस्वरूपंनिर्धारयति तस्मादिति। पक्षधर्मे पक्षध
र्मेस्यपक्षसंबंधस्येतियावत् व्याप्तिविशिष्टज्ञानंतृतीयलिंगपरामर्शइतिसंबध्यते तथाचवह्निव्याप्योधूमःपर्वतइत्साकारकंव्याप्तिविशेष्यकपक्षप्रकारक वि
ज्ञानंतृतीयलिंगपरामर्शइतिभावः। अनन्तरमितितदनंतरंपक्षेविशिष्टवैशिष्ट्यज्ञानंवातृतीयलिंगपरामर्शइतियोजना। तदनंतरंहेतोव्याप्तिप्रकार
कज्ञानानंतरंविशिष्टवैशिष्ट्यज्ञानंव्याप्तिविशिष्टनिरूपितवैशिष्ट्यज्ञानं। तथाचवह्निव्याप्योधूमइत्यादिज्ञानोत्तरोसन्नवह्निव्याप्यधूमवान्पर्वतइत्साका
रकंपक्षविशेष्यकव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानंवातृतीयलिंगपरामर्शइतिभावः। कदाचित्स्वार्थविनिगमनाविरहेणव्याप्यविशेष्यकपक्षविशेष्य राम॰
९ कयोरुभयोरपिपरामर्शयोरनुमितिहेतुत्वादितिसंप्रदायः। नचानयोःपरामर्शयोस्तृतीयत्वंकथमितिवाच्यं। आद्येवह्निव्याप्तिरितिविशेषणीभूतव्याप्तिस

रणं । ततो वह्निव्याप्यो धूम इति धूमे वह्निव्याप्तिविशिष्टज्ञानं विशेषणज्ञानस्य विशिष्टज्ञाने हेतुत्वात् ननु तृतीयपक्षे तयोरनुमितिः विशिष्टाधिकरण
कवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकप्रकारकज्ञानस्य विशिष्टनिरूपितवैशिष्ट्यबुद्धौ च विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वादिति रीत्या तृती
यत्वात् न चैवं सार्वत्रिकं क्वचित् प्रथमं वह्निमति पक्षतायोरपि तादृशपरामर्शोत्पत्तिसंभवात् । परामर्शः पक्षधर्मपक्षवृत्तित्वविशिष्टव्याप्तिविशिष्टज्ञा
नं व्याप्तिप्रकारकज्ञानं तथा च पर्वतवृत्तिधूमो वह्निव्याप्य इत्याकारकं पक्षवृत्तित्वविशिष्टव्याप्तिप्रकारकज्ञानं तृतीयलिंगपरामर्श इति भावः । ज्ञेयं
विवात् ननु तृतीयत्वं कुत इति चार्वा । आदौ पर्वतवृत्तित्वरूपेण धूम इति ज्ञानं ततो व्याप्तिस्मरणं ततः पर्वतवृत्तित्वविशिष्टधूमे व्याप्तिविशिष्टज्ञानमि
ति क्रमेण तृतीयत्वसंभवादिति भावः । ननु वह्निव्याप्यो धूमः पर्वत इत्याकारकस्य व्याप्तिविशिष्टविशेष्यकपक्षप्रकारकज्ञानस्यैव वह्निव्याप्यधूमवानयं पर्व
त इत्यादिपक्षविशेष्यकपरामर्शेन समं विनिगमनाविरहेणानुमि तिहेतुत्वापत्तेः पर्वतवृत्तिधूमो वह्निव्याप्य इति ज्ञानस्य च यथोक्तपक्षविशेष्य
कज्ञानापेक्षया गुरुत्वात् पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपितव्याप्यतावच्छिन्नविषयताप्रतियोगिनिष्ठयत्वेन पक्षविशेष्यकपरामर्शसाधा
रणधर्मेणाहेतुतामतेन तस्य कारणतावच्छेदकानाक्रान्ततावेति ध्येयं । व्यापकतापरामर्शहेतुतावादिनां मतमाह व्याप्येति । स्वप्रतियोगित्वं प्रतियो
गितानवच्छेदकसाध्यतावच्छेदकवत्त्वं । व्यापकताज्ञानमिति साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानमित्यर्थः । अ
नुमितिहेतुः अनुमितौ कारणं । साध्यस्येति । साध्यविशेष्यकं हेतुतावच्छेदकविशिष्टो यत्नक्षणाविधया पक्षवृत्तित्वप्रकारकमुपलक्षणविधया हेतु
तावच्छेदकसंबंधेन पक्षप्रकारकं वा हेतुतावच्छेदकविशिष्टवन्निष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वज्ञानमित्यर्थः । परामर्शः । अ
नुमितिजनकपरामर्शः तथा च पर्वतवृत्तिधूमव्यापको वह्निरित्याकारकं पर्वतवद्धूमव्यापको वह्निरित्याकारकं वा साध्यविशेष्यकं ज्ञानं तेनानुमितिजनक

परामर्श इति भावः। अत्र पर्वते तत्कालिकमयत्नसाध्यतया धूमादेः प्रकारः। ननु व्यापकताग्राह्यं नभावः तेन विशिष्यपर्वतीयधूमव्यापकत्वस्य प्रागनुभूतत्वेऽप्यनुमितिना
नुपपन्नानवाऽऽश्लिष्ट एवेत्यग्रिमग्रन्थविरोध इति चेत्। साध्यव्याप्तस्येति मत्वर्थे षष्ठी पक्षधर्मताज्ञानं पक्षवैशिष्ट्यज्ञानं तथा च वह्निव्याप्यो धूमः पर्वते इत्याका
रकं व्याप्यविशेष्यकं पक्षप्रकारकज्ञानमित्यर्थः। प्राञ्चस्तु पक्षधर्मताज्ञानं तथा च वह्निव्याप्यो धूमः पर्वतवृत्तिरित्याकारकं ज्ञानमित्यर्थः। यद्वा साध्यव्याप्त
स्येति यदंभावसाधनं साध्यव्याप्तिमत्यर्थः। पक्षधर्मताज्ञानं पक्षवृत्तित्वेन ज्ञानं तथा च पर्वतवृत्तिधूमो वह्निव्याप्य इत्याकारकं ज्ञानमित्यर्थः। न चास्मादिस्मारि
तात्तादृशज्ञानस्यैव सर्वानुमितिजनकपरामर्शत्वाभिधानादित्याहुः। साध्यव्याप्यवदिति। साध्यव्याप्तिविशिष्टपक्षप्रकारकपक्षविशेष्यकज्ञानत्वस
र्थः। विषयाधिक्याभावेऽपि कारणतावच्छेदकताघटकविषयाधिक्यात्। न चैवं केवलान्वयिसामानाधिकरण्यांशविषयत्वस्याधिकस्य कारणता
वच्छेदककोटौ निवेशने गौरवादित्यर्थः। न च हेतौ साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वाऽनुमित्यापत्तिरिति वाच्यम्। साध्याभाववद्वृत्तित्व
ज्ञानस्यैव हेतुतावच्छेदकनाभिवेश्यत्वात्। न चैवं पर्वतवृत्तिधूमव्यापको वह्निरिति ज्ञानात् धूमसामानाधिकरण्यासमानाधिकरण्याधूमवान् पर्वत इति ज्ञानसत्वेऽप्य
नुमितिः स्यादिति वाच्यम्। साध्यसमानाधिकरणधर्मान्तरवत्ताग्रहस्यैव तत्रानुमितिप्रतिबन्धकत्वाद्विरोधित्वात्। न चैवं वह्निव्याप्यधूमवान् पर्वत इति ज्ञा
नात्कथमनुमितिरिति वाच्यम्। लाघवाद्व्यापकतापरामर्शस्यैव हेतुत्वे सिद्धे तत्राप्यन्तरान्तरकल्पनात्। पर्वतवृत्तिधूमव्यापको वह्निरिति ज्ञानाद्वह्निपरा
मर्शोत्पत्तौ तथाप्यन्तरा व्यापकपरामर्शस्य कल्पनीयत्वात्। न चाऽसिद्धसाध्यकव्यतिरेकिणि साध्यविशेष्यकपरामर्शासंभव इति वाच्यम्। साध्याभाव
व्यभावात्मकस्य व्यापकतयाऽहेतुभावावगाहिपरामर्शस्यैव तत्र दृष्टस्य हेतुत्वकल्पनात् तत्रापि तत्र व्याप्यत्वपरामर्शासंभवादिति भावः। ननु व्यापक राम॰
सामानाधिकरण्यरूपव्याप्तेर्ज्ञानं नानुमितिहेतुः किंतु साध्यवदन्यावृत्तित्वरूपतज्ज्ञानं तथा च गौरवं न चैवमत आह। अत एवेति। यतो व्यापकताज्ञानं कारणम

तएवेत्यर्थः। साध्यायोगव्यवच्छेदेनेति अभेदे तृतीया वह्न्ययोगव्यवच्छेदकस्य वह्निनिष्ठधूमव्यापकताग्रहत्वं यत्रेत्यर्थः। वह्न्ययोगव्यवच्छेदस्य वह्निनिष्ठधू न
मसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वायोगव्यवच्छेदः वह्निनिष्ठताद्रूप्यावह्नित्ववत्त्वमिति यावत्। किंचिदनुसहार्थे तृतीया। तथा च वह्न्ययो
गव्यवच्छेदेन सह वह्निनिष्ठधूमव्यापकव्यापकताग्रहरूपेणेत्यर्थः। वह्न्ययोगव्यवच्छेदस्य वह्निमद्वृत्तित्वमाहुः। ननु उदाहरणाभावात् कथं व्यापकत्वला
भः तस्यापदार्थत्वादिति चेत्। अत्र केचित् धूमवति धूमव्यापकत्वविशिष्टाभेदसंबंधेन वह्निमतोऽन्वयात् संसर्गमर्यादया वह्नौ धूमव्यापकत्वलाभः
वह्निमद्वृत्तित्वस्य वह्निरूपावीभावाच्च नानर्थक्यमाहिके साहुः। न च संसर्गतया व्यापकताज्ञानस्य परामर्शानुपयोगितया तत्परामर्शे नस्य अर्थेनापत्तेः
वत्त्वन तत्त्व वह्निवाचकपदस्य धूमव्यापकवह्नौ लक्षणा धूमवदभेदसंबंधेन धूमव्यापकवह्निमतोऽन्वयो वह्नौ अभावत्वे च धूमव्याप्यत्वतत्त्वलाभः वी
आचनानर्थक्यं नहि केतिनुन्नम्। अन्यथेति यदि साध्यवदसमवहितत्वज्ञानं कारणं तदेत्यर्थः। अन्ययोगेति। अन्ययोगव्यवच्छेदः साध्यवदसमवहितत्व
व्यवच्छेदः। बोधकत्वं तृतीयार्थः। तथा च साध्यवदसमवहितत्वबोधकमुदाहरणवाक्यरूपं स्यादित्यर्थः। ननु यदि हेतुनिष्ठव्याप्तिज्ञानं तत्र तदा तदिह घटना
ये हेतुनिष्ठितया तदपोद्भावनं न स्यात् किंतु साध्यनिष्ठतया न तदुद्भावनं स्यादित्यत्रेष्टापत्तिमाह हेत्वपीति। आदिना व्याप्यत्वासिद्धिपरिग्रहः। पक्षधर्मव्या
पकमिति न हेत्ववच्छेदकावच्छिन्नव्यापकतावच्छेदकं साध्यतावच्छेदकमित्यर्थः। एतच्च समानाकारकज्ञानस्यैव प्रतिबंधकत्वादिति व्यमतम्। व्याप्ति
स्योक्तं प्रामाण्ये हेतौ साध्याभाववद्वृत्तित्वबुद्धेरपि हेतुव्यापकताधीविरोधित्वादिति मंतव्यं। परामर्शोपयोगीति अनुमितिहेतुरिति शेषः। पर्वतधूमं प्र
तीति। वह्नौ पर्वतवृत्तित्वरूपेण धूमव्यापकतावच्छेदकविषयत्वस्येत्यर्थः। पर्वतधूमसामानाधिकरण्यं पर्वतीयस्याना। वह्नौ पर्वतीयधूमसामानाधिक
रण्यविषयत्वव्याप्यत्वात्। पर्वतवह्निमिति अन्यत्र पर्वतीयधूमसामानाधिकरण्यविरहादित्यर्थः। किमनुमेयमित्यत आह तथा च सिद्धसाधनमिति भावः।

२५

१

चिं॰टी॰ मानंविषयित्वंसाध्यसामानाधिकरण्यमितिपर्यवसितं।यद्धूमेसाध्यसामानाधिकरण्यविषयित्वंनियतमित्यर्थः।व्याप्यत्वमानेपक्षव्याप्यत्वपरामर्शस्यानुमितिहेतुत्वेपिसि

१५४ द्धसाधनादनुमितेरसंभवित्वंतुल्यंच्यवगम्यतेपरामर्शाविषयीक्रियतेनतुविशेषणाकारेणपर्वतेवह्निसिद्धिरतोनसिद्धसाधनमितिशेषः।व्यापकत्वेव्यापकताप

रामर्शानुमितिहेतुत्वेपिकिंचवह्नौपर्वतत्वरूपेणाधूमव्यापकतावच्छेदकत्वस्यवह्नौपर्वतेनधूमसामानाधिकरण्यविषयित्वव्याप्यत्वमेवासिद्धमित्याह।व्यापकतानि

ति।नहिवह्निरेवेतिधूमवन्निष्ठेत्यर्थः।ननुधूमसमानाधिकरणं।ननुवह्निनिष्ठपर्वतोयद्धूमसामानाधिकरण्यघटितोयेनयथोक्तव्यापकत्वविषयत्वंतर्हिव्या

पकत्वव्याप्यंस्यादितिभावः।सामानाधिकरण्यविशेषः।नियतसामानाधिकरण्यमानसप्रत्यक्षेवेतिबहिरिंद्रियाजन्यप्रत्यक्षेइत्यर्थः।सर्वत्रबहिरिंद्रियासंनिकृष्टे

नो यथाऽऽकाशेनेतुंसंभवतीत्याह।क्वचिदितिपरामर्शासंभवात् यत्रसाध्येनसमंचक्षुरादिसंनिकर्षस्तत्रचक्षुरादिनापिपरामर्शसंभवात्।चक्षुरन्वयेतिचक्षुरस

निकृष्टस्थलेऽपिक्वचित्चक्षुरन्वयस्येतिचक्षुरन्वयव्यतिरेकानुधावनंचेत्यर्थः।इत्य तांऽशयनेयेनाप्यसिद्धं।अर्थेतिउपसर्जनतयाविशेषणतयाप्रा

धान्येनविशेष्यत्वेन।तथात्वमितिपक्षविशेष्यकत्वमित्यर्थः।स्वमतेतियथोक्तनियमस्थलइत्यर्थः।पक्षविशेष्यकत्वनियमइति।प्रसिद्धसाध्यकानुमितेःपक्ष

विशेष्यकत्वनियमइत्यर्थः।व्याप्यविशेष्यकपरामर्शोऽज्ञायमानाधारमाहनानुमितेरेवोक्तनियमबलेनैवपक्षविशेष्यकत्वानुपपत्तेःजनकीभूतज्ञानेप प

क्षस्योपसर्जनतयाभानात्तत्राप्यनुमितिःपक्षविशेष्यकपरामर्शादनुमितिरितिचेन्नहिपक्षविशेष्यकपरामर्शस्याप्यस्याभावात्लिंगविशेष्यकपरामर्शात्

हेतुर्वाच्यःसचनसंभवतितत्रपक्षस्योपसर्जनत्वादितिभावः।ननुकारणीभूतज्ञानेयद्विशेषणतयाभासमानेनतत्कार्यभूतज्ञानेविशेष्यतानतिरिक्तरूपेण

भासमानेइत्येवनियमःअतोनपक्षविशेष्यकपरामर्शात्पक्षविशेष्यकानुमित्यनुपपत्तिरित्यतआहनहीतिनन्वयाचतथैवनवेतिपुरुषस्यदण्डइतिज्ञा राम॰

नजन्यदण्डीपुरुषइतिज्ञानेचेत्यर्थः।पक्षत्वेतिलिंगपरामर्शस्येति।पक्षलिंगोभयविशेष्यावगाहिपरामर्शस्येत्यर्थः।अयंस्वभावःअयंनियमः।साश्रयविशे

चिं-टी
१५५

ष्यिकां यत्सविशेष्यिकां न तथाभूतां न पक्षविशेष्यकां। यावद्विशेषसामग्रीविरहादिति भावः। अथ मेलितस्य स्वरूपसवीजं पक्षधर्मतावलम्ब्यत्वानुरोधात् स्या वम
पकतापरामर्श एव हेतुरूपे पले न तु तस्मात् स्यात् तिलघुतया साध्यवत्त्वमहनितरूपव्याप्तिज्ञानस्यैव तन्त्रत्वमुचितं केवलान्वयिस्थले च न दूमादेवा
नुमितिर्नान्यथा। न चैवं धीयो धूमवानित्युदाहरणानुपपत्तिरिति वाच्यं वह्निमानेव धूमवानित्यस्यैवोदाहरणत्वात्। न चैवं व्यापकसंशयापविरोधः इति
वाच्यं। सति तस्य किंचित्करत्वात् प्राचीनैरेतस्याकल्पनेनैव तदस्मुपगमात् अन्यथा तत्रापि वह्निव्याप्यधूमवानयमित्युपनयविरोधात् तु यदेतदहितधूम
व्यापको वह्निरित्युपनयस्यैवोचितत्वादिति दिक्॥ ॥इति परामर्शरहस्यं॥ ॥